# ऋग्वेदस्य व्याख्यातृत्वेन पदपाठकारः शाकल्यः

यादवपुरविश्वविद्यालयस्य कलाविभागान्तर्गते संस्कृतविभागे पिएइच्. डि.

इत्युपाधिप्राप्तये प्रदत्तो गवेषणाप्रबन्धः


शोधप्रबन्धकर्ता

देवाशिष-पात्रः

निबन्धनसंख्या- A00SA1100319

तत्त्वावधायकः

प्रो. अशोक-कुमार-माहातः

संस्कृतविभागाध्यापकः यादवपुरविश्वविद्यालयस्य

संस्कृतविभागः

यादवपुरविश्वविद्यालयः


२०२३

# Ṛgvedasya Vyākhyātṛtvena Padapāṭhakāraḥ Śākalyaḥ

Thesis submitted to the Department of Sanskrit of Jadavpur University
for the award of Doctor of Philosophy

By

Debasish Patra

Registration no. – A00SA1100319

Under the supervision of

Prof. Ashok Kumar Mahata

Professor, Dept. of Sanskrit, Jadavpur University

Department of Sanskrit

Jadavpur University

2023

Certified that the Thesis entitled

ऋग्वेदस्य व्याख्यातृत्वेन पदपाठकारः शाकल्यः submitted by me for the award of the Degree of Doctor of Philosophy in Arts at Jadavpur University is based upon my work carried under the Supervision of Prof. Ashok Kumar Mahata and that neither this thesis nor any part of it has been submitted before for any degree or diploma anywhere/elsewhere.

Countersigned by the

Supervisor: Candidate:

Dated: Dated:

## कार्तज्ञ्यविनिवेदनम्

सर्वासां लौकिकानामलौकिकानां च विद्यानां प्राप्तिस्थानं तथा पुरुषार्थचतुष्टयसिद्धिक्षेत्रं हि वेदः। तेषां वेदानाञ्च अखिलज्ञानाधारत्वात् निगूढार्थत्वाच्च साधारणानां तत्र प्रवेशः न सुकरो जायते। साधारणजनानां सविधे वेदार्थप्रकाशाय वेदोत्तरकालादेव वेदस्य व्याख्यानधारा प्रारब्धा। पुरा गुरुशिष्यपरम्परायां गुरवः स्वशिष्येभ्यः वेदमन्त्रान् उपदेशाञ्चक्रुः, परवर्तिनि काले ते शिष्याश्च स्वशिष्येभ्यः वेदमन्त्रान् उपदिष्टवन्तः, तस्मात् वेदस्यापरं नाम श्रुतिरिति। श्रुत्वा श्रुत्वा मन्त्राणां कण्ठस्थीकरणसमये कदाचित् वक्तुः कथनदोषात् उत श्रोतुः श्रवणदोषात् मन्त्रेषु यथा कोऽपि प्रक्षेपः न समापतेत् तस्मात् प्राचीनैः आचार्यैः वेदस्य विविधाः पाठाः समुद्भाविताः। ते पाठाः प्रथमतः द्विधा विभज्यन्ते – प्रकृतिपाठः विकृतिपाठश्च। प्रकृतिपाठः त्रिविधः संहितापाठः, पदपाठः क्रमपाठश्च। विकृतिपाठाः अष्टौ – जटा माला शिखा लेखा ध्वजः दण्डः रथः घनश्च। एकादशसु पाठेषु प्रथमतः पदपाठे एव संहितागतवेदमन्त्राणां पदविभागः परिलक्ष्यते। पदपाठे महर्षिणा शाकल्येन यथार्थपदविभागप्रदर्शनादेव मन्त्राणामर्थबोधः सम्भवः, अपि च महर्षिणा शाकल्येन पदविभागप्रसङ्गे पदपाठे अवग्रहेतिकरणादीनि प्रदर्शितानि येभ्यः संशयस्थलेषु यथार्थतया मन्त्रज्ञानं भवति।

अतः सर्वविद्यामूलस्य वेदस्य व्याख्याने शाकल्यस्य अवदानं स्वीकृत्य **ऋग्वेदस्य व्याख्यातृत्वेन पदपाठकारः शाकल्यः** इति शीर्षकमादाय मया शोधप्रबन्धः प्रस्तुतः। अस्मिन् गवेषणासन्दर्भप्रस्तुतकर्मणि मम तत्त्वावधाकाः प्रो. अशोक-कुमार-माहात-महाभागाः सर्वदैव मां विविधोपायेन साहाय्यं कृतवन्तः। तत्त्वावधायकमहाभागेभ्यः मया हार्द्या कृतज्ञता विनिवेद्यते। प्रबन्धस्यास्य विषयनिर्धारणे स एव पथिकृत्। न केवलं विषयविवेचनमपि तु यत्र यत्र मया शोधकार्ये संशयापन्नानां मन्त्राणां विचारे संशयः प्राप्तः तत्र तत्र तेन स्वकीयज्ञानगर्भया युक्त्या संशयनिरसने विशिष्टं साहाय्यं प्रदत्तम्। तत्सहायतां विना ममायं प्रबन्धः समाप्तिं गन्तुं

नार्हति । मम गवेषणोपदेष्टृसमितेः (Research Advisory Committee ) सदस्याः यादवपुरविश्वविद्यालयाध्यापकाः प्रो. तपन-शङ्कर-भट्टाचार्य्य-महाभागाः, रवीन्द्रभारतीविश्वविद्यालयाध्यापकाः प्रो. तारकनाथ-अधिकारी-महाभागाः, संस्कृतविश्वविद्यालयाध्यापकाः ड. लोकनाथ-चक्रवर्ती-महाभागाः च गवेषणाप्रबन्धप्रस्तुतकर्मणि विविधोपदेशेन मां सहायतां कृतवन्तः । तेभ्योऽहं कृतज्ञतां व्याहरामि । यादवपुरविश्वविद्यालयस्य संस्कृतविभागस्य अन्ये अध्यापकाः अध्यापिकाश्च विविधोपायेन मां साहाय्यं कृतवन्तः, तेभ्योऽहं कृतज्ञतां व्याहरामि । पुस्तकप्रदानेन मां ये उपकृतवन्तः तेभ्यः विभागीयग्रन्थागारिकेभ्यः अहं कृतज्ञतां व्याहरामि । विश्वविद्यालयस्य प्रशासनिककर्तारः विविधोपायेन मां साहाय्यं कृतवन्तः, तेभ्योऽहं कृतज्ञतां व्याहरामि । अतिमारिकाले गृहे वसन्नपि आन्तर्जालिकसाहाय्येन विधिधानि पुस्तकानि तथ्यानि च मया संगृहितानि, अतः आन्तर्जालिकसंस्थाभ्यः मया कृतज्ञता विज्ञाप्यते । मम सहाध्यायिनः सुहृदश्च विविधोपायेन मां सहायतां कृतवन्तः, तेभ्योऽहं कृतज्ञतां व्याहरामि। शोधप्रबन्धस्यास्य समर्पणकाले मत्पितुः श्रीश्यामापदपात्रस्य चरणकमले प्रणामं विनिवेदयामि। अपि च मन्मातुः स्वर्गीयायाः गीतापात्रमहाभागायाः पादपद्मे हार्द्यं प्रणामं समर्पयामि। सा सशरीरा नास्ति, परन्तु सर्वदैव मया सह अस्त्येवेति अनुभूयते । तयोराशीर्वादं विना ममायं प्रबन्धः न साफल्यं प्राप्नुयात्। अन्ततः सर्वविधोपायेन मां साहाय्यार्थं मम परिवारेभ्योऽहं कृतज्ञतां विज्ञापयामि।

# सूचीपत्रम्


| | पृष्ठाङ्कः |
|---|---|
| **प्रथमोऽध्यायः – उपोद्घातः** | **१ - २७** |
| १.१ पुरोवाक् | १ |
| १.२ वेदस्वरूपं तल्लक्षणं विभागः परिचयश्च | ३ |
| १.३ वेदोत्पत्तिः | ९ |
| १.४ ब्राह्मणारण्यकोपनिषदः | ११ |
| १.५ वेदाङ्गानि | १८ |
| १.६. साहित्यपर्यालोचना | २२ |
| १.७ गवेषणावकाशः | २४ |
| १.८ उद्देश्यं प्रयोजनञ्च | २५ |
| १.९ गवेषणाप्रकल्पः गवेषणापद्धतिश्च | २६ |
| **द्वितीयः अध्यायः – श्रुतेः व्याख्यानपरम्परा पदपाठश्च** | **२९ - ७५** |
| २.१ संहितायामर्थपरिज्ञानम् | २९ |
| २.२ ब्राह्मणेषु वेदार्थव्याख्या | ३३ |
| २.३ वेदाङ्गेषु वेदार्थप्रकाशनम् | ३९ |
| २.३.१ वेदार्थावगमे शिक्षायाः प्रयोजनम् | ३९ |
| २.३.२ वेदार्थसिद्धये कल्पमाहात्म्यम् | ४० |
| २.३.३ वेदार्थज्ञाने व्याकरणावश्यकता | ४० |
| २.३.४ वेदार्थप्रतिपादने छन्दसो माहात्म्यम् | ४१ |
| २.३.५ वेदार्थसिद्धये ज्योतिषापेक्षा | ४२ |
| २.३.६ वेदार्थावबोधे निरुक्तमाहात्म्यम् | ४३ |

२.४ वेदार्थावगमे विविधाः सम्प्रदायाः ४६

२.५ वेदार्थप्रतिपादने मीमांसकसम्प्रदायः ४७

२.६ वेदार्थव्याख्याने पुराणेतिहासानुक्रमणिकानां माहात्म्यम् ४८

२.७ वेदव्याख्याने भारतीयपरम्परा ४९

२.७.१ याज्ञिकपक्षस्य प्रसिद्धा भाष्यकाराः ५०

२.७.१.१ स्कन्दस्वामी ५०

२.७.१.२ नारायण उद्गीथश्च ५१

२.७.१.३ वेङ्कटमाधवः ५१

२.७.१.४ सायणाचार्यः ५२

२.७.१.५ मुद्गलः ५४

२.७.२ वेदार्थप्रकाशे अध्यात्मपद्धतिः ५४

२.७.२.१ आनन्दतीर्थः ५५

२.७.२.२ आत्मानन्दः ५५

२.७.२.३ स्वामिदयानन्दसरस्वती ५६

२.८ वेदार्थप्रतिपादने पाश्चात्त्यपरम्परा ५६

२.८.१ म्याक्समुलारमहाभागः ५७

२.८.२ ओल्डेनवार्गमहाभागः कयेगीमहाभागश्च ५७

२.९ वेदस्य विविधाः पाठाः ५९

२.९.१ संहितापाठः ६०

२.९.२ क्रमपाठः ६०

२.९.३ जटापाठः ६१

२.९.४ मालापाठः ६३

२.९.५ लेखापाठः ६३
२.९.६ शिखापाठः ६४
२.९.७ ध्वजपाठः ६४
२.९.८ दण्डपाठः ६५
२.९.९ रथपाठः ६६
२.९.१० घनपाठः ६६
२.१० पदपाठः पदपाठकारः शाकल्यश्च ६७
२.१०.१ पदपाठस्वरूपम् ६७
२.१०.२ पदपाठकारः शाकल्यः ७०
२.११ अध्यायसारः ७४
**तृतीयः अध्यायः – पदविभागेन मन्त्रार्थज्ञापनम् ७७ - १५८**
३.१ पदलक्षणविमर्शः ७७
३.२ पदविभागः ८०
३.३ पदविभागेन मन्त्रार्थप्रकाशः ८१
३.४ छान्दसदीर्घत्वम् आकारप्रश्लेषश्च ११८
३.५ तिङन्तपददीर्घत्वम् १३८
३.६ अभ्यासदीर्घत्वम् १४५
३.७ छान्दसह्रस्वत्वम् १४७
३.८ अनानुपूर्विकसंहिता १५२
३.९ अध्यायसारः १५७
**चतुर्थः अध्यायः - अवग्रहेतिकरणाभ्यां प्रकृतमन्त्रार्थज्ञापनम् १५९ - २००**
४.१ अवग्रहलक्षणविचारः १५९

४.२ पदपाठेऽवग्रहः १६३

४.३ समासः १६६

४.४ अवग्रहेण मन्त्रार्थविज्ञापनम् १६७

४.५ इतिकरणम् १८६

४.६ इतिकरणेन मन्त्रार्थज्ञापनम् १८८

४.७ अध्यायसारः १९९

**पञ्चमोऽध्यायः – पदपाठेन शाकल्यस्य वैयाकरणत्वसिद्धिः २०१ - २२५**

५.१ भाषा व्याकरणञ्च २०१

५.२ पदपाठप्रतिफलिताः सन्धिनियमाः २०४

५.३ पदपाठेन प्रगृह्यत्वज्ञापनम् २१२

५.४ पदपाठप्रतिपादिताः समासनियमाः २१५

५.५ पदपाठे प्रतिपादिता उदात्तादिस्वराः २१७

५.६ कम्पस्वरः २२२

५.७ पदपाठे प्रतिफलिताः वैदिकनियमाः २२३

५.८ अध्यायसारः २२४

**षष्ठः अध्यायः – उपसंहारः** २२७ - २३८

प्रबन्धस्यास्य काश्च नूतना दिशः २३६ - २३७

**परिशिष्टम्** २३९ - २४२

**निर्वाचितग्रन्थपञ्जिः** २४३ - २५१

# आमुखम्

मानवसभ्यतायाः सृष्टिकालादारभ्य अर्वाचीनकालपर्यन्तं विश्वसाहित्यजगति प्राप्तेषु साहित्येषु संस्कृतसाहित्यं श्रेष्ठमन्यतमञ्च । निखिलेऽस्मिन् संस्कृतसाहित्ये वैदिकसाहित्यमतीव महत् स्थानमादधत् विराजते । तस्य च वैदिकवाङ्मयस्य आदिभूतं हि चतस्रः वैदिकसंहिताः । वेदः प्रधानतः द्विधा विभज्यते – संहिता ब्राह्मणञ्च, आरण्यकोपनिषदोः ब्राह्मणान्तःपातित्वात् । संहितायाः अपरं नाम हि मन्त्रः । मन्त्रब्राह्मणयोः अर्थज्ञानाय याथार्थ्यप्रतिपादनाय च परवर्तिनि काले वेदाङ्गानां परिशिष्टग्रन्थानाञ्च प्रादुर्भावः। भारतीयपरम्परानुसारेण वैदिकमन्त्राः ध्यायद्भिः ऋषिभिराम्नाता न तु विरचिताः । अतः अपौरुषेयाणां निखिलज्ञानाधाराणां वैदिकमन्त्राणामर्थस्पष्टीकरणाय वेदाङ्गानि महर्षिभिः विरचितानि । अङ्ग्यन्ते ज्ञायन्ते वेदार्थाः एभिरिति वेदाङ्गानि इति वेदाङ्गशब्दव्युत्पत्त्या एव वेदाङ्गानां वेदार्थप्रकाशकत्वमस्माभिर्ज्ञातुं शक्यते । वेदस्य प्रसिद्धेषु नामान्तरेषु श्रुतिः अन्यतमा । पुरा गुरवः स्वशिष्येभ्यः वेदमन्त्रान् उपदिष्टवन्तः शिष्याश्च श्रुत्वा श्रुत्वैव कण्ठस्थीकरणेन तान् वेदमन्त्रान् आत्मस्थीकृतवन्तः । ते शिष्याश्च स्वशिष्येभ्यः एवमेव उपदिष्टवन्तः। गुरुशिष्यपरम्परानुसारेण श्रुत्वा श्रुत्वा कण्ठस्थीकरणात् वेदस्यापरं नाम श्रुतिरिति। विपुलानां वेदमन्त्राणां श्रुत्वा श्रुत्वा कण्ठस्थीकरणकाले वक्तुः कथनदोषात् श्रोतुः श्रवणदोषाद् वा वेदमन्त्रेषु यथा कोऽपि प्रक्षेपो न समापतेत् तदर्थं पुरा ऋषिभिः वैदिकमन्त्राणां यथार्थतया संरक्षणाय वेदस्य विविधाः पाठप्रकाराः समुद्भाविताः । ते च पाठाः प्रथमतः द्विधा विभज्यन्ते – प्रकृतिपाठाः विकृतिपाठाश्च । पुनः प्रकृतिपाठः त्रिविधः संहितापाठः, पदपाठः क्रमपाठश्च । एषु संहितापाठः योगाप्रकृतिनाम्ना पदपाठक्रमपाठौ रूढाप्रकृतिनाम्नाभिधीयन्ते । विकृतिपाठाश्च अष्टौ – जटा माला शिखा रेखा ध्वजः दण्डः रथः घनश्च । संहितापाठमतिरिच्य अन्ये पाठाः सर्वे एव पदपाठाश्रिताः। पदपाठे एव आदौ संहितागतमन्त्रस्य प्रत्येकं पदानि पृथक्

प्रदर्श्यन्ते पाठान्तरेषु च तानि विभक्तपदानि विविधक्रमेण उच्चार्यन्ते प्रक्षेपनिवारणाय । ऋग्वेदसंहितायाः पदपाठकर्तास्ति महर्षिः शाकल्यः । महर्षिणा शाक्लयेन न केवलं संहितागतपदानि विभक्तानि अपि तु तेन संहितागते मन्त्रे सन्धिसमासप्रगृह्यादीनि प्रदर्शितानि। एवंप्रकारेण महर्षिः शाकल्यः पदविभागकाले यथार्थतया सन्धिं विभज्य सम्यक्पदविभागप्रदर्शनेन, अवग्रहेण समासज्ञापनेन, इतिकरणेन प्रगृह्यत्वज्ञापनेन च संहितागतवेदमन्त्राणामर्थज्ञाने अर्थव्याख्याने बहुधा साहाय्यं चकार। यद्यपि इदानीं सर्वाणि वेदभाष्याणि पर्यालोच्य वेदार्थः अस्माभिः ज्ञातुं शक्यते परन्तु पदपाठस्य विद्यमानाभावे भाष्यकृतां सविधेऽपि वेदार्थप्रकाशः असम्भवः स्यात् । अतः वेदार्थव्याख्याने महर्षेः शाकल्यस्य अवदानमाधारीकृत्य 'ऋग्वेदस्य व्याख्यातृत्वेन पदपाठकारः शाकल्यः' इत्याख्यः प्रबन्धः मया प्रस्तुतः। अस्मिन् शोधप्रबन्धे संशयापन्नानां मन्त्राणामर्थज्ञाने तथार्थव्याख्याने कथं शाकल्य एव भाष्यकाराणां प्रथमः शरणं तत् युक्त्या प्रतिपादितम्।

# संकेतसूची

| | |
|---|---|
| अ. को. | अमरकोषः |
| अ. प्रा. | अथर्ववेदप्रातिशाख्यम् |
| अ. वे. सं | अथर्ववेदसंहिता |
| अ. शा. | अर्थशास्त्रम् |
| आप. श्रौ | आपस्तम्बश्रौतसूत्रम् |
| आ.य. प. | आपस्तम्बयज्ञपरिभाषा |
| ऋ. प्रा. | ऋग्वेदप्रातिशाख्यम् |
| ऋ. सं. | ऋग्वेदसंहिता |
| ऐ. आ. | ऐतरेयारण्यकम् |
| ऐ. ब्रा. | ऐतरेयब्राह्मणम् |
| कु. पु. | कूर्मपुराणम् |
| गो. ब्रा. | गोपथब्राह्मणम् |
| छा. उ. | छान्दोग्योपनिषद् |
| जै. न्या. वि. | जैमिनीयन्यायमालाविस्तरः |
| जै. ब्रा. | जैमिनीयब्राह्मणम् |
| जै. सू. | जैमिनिसूत्रम् |
| तै. उ. | तैत्तिरीयोपनिषद् |
| तै. प्रा. | तैत्तिरीयप्रातिशाख्यम् |
| तै. ब्रा. | तैत्तिरीयब्राह्मणम् |
| तै. सं. | तैत्तिरीयसंहिता |
| ना. शा. | नाट्यशास्त्रम् |

| | |
|---|---|
| नि. | निरुक्तम् |
| न्या. सू. | न्यायसूत्रम् |
| परा. उप | पराशरोपपुराणम् |
| परा. सं | पराशरसंहिता |
| पस्पशा. | पस्पशाह्निकम् |
| पा. धा. | पाणिनीयधातुपाठः |
| पा. शि. | पाणिनीयशिक्षा |
| पा. सू. | पाणिनीयसूत्रम् |
| फि. सू. | फिट्सूत्रम् |
| भा. पु. | भागवतपुराणम् |
| मनु. | मनुसंहिता |
| महा. | महाभाष्यम् |
| महा. भा. | महाभारतम् |
| मा. शि. | माण्डूकीशिक्षा |
| मुण्ड. उ. | मुण्डकोपनिषद् |
| मे. को. | मेदिनीकोषः |
| या. शि. | याज्ञवल्क्यशिक्षा |
| वा. प. | वाक्यपदीयम् |
| वा. पु. | वायुपुराणम् |
| वा. प्रा. | वाजसनेयिप्रातिशाख्यम् |
| वृ. दे. | वृहद्देवता |
| शत. ब्रा. | शतपथब्राह्मणम् |

| | |
|---|---|
| शा. भा. | शाबरभाष्यम् |
| सा. द. | साहित्यदर्पणः |

## १.१ पुरोवाक्

धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयसम्पत्तिर्हि वेदार्थज्ञानाधीना इत्यत्र केषामप्याचार्याणां नास्ति विप्रतिपत्तिः। स च वेदो वर्तते निखिलसंस्कृतवाङ्मयस्य तथा विश्ववाङ्मयस्य प्राचीनतमं महत्तमं च साहित्यिकनिदर्शनम्। वेदाः सर्वेषां लोकधर्माणां कविकर्मणां च मूलभूताः। भगवता मनुनोच्यते –

"वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।

आचारश्चैव साधूनामात्मनस्तुष्टिरेव च।।"[1] इति।

भारतीयपरम्परानुसारम् अनादिनिधना निखिलज्ञानमया वेदाः परमेश्वरसम्भुताः, यस्माद्धि इमाः लौकिकाः प्रवृत्तयः प्रवर्तन्ते। तथा चोक्तं भगवता व्यासदेवेन-

''अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।

आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।।''[2] इति।

भारतीयदिशा न केवलं इहलौकिकानामपि च पारलौकिकानामपि विषयायां ज्ञानार्थं वेदा एव मुख्यसाधनभूताः। यथोच्यते मनुना –

"चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक्।

भूतं भव्यं भविष्यं च सर्वं वेदात् प्रसिद्ध्यति।।"[3] इति।

निखिलज्ञानाधाररूपाः इमे वेदाः सर्वासां लौकिकविद्यानामुत्पत्तिस्थानमिति विद्वद्भिरपि स्वीक्रियते। साहित्यदर्पणकृता विश्वनाथेनोच्यते – "चतुर्वर्गप्राप्तिर्हि वेदशास्त्रेभ्यो नीरसतया

---

[1] मनु. २/६

[2] महा. भा. /शान्ति/ २३२/२४

[3] मनु. १२/९७

दुःखादेव परिणतबुद्धीनामेव जायते। परमानन्दसंदोहजनकतया सुखादेव सुकुमारबुद्धीनामपि पुनः काव्यादेव।"[४] इति। नाट्यशास्त्रकृता भरतेनाप्युच्यते नाट्यनिर्माणार्थं चतुर्भ्यो वेदेभ्य एव नाट्यस्य मूलभूतान् पाठादीन् गृहीतवान् ब्रह्मा –

"जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च ।

यजुर्वेदादभिनयान् रसानाथर्वणादपि॥"[५] इति।

न केवलं काव्यशास्त्रस्य अपि तु व्याकरणशास्त्रस्य दर्शनशास्त्रस्य च मूलभूतं हि वैदिकसाहित्यम् । भारतीयदार्शनिकसम्प्रदायाः आस्तिकनास्तिकभेदेन प्रधानतः द्विधा विभज्यन्ते । अयञ्च विभागः वेदनिर्भर एव। दार्शनिकसम्प्रदायेषु ये न वेदे विश्वसन्ति ते नास्तिकपदवाच्याः, ये वेदं प्रमाणत्वेनाङ्गीकुर्वन्ति ते आस्तिकसम्प्रदायाः। उच्यते च – "....नास्तिको वेदनिन्दकः।"[६] इति। वाक्यपदीयकृता भर्तृहरिणा उच्यते वेदवाक्यान्येवाश्रित्य स्मृतिशास्त्रदर्शनशास्त्राणामुद्भवः सञ्जातः –

"स्मृतयो बहुरूपाश्च दृष्टादृष्टप्रयोजनाः।

तमेवाश्रित्य लिङ्गेभ्यो वेदविद्भिः प्रकल्पिताः॥

तस्यार्थवादरूपाणि निश्रिताः स्वविकल्पजाः ।

एकत्विनां द्वैतिनां च प्रवादा बहुधा मताः॥"[७] इति ।

---

[४] सा.द.१/२

[५] ना. शा. १/१७

[६] मनु २/११

[७] वा. प. / ब्रह्मकाण्डम् ७-८

## १.२ वेदस्वरूपं तल्लक्षणं विभागः परिचयश्च

ननु को नाम वेदः इति जिज्ञासायामुच्यते ज्ञानार्थकाद् विद्-धातोः करणे घञि वेदशब्दो निष्पन्नो यस्यार्थः ज्ञानराशिः। ज्ञानार्थमतिरिच्य लाभादिषु त्रिषु अर्थेष्वपि विद् धातोः प्रयोगो दृश्यते।[८] विद् विचारणे, सत्तायाम्, विद् लाभे इति त्रिभ्यो धातुभ्यो घञ्प्रत्ययेन वेदशब्दः सम्पद्यते। एतेभ्यश्चतुर्भ्यो धातुभ्यः समाहारपूर्वकं वेदशब्दार्थमाह ऋग्वेदप्रातिशाख्यव्याख्याकृद् विष्णुमित्रः – 'विद्यन्ते ज्ञायन्ते लभ्यन्ते एभिर्धर्मादिपुरुषार्था इति वेदाः।'[९] इति। धर्मार्थकाममोक्षा इति पुरुषार्थचतुष्टयं यैः ज्ञायते लभ्यते वा त एव वेदपदवाच्याः। वेदाः तादृशोपायेन जनान् उपकुर्वन्ति ये उपायाः कदापि प्रत्यक्षादिप्रमाणैः सहस्रैः तार्किकैरपि प्रतिपादयितुं न शक्यन्ते। तस्मादुच्यते याज्ञवल्क्येन –

"प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।

एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता॥"[१०] इति

वेदा न केवलं धर्मादीष्टसाधनभूताः किञ्च अनिष्टनिवारकाः अप्येते। तस्मात् सायणाचार्येण वेदलक्षणप्रसङ्गे उक्तम् – "इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः।"[११] इति। महर्षिदयानन्देन वेदस्वरूपनिर्णयप्रसङ्गे उच्यते – "अर्थवशात् (विद्) ज्ञाने, (विद) सत्तायाम्, (विदऌ) लाभे, (विद) विचारणे एतेभ्यो हलश्च इति सूत्रेण करणाधिकरणकारकयोर्घञ्प्रत्यये कृते वेदशब्दः साध्यते। तथा (श्रु) श्रवणे इत्यस्माद्धातोः

---

[८] वेत्ति वेद विद् ज्ञाने विन्ते विद् विचारणे।
विद्यते विद् सत्तायां लाभे विन्दति विन्दते॥
अत्रोल्लेख्यं यत् पाणिनीयधातुपाठे अपरस्यापि एकस्य विद्-धातोः उल्लेखो दृश्यते 'विद चेतनाख्याननिवासेषु' इति। (१७७९)

[९] ऋ. प्रा./ वर्गद्वयवृत्तिः

[१०] सायणाचार्यकृतायाम् ऐतरेयब्राह्मणभाष्यभूमिकायां याज्ञवल्क्यमतरूपेण श्लोकोऽयमुद्धृतः।

[११] तै. सं भाष्यभूमिका

करणकारके क्विन्प्रत्यये कृते श्रुतिशब्दो व्युत्पद्यते। विदन्ति जानन्ति, विद्यन्ते भवन्ति, विन्दन्ति विन्दन्ते लभन्ते, विन्दते विचारयन्ति सर्वे मनुष्याः सर्वाः सत्यविद्या यैर्येषु वा तथा विद्वांसश्च भवन्ति ते वेदाः। तथाऽदिसृष्टिमारभ्याद्यपर्यन्तं ब्रह्मादिभिः सर्वाः सत्यविद्याः श्रूयन्तेऽनया इति श्रुतिः।"[१२] इमे वेदाः मन्त्रब्राह्मणात्मकाः। सायणाचार्य ऋग्वेदभाष्यभूमिकायां वेदलक्षणप्रसङ्गे आह – "मन्त्रब्राह्मणात्मकशब्दराशिर्वेदः"[१३] इति। तैत्तिरीयसंहितायाः श्रौतसूत्रकृता आपस्तम्बेन उच्यते - "मन्त्रब्राह्मणयोर्वेदनामधेयम्"[१४] इति। मन्त्रो नाम संहिता यत्र प्राधान्येन देवतानां स्तुतिर्दृश्यते । ब्राह्मणांशे प्रायेण संहितागतमन्त्राणां विनियोगादिकं प्राप्यते। ब्राह्मणानां शेषांशो हि आरण्यकम्, आरण्यकस्यान्तिमांशो हि उपनिषद् । आरण्यके प्रायेण प्रतीकी उपासना वर्णिता, उपनिषदि परमज्ञानरूपम् आत्मतत्त्वमालोचितम् । एवंप्रकारेण मन्त्रब्राह्मणारण्यकोपनिषदः मिलित्वा वेदः। प्रायेण सर्वत्र यद्यपि ब्राह्मणारण्यकोपनिषदां वेदत्वमुररीकृतं परन्तु केचन विद्वांसः मन्त्रान् अतिरिच्य ब्राह्मणारण्यकोपनिषदां वेदत्वं न अङ्गीकुर्वन्ति । अर्वाचीनविद्वान् युधिष्ठिरमीमांसकमहाभागः स्वकीये *वेद-श्रुति-आम्नाय-संज्ञा-मीमांसा*नामके निवन्धे केवलं मन्त्राणामेव वेदत्वं स्वीकृतवान् । तत्र तेन ब्राह्मणानां वेदत्वनिराकरणप्रसङ्गे काश्चन युक्तयः अपि प्रतिपादिताः। तन्नये चतसृषु संहितासु (ऋग्वेदसंहिता, सामवेदसंहिता, यजुर्वेदसंहिता अथर्ववेदसंहिता च) कृष्णयजुर्वेदसंहितां व्यतिरिच्य सर्वत्र मन्त्राः शुद्धरूपेण प्राप्यन्ते । तत्र केवलं देवतानां स्तुतिरेव दृश्यते । परन्तु कृष्णयजुर्वेदसंहितायां न केवलं शुद्धाः मन्त्राः प्राप्यन्ते, तत्र मन्ताः मिश्रितरूपेण प्राप्यन्ते । तत्र संहितामध्ये ब्राह्मणवाक्यान्यपि उपलभ्यन्ते । 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति वेदलक्षणं तु कृष्णयजुर्वेदश्रौतसूत्रकृता आपस्तम्बेन प्रदत्तम् । किञ्च आपस्तम्बश्रौतसूत्रस्य परिभाषाप्रकरणे

---

[१२] ऋग्वेदादिभाष्यभूमिका वेदोत्पत्तिविचारः पृ १५

[१३] सायणाचार्यविरचिता ऋग्वेदभाष्यभूमिका

[१४] आ. य. प. १/३१

वेदलक्षणमिदं पठितम् । युधिष्ठिरमीमांसकमहाभागमतानुसारेण सर्वत्र (अन्येषु सम्प्रदायेषु) केवलं मन्त्राणामेव वेदत्वं प्रचलितमासीत् परन्तु यतो हि कृष्णयजुर्वेदे मन्त्रमध्ये कुत्रचित् ब्राह्मणवाक्यानि प्राप्यन्ते तस्मात् कृष्णयजुर्वेदश्रौतसूत्रकारेण परिभाषारूपेण सूत्रेण अनेन उक्तं यत् तदीये श्रौतसूत्रे यत्र वेदशब्दमादाय किमपि विधीयते तत्र तु मन्त्रः ब्राह्मणं च बोध्यम् । तन्नये आपस्तम्बश्रौतसूत्रे विशेषतया ब्राह्मणस्य वेदत्वं स्वीकृतम् परन्तु सामान्यतया ब्राह्मणस्य वेदत्वं न स्वीकृतमासीत् प्राचीनपरम्परायाम्। आपस्तम्बेन ब्राह्मणस्य पारिभाषिकतया वेदत्वं स्वीकृतम्, न तु तस्य सार्वत्रिकं वेदत्वम् इति युधिष्ठिरमहाभागमतम् । तन्नये यतो हि अन्येषां श्रौतसूत्रकाराणां ब्राह्मणानां वेदत्वमभिप्रेतं नासीत् तस्मात् तैः पृथक् वेदलक्षणं न प्रदत्तम् । किञ्च आपस्तम्बश्रौतसूत्रस्य व्याख्याकारः हरदत्तोऽपि 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति सूत्रव्याख्यानावसरे आह 'कैश्चिन्मन्त्राणामेव वेदत्वमाख्यातम्'[१५] इति।

इमे च वेदाश्चत्वारः – ऋग्वेदः, सामवेदः, यजुर्वेदः अथर्ववेदश्च। ऋग्वेदसंहिता सर्वासु संहितासु बृहत्तमा । यत्रार्थवशेन पादव्यवस्था दृश्यते तेषां छन्दोबद्धानां मन्त्राणामेव ऋक् इति संज्ञा । अपि च ऋच्यते स्तूयते यया सा ऋक् इति। अत ऋचां समूह एव ऋग्वेदसंहिता इत्याख्यां लभते । यद्यपि महाभाष्यकृता पतञ्जलिना महाभाष्यस्य एकविंशतिः शाखाः उल्लिखिताः, काशिकादिषु इतोऽपि अधिकाः शाखाः निर्दिष्टाः परन्तु शौनककृतचरणव्यूहानुसारेण ऋग्वेदस्य पञ्च शाखाः वर्तन्ते – शाकलशाखा, वाष्कलशाखा, आश्वलायनशाखा, शाङ्खायनशाखा माण्डूकायनशाखा च । ऋग्वेदस्य मण्डलक्रमेण अष्टकक्रमेण च द्विविधः विभागो दृश्यते। मण्डलक्रमेण दश मण्डलानि, पञ्चाशीतिरनुवाकाः, अष्टाविंशत्यधिकैकसहस्रानि सूक्तानि। अत्रोल्लेख्यं यत् ऋग्वेदस्य अष्टमे मण्डले एकादशसंख्यकानि वालखिल्यसंज्ञकानि सूक्तानि सन्ति । अष्टकक्रमेण अष्ट अष्टकाः, चतुष्षष्टिः अध्यायाः, षडधिकद्विसहस्रा वर्गाः, प्रायेण

[१५] युधिष्ठिरमीमांसकप्रणीता *वेद-श्रुति-आम्नाय-संज्ञामीमांसा* पृ.१०.

पञ्चशताधिकदशसहस्रा मन्त्राः। सम्प्रति शाकलवाष्कलाश्वलायनशाङ्खायनमाण्डूकायनेषु ऋक्शाखिनां मध्ये शाकलशाखायाः एव अध्ययनाध्यापनप्रचारः परिदृश्यते । ऋग्वेदस्य द्वितीयमण्डलादारभ्य सप्तममण्डलपर्यन्तं गोष्ठीमण्डलमिति नाम्ना व्यपदिश्यते । अत्र प्रत्येकं मण्डलस्य सम्बन्धः केनापि ऋषिणा तद्वंशजेन वा सह निश्चितरूपेण दृश्यते । द्वितीयमण्डलस्य गृत्समदवंशजाः, तृतीयमण्डलस्य विश्वामित्रस्य वंशजाः, चतुर्थमण्डलस्य द्रष्टारो वामदेववंशजाः एवमन्येषामपि। ऋक्संहितायां प्राधान्येन देवतानां स्तुतिरेव परिदृश्यते । अपि चात्र सृष्ट्युत्पत्तिविषयकानि बहूनि दार्शनिकसूक्तानि, नाटकवीजरूपेण कथितानि उक्तिप्रत्युक्तिरूपाणि संवादसूक्तानि, दानस्तुतिसूक्तानि च उपलभ्यन्ते । देवतानां स्तुत्यवसरे अत्र सामाजिकधर्मीयदार्शनिकतत्त्वानां विचारः बाहुल्येन परिलक्ष्यते ।

चतुर्षु वेदेषु यजुर्वेदोऽस्ति अन्यतमः। 'यजँ देवपूजासङ्गतिकरणदानेषु'[१६] इति धातोः निष्पन्नो यजुर्वेदः स्वार्थकनामा वर्तते । चतुर्षु वेदेषु यज्ञेषु साक्षात् प्राधान्यं यजुर्वेदस्यैव वर्तते । तस्मादेव प्रख्यातवेदभाष्यकृता सायणाचार्येण वेदव्याख्यानावसरे आदौ एव यजुर्वेदः व्याख्यातः। उक्तञ्च तेन–

"आध्वर्यवस्य यज्ञेषु प्राधान्याद् व्याकृतः पुरा।

यजुर्वेदोऽथ हौत्रार्थमृग्वेदो व्याकरिष्यते।।"[१७] इति।

यजुर्वेदस्य ऋत्विक् अध्वर्युरेव यज्ञस्य स्वरूपं विशेषेण सम्पादयति । तदुक्तं सायणाचार्येण – 'अध्वर्युनामक एक ऋत्विग् यज्ञस्य मात्रां स्वरूपं विमिमीते विशेषेण निष्पादयति ।'[१८] इति। यजुर्वेदः प्रथमतया द्विधा विभज्यते शुक्लयजुर्वेदः कृष्णयजुर्वेदश्च । शतपथब्राह्मणानुसारेण

[१६] पा. धा. ११५७

[१७] सायणाचार्यकृता ऋग्वेदभाष्यभूमिका

[१८] तत्रैव

यजुर्वेदस्य सम्प्रदायद्वयम् – ब्रह्मसम्प्रदायः आदित्यसम्प्रदायश्च। ब्रह्मसम्प्रदायस्य कृष्णयजुर्वेदः, आदित्यसम्प्रदायस्य शुक्लयजुर्वेदश्च । 'आदित्यानीमानि शुक्लानि यजुंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते'[१९] इति। महाभाष्यकारोक्तासु एकोत्तरशतसु शाखासु अधुना शुक्लयजुर्वेदस्य काण्वमाध्यन्दिने इति द्वे शाखे, कृष्णयजुर्वेदस्य तैत्तिरीयमैत्रायणीकठकपिष्ठलाः चतस्रः शाखाः प्राप्यन्ते । काण्वमाध्यन्दिनयोः उभययोः चत्वारिंशत् अध्यायाः सन्ति ।

चतसृषु वैदिकसंहितासु सामसंहिता अतीव महत्वपूर्णा गौरवशालिनी च । श्रीमद्भगवद्गीतायां भगवान् श्रीकृष्णः आत्मानं सामवेदेन उपमितवान् – 'वेदानां सामवेदोऽस्मि'[२०] इति। शौनकविरचितायां *वृहद्देवता*यामपि सामवेदस्य भूयसी प्रशंसा दृश्यते । उच्यते च तत्र – 'सामानि यो वेद स वेद तत्त्वम्'[२१] इति। सामवेदोऽस्ति गीतात्मकः। सामसंहितायाः अधिका मन्त्राः ऋग्वेदतः एव गृहीताः। 'सा' नाम ऋक् 'अम्' नाम षड्जादयो स्वराः। ऋग्वेदगतमन्त्राः अत्र स्वरसहयोगेन उदगात्रा गीयन्ते । सामवेदस्य प्रधानतः विभागद्वयं वर्तते – आर्चिको गानं तथा। आर्चिकोऽपि द्विधा विभज्यते पूर्वोत्तरभेदेन । विषयानुसारेण पूर्वार्चिकः चतुर्धा विभज्यते – आग्नेयपर्व, ऐन्द्रपर्व, पवमानपर्व आरण्यकञ्चेति । पूर्वार्चिके षट् प्रपाठकाः सन्ति । प्रतिप्रपाठकं द्वौ खण्डौ तथा प्रतिखण्डं दशतिः, दशत्यां च ऋचः सन्ति। पूर्वार्चिके पञ्चाशदधिकषट्शतं मन्त्राः सन्ति । उत्तरार्चिकं प्रायेण अनुष्ठाननिर्देशपरकम्, अत्र नव प्रपाठकाः तथा पञ्चविंशत्यधिकद्वादशशतं मन्त्राः सन्ति । एवंप्रकारेण पूर्वोत्तरार्चिकमेकीकृत्य सामवेदस्य मन्त्राः भवन्ति पञ्चसप्तत्यधिकाष्टादशशतम् । सामगानं चतुर्विधं भवति – ग्रामगेयम्, अरण्यगेयम्, ऊहगानम्, ऊह्यगानञ्च। प्राचीनकालेऽस्य वेदस्य

---

[१९] श. ब्रा. १४/९/५/३३

[२०] श्रीमद्भगवद्गीता १०/२२

[२१] वृहद्देवता ८/१३०

बह्व्यः शाखाः आसन्। महाभाष्यकारेणोक्तं यत् – "सहस्रवर्त्मा सामवेदः"[२२] इति। परन्तु अधुना सामवेदस्य केवलं शाखात्रयं दृग्गोचरीभवति – कौथुमशाखा, राणायणीयशाखा, जैमिनीयशाखा च। आसु कौथुमशाखायाः एव सर्वाधिकप्रचलनं परिलक्ष्यते।

अथर्ववेदस्य अर्वाचीनरूपेण प्रसिद्धिः। यद्यपि कुत्रचित् त्रयीति नाम्ना ऋग्वेदसामवेदयजुर्वेदानां वेदत्वं स्वीकृत्य अथर्ववेदस्य वेदत्वं निराक्रियते परन्तु तथा न, अथर्ववेदस्यापि वेदत्वम् अस्त्येव। "यत्रार्थवशेन पादव्यवस्था तेषामृग्, गीतिषु सामाख्या, शेषे यजुःशब्दः"[२३] इत्यनेन जैमिनिना यल्लक्षणं प्रदत्तं तत्तु त्रिविधमन्त्रस्य न तु वेदत्रयस्य। अथर्ववेदस्य वेदत्वे बहुत्र प्रमाणानि दृश्यन्ते। बहुत्रैव ऋगादिवेदत्रयेण सह अथर्ववेदस्यापि उल्लेखो दृश्यते। अपि च कैश्चिद् यदुच्यते अथर्ववेदस्य यज्ञेन सह सम्बन्धो नास्तीति, तान् प्रति एवं वक्तव्यं यद् कस्यापि यज्ञस्य पूर्णतासम्पादनार्थं चत्वारः ऋत्विजः अपेक्षते। तेषु ब्रह्मा इति ऋत्विक् यज्ञस्य अध्यक्षो भवति। अस्य प्रधानकार्यं नानाविधकर्मणां निरीक्षणं त्रुटौ सत्यां प्रायश्चित्तविधानञ्च। एतदर्थं ब्रह्मा सर्ववेदविद् इति कथ्यते। अत ऋक्-साम-यजुषां मन्त्रैः यज्ञः सम्पाद्यते तथापि ब्रह्मकर्मसम्पादनार्थम् अथर्ववेदः अपेक्ष्यते। अतः अथर्ववेदस्यापि वेदत्वमस्तीति बहुभिः पण्डितैः स्वीक्रियते। वेदे एव अथर्ववेदस्य वेदत्वमङ्गीकृतम्। छान्दग्योपनिषदि सनत्कुमारं प्रति नारदवाक्यं यथा – "ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थम्"[२४] इति। मुण्डकोपनिषद्यपि एवमाम्नायते – "ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः"[२५]इति, एवमन्यत्रापि दृश्यते। महाभाष्ये अथर्ववेदस्य पैप्पलाद-शौनकीय-स्तौद-मौद-जाजल-जलद-ब्रह्मवेद-देवदर्श-चारणवैद्यारण्याः इति नव शाखाः उल्लिखिताः,

---

[२२] महा. पस्पशा.

[२३] जै. सू. २/१/३५-३७

[२४]छा. उ. ७/१/२

[२५]मुण्ड. उ. १/१/५

परन्तु अधुना अस्य शौनकीयपैप्पलादाख्यं शाखाद्वयमेव उपलभ्यते । अथर्ववेदे विंशतिः काण्डानि, एकादशाधिकैकशतम् अनुवाकाः, एकत्रिंशदधिकसप्तशतं सूक्तानि च सन्ति । अथर्ववेदसंहितायाः विषयवैचित्र्यमस्य वेदस्य विशिष्टत्वं द्योतयति ।

### १.३ वेदोत्पत्तिः

भारतीयपरम्परायां सर्वत्रैव वेदानामपौरुषेयत्वं समुद्घोषितम् । निरुक्तकृता यास्केनोच्यते – ऋषयो मन्त्रद्रष्टारो न मन्त्रकर्तारः । इति। पराशरोपपुराणे उक्तम् – न कश्चित् वेदकर्तास्ति वेदस्मर्ता स्वयम्भुवः। वेदव्यासेनोच्यते –

"युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः।

लेभिरे तपसापूर्वमनुज्ञाता स्वयम्भुवा॥"[२६] इति।

वैयाकरणभर्तृहरिणापि वेदस्यापौरुषेयत्वमादायोच्यते – "अनादिमव्यवच्छिन्नां श्रुतिमाहुरकर्तृकाम्"[२७]। इति। सकलज्ञानसारभूताः इमे वेदमन्त्राः ऋषिभिः आम्नाताः न विरचिताः इति भारतीयसिद्धान्तः। यद्यपि भारतीयानां सविधे परमेश्वरसम्भूतत्वात् वेदः अपौरुषेयः परन्तु पाश्चात्त्यविदूषां मते तथा न । पाश्चात्त्यमनीषिणो वेदं प्राचीनभारतीयसभ्यतायाः साहित्यिकनिदर्शनरूपेण मन्वते । तस्मात्तैः वेदोत्पत्तेः विविधाः कालाः स्थिरीकृताः। जर्मनदेशीयस्य विदुषः म्याक्समुलारमहाभागस्य मतानुसारेण अखिला ऋग्वेदसंहिता खिस्टपूर्वसहस्राब्दात् पूर्वमेव संकलिता । तेन *फिजिकल-रिलिजियन्* इत्याख्ये (*Physical Religion*) ग्रन्थे उच्यते – 'We should arrive at about 1000 B.C. as the date

---

[२६] महा. भा. १२.२१०.१९

[२७] वा. प. / ब्रह्म. श्लोक-१३५.

when the collection of the ten book of the ancient hymns must have taken place.'[२८]

अतः स्वयम्भुसम्भूतत्वात् अखिलज्ञानाधारत्वाच्च वेदानां दुरवगाहत्वं विद्वत्समाजे विदितमेव। "स्वाध्यायोऽध्येतव्यः"[२९] इति अध्ययनविध्यनुसारं प्राचीनकाले त्रैवर्णिकाणां कृते स्वस्वसम्प्रदायप्राप्तस्य वेदस्य अध्ययनम् अवश्यकर्तव्यतया विहितमासीत्। महाभाष्यानुसारेण न केवलं वेदानामपि च वेदैः सह षण्णां वेदाङ्गानामपि अध्ययनं कर्तव्यम्। तत्र महाभाष्यकृतोच्यते – "ब्राह्मणेन निष्कारणो धर्मः षडङ्गवेदोऽध्येयो ज्ञेयश्च"[३०] इति। किञ्च अर्थमनादाय वेदानां वेदाङ्गानां वा अध्ययनं क्रियते चेत् तदध्ययनं फलदायकं न भवति। एतदेव उररीकृत्य अध्ययनेन सह अर्थज्ञानमपि अपरिहार्यमिति शब्दानुशासनस्य गौणप्रयोजनप्रसङ्गे उच्यते महाभाष्यकृता पस्पशाह्निके –

"यदधीतमविज्ञातं निगदेनैव शब्द्यते।

अनग्नाविव शुष्कैधो न तज्जलति कर्हिचित्॥"[३१] इति।

ऋषिभिराम्नातत्वात् दुरूहानां वेदानां भाषाविषये उच्यते - निण्या वचांसि इति। साक्षात्कृतधर्मत्वात् ऋषीणां कृते वेदार्थाः स्पष्टाः आसन् । परवर्तिनि काले स्वल्पमतयः मानवाः वेदार्थावगमे असमर्थाः अभवन्। तस्मात् परवर्तिनि काले दुरुहानां वेदमन्त्राणां साधारणान् जनान् निकषा यथार्थार्थावगमाय वेदाङ्गानि वेदभाष्याणि विरचितानि । तस्मात् वेदाङ्गप्रयोजनं समुद्घोषितं निरुक्तकृता यास्काचार्येण – "साक्षात्कृतधर्माण ऋषयो बभुवुः।

[२८] F. Max Mullar. *Physical Religion*.p-96.

[२९] तै. आ. २.१५

[३०] महा./ पस्पशा.

[३१] नि. १.३.७.१

तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुः। उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च ॥" इति।[३२] निरुक्तवृत्तिकृता दुर्गाचार्येण उच्यते – "अथ किमर्थं वेदो वेदाङ्गानि च प्रवृत्तानि। सर्वकामप्राप्त्यादिर्मोक्षान्तः पुरुषार्थो वक्तव्य इति वेदः प्रवृत्तः। तत्परिज्ञानाय वेदाङ्गानि प्रवृत्तानि।" इति।[३३] भाष्येणैव अस्मान् निकषा वेदार्थाः परिस्फुटाः भवन्ति।

### १.४ ब्राह्मणारण्यकोपनिषदः

'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति आपस्तम्बप्रदत्तवेदलक्षणानुसारेण वेदानां संहिताभागं मन्त्रभागं वातिरिच्य अपरो भागः ब्राह्मणमित्युच्यते। मन्त्रार्थकाद् ब्रह्मशब्दाद् ब्राह्मणशब्दनिष्पत्तिः। ब्रह्मशब्दस्य मन्त्रयज्ञादिषु बहुष्वर्थेषु प्रयोगः प्राप्यते। शतपथब्राह्मणे उच्यते – 'ब्रह्म वै मन्त्रः'[३४] इति, 'ब्रह्म यज्ञः'[३५] इति च। मेदिनीकोशे नपुंसको ग्रन्थवाचको ब्राह्मणशब्दः उल्लिखितः – 'ब्राह्मणं ब्रह्मसंघाते वेदभागे नपुंसकम्'[३६] इति। वेदाः विषयदृष्ट्या चतुर्धा विभज्यन्ते। संहिता, ब्राह्मणम्, आरण्यकम् उपनिषच्च। मीमांसादर्शनस्य सूत्रकृता जैमिनिना ब्राह्मणलक्षणमुच्यते- 'शेषे ब्राह्मणशब्दः'[३७] इति। आपस्तम्बेन ब्राह्मणस्य लक्षणप्रसङ्गे उच्यते - 'कर्मचोदना ब्राह्मणानि'[३८] इति। संहिताब्राह्मणयोर्मिलित्वा कर्मकाण्डमित्युच्यते, आरण्यकोपनिषदोर्मिलित्वा ज्ञानकाण्डमित्युच्यते। वैदिकसम्प्रदाये ब्राह्मणग्रन्थानामतीव महत्वपूर्णं स्थानं वर्तते। यतो हि वैदिककर्मकाण्डस्य साङ्गोपाङ्गं विवरणमादौ ब्राह्मणग्रन्थेष्वेव उपलभ्यते। वेदस्य संहिताभागे प्राधान्येन देवतास्तुतिरुपलभ्यते,

---

[३२] नि. १/६/२०
[३३] निरुक्तस्य दुर्गवृत्तिः १/१
[३४] शत. ब्रा. ७/१/१/५
[३५] तदेव ३/१/४/१५
[३६] मे. को./णान्तवर्गः/ श्लोकः - ६७
[३७] जै. सू. २/१/३३
[३८] आ. य. प. १/३४

परन्तु ब्राह्मणेषु विधीनां प्राधान्यं परिलक्ष्यते । ब्राह्मणग्रन्थेषु विधीनां प्राधान्यं स्वीकुर्वता माधवाचार्येण जैमिनीयन्यायमालाविस्तरे चोक्तम् –

"मन्त्रश्च ब्राह्मणश्चेति द्वौ भागौ तेन मन्त्रतः।

अन्यद् ब्राह्मणमित्येतद् भवेद् ब्राह्मणलक्षणम्।।"[३९] इति।

मन्त्रात्मकाद् ब्रह्मशब्दात् ब्राह्मणशब्दस्योद्भवत्वात् ब्राह्मणानां वेदव्याख्यातृत्वरूपो धर्मः प्रतीयते। आपस्तम्बेन यज्ञपरिभाषासूत्रे ब्राह्मणग्रन्थानां षड् विषया उल्लिखिताः। विधिः, अर्थवादः, निन्दा, प्रशंसा, परकृतिः, पुराकल्पश्च। पूर्वमीमांसादर्शनस्य भाष्यकृता शबरस्वामिना ब्राह्मणग्रन्थानां दश विषयाः प्रतिपादिताः – हेतुः, निर्वचनं, निन्दा, प्रशंसा, संशयः, विधिः, परक्रिया, पुराकल्पः, व्यवधारणकल्पना उपमानञ्च। उच्यते च तेन –

"हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः।

पुराकल्पः परकृतिः व्यवधारणकल्पना।।

उपमानं दशैते तु विधयो ब्राह्मणस्य तु।।"[४०] इति।

चतुर्णामेव वेदानां ब्राह्मणग्रन्थाः समुपलभ्यन्ते। ऋग्वेदस्य ब्राह्मणद्वयमुपलभ्यते – ऐतरेयब्राह्मणं शाङ्खायनब्राह्मणञ्च। ऋग्वेदान्तर्भूतस्यैतरेयब्राह्मणस्य ऋषिरस्ति इतरापुत्रो महिदासः। ब्राह्मणेऽस्मिन् अष्ट पञ्चिकाः, चत्वारिंशदध्यायाश्च विद्यन्ते। ऋग्वेदीयस्य ऋत्विजः होतुः कर्मणां वैशद्येन विवरणमत्रोपलभ्यते । प्राधान्येनास्मिन् ब्राह्मणे अग्निष्टोमयज्ञस्य पूङ्खानुपुङ्खवर्णना प्रतिपादिता । ब्राह्मणस्यास्य सप्तमपञ्चिकायां शुनःशेपोपाख्यानं प्राप्यते, यत्र 'चरैवेति चरैवेति' इति विशिष्टा शिक्षा उपदिष्टा । ऋग्वेदस्यापरं ब्राह्मणमस्ति

[३९] जै. न्या. वि. २/१/८

[४०] शा. भा. २/१८

शाङ्खायनब्राह्मणं यस्य नामान्तरं हि कौषीतकिरिति। ऋग्वेदस्य वाष्कलशाखान्तर्भूतेऽस्मिन् ब्राह्मणे त्रिंशदध्यायाः सन्ति । अत्र प्राधान्येन अग्निहोत्रदर्शपूर्णमासचातुर्मास्यादियागानां वर्णनमुपलभ्यते।

सामवेदस्याष्टौ ब्राह्मणानि – ताण्ड्यब्राह्मणम्, षड्विंशब्राह्मणम्, जैमिनीयब्राह्मणम्, आर्षेयब्राह्मणम्, सामविधानब्राह्मणम्, वंशब्राह्मणम्, छान्दोग्यब्राह्मणम्, देवताध्यायब्राह्मणं च। उच्यते च सायणाचार्येण –

‘अष्टौ हि ब्राह्मणग्रन्थाः प्रौढं ब्राह्मणमादिमम्।

षड्विंशाख्यं द्वितीयं स्यात् ततः सामविधिर्भवेत्॥

आर्षेयं देवताध्यायो भवेदुपनिषत् ततः।

संहितोपनिषद् वंशो ग्रन्था अष्टावितीरिताः॥’[४१] इति।

अर्वाचीनविदुषोऽनिर्वाणस्य मतानुसारेण एतेषु ब्राह्मणेषु ताण्ड्यं जैमिनीयं छान्दोग्यं च सामवेदस्य प्रधानब्राह्मणत्रयम्, अन्यानि च तन्नये अनुब्राह्मणानि। ताण्ड्यब्राह्मणस्यापरं नाम पञ्चविंशब्राह्मणम्, अस्य ब्राह्मणस्य ऋषिः ताण्ड्यः, अध्यायाश्च पञ्चविंशतिः। ब्राह्मणेऽस्मिन् प्राधान्येन सोमयागः वर्णितः।

शुक्लयजुर्वेदस्य ब्राह्मणं शतपथब्राह्मणम्। माध्यन्दिने शतपथे चतुर्दश काण्डानि शतम् अध्यायाः काण्वे शतपथे सप्तदश काण्डानि चतुरधिकशतम् अध्यायाः सन्ति। सर्वेषु ब्राह्मणेषु न केवलम् आकारदृष्ट्या महत्त्वं भजते अपि त्विदं विषयगाम्भीर्येणापि महदेव । अत्र

[४१] सायणाचार्यकृता आर्षेयब्राह्मणभाष्यभूमिका

अग्निहोत्रहोमः, सोमयागः, दर्शपूर्णमासयागः, राजसूययागः, वाजपेययागः, चातुर्मास्ययागः, अश्वमेधयागः इत्यादयो वर्णिताः।

कृष्णयजुर्वेदस्य उपलब्धमेकमेव ब्राह्मणं तैत्तिरीयब्राह्मणम् । ब्राह्मणेऽस्मिन् त्रीणि काण्डानि सन्ति। अत्र प्राधान्येन अग्न्याधानम्, राजसूययागः, अग्निहोत्रहोमः, सौत्रामणीयाग इत्यादयो विषयाः समुपवर्णिताः।

अथर्ववेदस्य ब्राह्मणं हि गोपथब्राह्मणम् । ब्राह्मणस्यास्य द्वौ भागौ वर्तेते- पूर्वगोपथमुत्तरगोपथञ्चेति। ब्राह्मणेऽस्मिन् विविधा विषया वर्णिता दृश्यन्ते सृष्टेरुत्पत्तिः, सोमयागः, दर्शपूर्णमासयागः, अग्निष्टोमः, वाजपेयः, ओङ्कारः, ब्रह्मा, गायत्र्युपनिषद्, ब्रह्मचारी, दीक्षा इत्यादयः।

अत इदं वक्तुं शक्यते यत् यद्यपि यागादीनां वर्णनमेव ब्राह्मणग्रन्थानां मुख्यो विषयः परं ब्राह्मणानि वेदस्य मन्त्रभागस्य व्याख्यानान्यपि सन्ति । अपि ब्राह्मणेभ्यः अस्माभिः वैदिककालसम्बन्धाः विविधा विषया ज्ञातुं शक्यन्ते । यथा – ब्राह्मणकालिको धर्मः, समाजचित्रं, नारीमहिमा, नैतिकता, ऐतिहासिकचित्रं भौगोलिकविवरणमित्यादयः।

वैदिकवाङ्मयस्य तृतीयो भागोऽस्ति ब्राह्मणभागस्य परिशिष्टरूपं आरण्यकम् । ब्राह्मणेषु यथा कर्मकाण्डस्य प्राबल्यं परिलक्ष्यते आरण्यकेषु तथा न, आरण्यकेषु प्राधान्येन आध्यात्मिकतथ्यानां मीमांसा, प्राणविद्याया महिमा च प्रतिपादितः। आरण्यकमिति नाम्नैव आरण्यकैः सह एतेषां घनिष्ठः सम्बन्धः प्रतीयते । अरण्ये भवमिति व्युत्पत्त्या निष्पन्नोऽयं शब्दः। सायणाचार्येण आरण्यकस्य लक्षणप्रसङ्गे उच्यते –

“अरण्याध्ययनादेतद् आरण्यकमितीर्यते ।

अरण्ये तदधीयीतेत्येवं वाक्यं प्रवक्ष्यते।।”[४२] इति।

आरण्यकानां माहात्म्यं सूचयता वेदव्यासेनोच्यते –

“नवनीतं यथा दध्नो मलयाच्चन्दनं यथा।

आरण्यकञ्च वेदेभ्य ओषधिभ्योऽमृतं यथा।।”[४३] इति।

आरण्यकेषु गम्भीरतत्त्वविवेचनात् *गोपथब्राह्मणे* आरण्यकग्रन्थाः ‘सरहस्याः’ इत्याख्ययाभिधीयन्ते- ‘सर्वे वेदा निर्मिताः सकल्पाः सरहस्याः सब्राह्मणाः सोपनिषत्काः....’।[४४] इति। येषामाध्यात्मिकतत्त्वानां संकेतमात्रमुपलभ्यते संहिताभागे, तेषां विकाशः आरण्यकेषु प्राप्यते, तान्येन तत्त्वानि उपनिषत्सु सविस्तरं वर्णितानि। आरण्यकेषु प्राधान्येन प्राणविद्याया वर्णनं समुपलभ्यते। ऐतरेयारण्यकानुसारेण प्राणा एव विश्वस्य धारकाः सन्ति, सर्वाणि भूतानि प्राणेषु प्रतिष्ठितानि, सर्वा ऋचः, सर्वे वेदाः, सर्वाः शक्तयः, आकाशादयोऽपि प्राणेष्वेव प्रतिष्ठिता विद्यन्ते।[४५]

ऋग्वेदस्य आरण्यकद्वयम् – *ऐतरेयारण्यकं शाङ्खायनारण्यक*ञ्च। पञ्चसु आरण्यकेषु विभक्ते ऐतरेयारण्यके महाव्रतस्य वर्णनमुपलभ्यते। शाङ्खायनारण्यके पञ्चदश अध्यायाः सन्ति। सामवेदस्यापि आरण्यकद्वयम्- *जैमिनीयारण्यकं छान्दोग्यारण्यक*ञ्च। शुक्लयजुर्वेदस्यारण्यकं हि *बृहदारण्यकं, कृष्णयजुर्वेदस्यारण्यकं तैत्तिरीयारण्यक*म्। अथर्ववेदस्यारण्यकं नोपलभ्यते।

---

[४२] सायणाचार्यकृतं तैत्तिरीयारण्यकभाष्यम्

[४३] महा. भा./आदि./ ३३१/३

[४४] गो. ब्रा. १/२/९

[४५] ऐ. आ. २/१/६

वेदस्य आरण्यकरोत्तरो भागो हि उपनिषत् । वैदिकज्ञानकाण्डस्य मूलं हि उपनिषत्साहित्यम् । उप-नि- पूर्वकात् षद्लृधातोः क्विप्-प्रत्ययेन उपनिषच्छब्दो निष्पन्नः। शङ्कराचार्यमतानुसारेण उपनिषच्छब्देन तत्त्वज्ञानरूपिणी परमा विद्या ब्रह्मविद्या उच्यते । उच्यते च तेन- "सदेर्धातोर्विशरणगत्यवसादनर्थस्य उप-नि-पूर्वस्य क्विप्प्रत्ययान्तस्य रूपमिदम् उपनिषदिति । उपनिषच्छब्देन च व्याचिख्यासितग्रन्थप्रतिपाद्यवेद्यवस्तुविषया विद्योच्यते"[४६] इति । उपनिषत्सु वेदानां सारभूतानां सिद्धान्तानां प्रतिपादनत्वात् वेदस्यान्तिमभागत्वाच्च उपनिषदो वेदान्तः इत्यभिधयापि अभिधीयन्ते ।[४७] परमब्रह्मणः स्वरूपस्य वर्णनपरत्वात् उपनिषदां ब्रह्मविद्या इति संज्ञापि वर्तते । भारतीयदर्शनसम्प्रदाये प्रसिद्धेषु त्रिषु प्रस्थानेषु उपनिषदः प्रथमप्रस्थानरूपेण स्वीक्रियन्ते। उपनिषदां संख्याविषये विद्वत्सु वैमत्यं परिलक्ष्यते, मुक्तिकोपनिषदि अष्टोत्तरशतम् उपनिषदः उल्लिखिताः। एतासु उपनिषत्सु प्रधानभूताः प्रामाणिकाश्च वर्तन्ते दश । ता यथा – *ईशोपनिषत्, केनोपनिषत्, कठोपनिषत्, प्रश्नोपनिषत्, मुण्डकोपनिषत्, माण्डुक्योपनिषत्, तैत्तिरीयोपनिषत्, ऐतरेयोपनिषत्, छान्दोग्योपनिषत्, बृहदारण्यकोपनिषच्च* । उपनिषद्व्याख्याकारेषु प्रमुखो व्याख्याकारः शङ्कराचार्यो दशसु उपनिषत्सु एव भाष्यं विरचयामास ।

ऋग्वेदस्य उपनिषद्द्वयं हि *ऐतरेयोपनिषत् कौषीतक्युपनिषत्* । *ऐतरेयोपनिषत्* ऋग्वेदस्य शाकल्यशाखासम्बन्धिनी, इयमुपनिषत् ऐतरेयारण्यकस्य द्वितीयारण्यकान्तार्गतानां चतुर्थपञ्चमषष्ठाध्यायानां नाम। ऐतरेयोपनिषदि सृष्टितत्त्वस्य सम्यग्विवेचनं, कर्मसिद्धान्तस्य विवरणं, मनुष्यशरीरस्य माहात्म्यवर्णनञ्च लभ्यन्ते। ऋग्वेदस्य वाष्कलशाखायाः

[४६] शङ्कराचार्यकृता कठोपनिषद्भाष्यभूमिका

[४७] उच्यते च सदानन्दयोगीन्द्रेण वेदान्तसारग्रन्थे – वेदान्तो नाम उपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च । इति।

कौषीतक्युपनिषदस्ति शाङ्खायनारण्यकस्य चत्वारोऽध्यायाः, अत्र प्रजानां प्राणानाञ्च महत्ता वर्णितास्ति।

सामवेदस्य द्वे उपनिषदौ – *केनोपनिषत् छान्दोग्योपनिषच्च* । *केनोपनिषदि* यक्षोपाख्यानेन रूपकशैल्या ब्रह्मणोऽनिर्वचनीयता प्रतिपादिता । छान्दोग्योपनिषदि अष्टसु अध्यायेषु ओङ्कारोपासना सूर्योपासना अग्निविद्यादयो वर्णिताः।

शुक्लयजुर्वेदस्य द्वे उपनिषदौ – *ईशावास्योपनिषत् बृहदारण्यकोपनिषच्च* । ईशावास्योपनिषत् वस्तुतो यजुर्वेदसंहितायाः अन्तिमो भागः। तस्मादियं संहितोपनिषद् मन्त्रोपनिषद् वेत्यभिधीयते। अत्र अष्टादश मन्त्राः सन्ति, अत्र ज्ञानदृष्ट्या कर्मोपासनायाः रहस्यं प्रतिपादितमस्ति । बृहदारण्यकोपनिषदः काण्डत्रये तथा षट्स्वध्यायेषु सृष्टिविषयकाः सिद्धान्ताः, अध्यात्मज्ञानम्, अतिमुक्तिश्च समुपवर्णिता।

कृष्णयजुर्वेदस्य प्रसिद्धाः चतस्रः उपनिषदः – *कठोपनिषत्, तैत्तिरीयोपनिषत्, मैत्रायणीयोपनिषत्, श्वेताश्वतरोपनिषत्* च। कठोपनिषदः द्वौ अध्यायौ, प्रत्यध्यायं तिस्रो वल्लयः च सन्ति। अत्र नाचिकेतोपाख्यानेन ब्रह्मविषयिणी अपरा विद्या प्रतिपादिता। तैत्तिरीयोपनिषदः तिसृषु वल्लीषु व्याहृतिवर्णना, विज्ञानब्रह्मोपासनादयश्च वर्णिताः।

अथर्ववेदस्य तिस्र उपनिषदः – *प्रश्नोपनिषत्, मुण्डकोपनिषत्, माण्डुक्योपनिषच्च* । प्रश्नोपनिषदि ब्रह्मविद्यां प्राप्तुकामाः षड्ऋषयः महर्षिं पिप्पलादं विविधान् प्रश्नान् पप्रच्छुः । आध्यात्मिकजगतः समस्याः एतेषां प्रश्नानां विषयोऽस्ति । मुण्डकोपनिषदि ब्रह्मणा स्वज्येष्ठसुताय आथर्वणे ब्रह्मविद्या उपदिष्टा । माण्डुक्योपनिषदि चतुष्पादात्मणो रहस्यं विवरणमुपलभ्यते।

एवंप्रकारेण वेदस्य अन्तिमे भागे ब्रह्मतत्त्वम्, आत्मतत्त्वं, कर्मफलम्, एकेश्वरवादः, समन्वयवादः, सृष्टिविवेचनमित्यादयो विषयाः सम्यक् प्रतिपादिता दृश्यन्ते।

## १.५ वेदाङ्गानि

अङ्ग्यन्ते ज्ञायन्ते अवगम्यन्ते वेदार्थाः एभिरिति वेदाङ्गानि। प्रधानस्य अङ्गिनः वा यत् उपकारकं तदङ्गम्। यथा कोऽपि प्राणी स्वकीयैरङ्गैः कस्मिन्नपि कर्मणि यथार्थतया प्रवर्तितुं समर्थो भवति तद्वत् वेदाङ्गान्यपि वेदस्य यथार्थावबोधं कारयन्ति। वेदाङ्गसमूहोऽयं न केवलं वेदानाम् अङ्गभूतत्वात् वेदाङ्गसमाख्यां भजते अपि तु वेदाभिप्रायप्रकाशनक्षमत्वात् एव तेषां वेदाङ्गसंज्ञा। वेदाः अङ्ग्यन्ते विशदीक्रियन्ते प्रकाश्यन्ते वा एभिरिति वेदाङ्गानि। वेदस्य संहिताब्राह्मणारण्यकोपनिषदां यथार्थः पाठः अर्थबोधः क्रियासु मन्त्राणां विनियोगः एतत् सर्वमेव एभिः अङ्गैः सम्पाद्यते।

वेदाङ्गानां महत्त्वं अपरिहार्यत्वं च सूचयती *मुण्डकोपनिषद्* वेदैः सह एव अपराविद्यारूपेण वेदाङ्गानि उल्लिलेख –

"तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः।

शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषम्।।"[४८] इति।

षण्णां वेदाङ्गानां वेदस्य अङ्गत्वेन प्रकृष्टं वर्णनं *पाणिनीयशिक्षायामु*पलभ्यते –

"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।

ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥

---

[४८]मुण्ड. उ. १/१/५

शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।

तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥"[४९] इति ।

शिक्षा कल्पो व्याकरणम् निरुक्तं छन्दो ज्योतिषम् इति वेदाङ्गानि षट् ।

शिक्ष्यते वर्णस्वराद्युच्चारणविधिरुपदिश्यते यया सा शिक्षा। सायणाचार्येण शिक्षालक्षणप्रसङ्गे उक्तम् – "स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते उपदिश्यते सा शिक्षेति।"[५०] इति। तथा च तैत्तिरीयाः समामनन्ति उपनिषदारम्भे –"ओं शीक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा वलम्। साम सन्तानः"[५१]।इति। तत्र वर्णो अकारादिः, स्वरा उदात्तादिः, मात्रा ह्रस्वादिः, बलं स्थानप्रयत्नौ, साम निषादादिः, सन्तानो विकर्षणादिः । एषामवबोधनमेव शिक्षायाः प्रयोजनम्।

द्वितीयं वेदाङ्गं हि कल्पः। कल्प्यते समर्थ्यते यज्ञयागादिप्रयोगाः यत्र स कल्पः। अर्थात् कर्मकाण्डविधिप्रतिपादका ग्रन्थाः कल्पसूत्रमिति पदेन व्यपदिश्यन्ते। कल्पसूत्रमिति श्रौत-गृह्य-धर्मशूल्वसूत्राणां पारिभाषिकी संज्ञा । तत्र श्रुतिप्रतिपादितयज्ञादिविधानतद्विवरणप्रतिपादकाः ग्रन्थाः श्रुतिमूलकत्वात् श्रौतसूत्राणीति परिभाष्यन्ते । गृहस्थाश्रमिणां जन्मप्रभृतिमृत्युपर्यन्ताः संस्कारादयः कर्तव्यविशेषाः येषु विव्रियन्ते तानि गृह्यसूत्राणि। येषु पुनः पारमार्थिकाः सामाजिकाः राजनीतिविषयकाश्च धर्मविशेषा उपदिश्यन्ते तानि धर्मसूत्राणि । येषु च यज्ञवेदेः परिमापादिकमालितं तानि शूल्वसूत्राणि ।

तृतीयं वेदाङ्गं हि व्याकरणम्। व्याकरणस्य महत्वं स्वीकृत्य वेदपुरुषस्य मुखत्वेन अङ्गीकृतं व्याकरणम् । साधुशब्दज्ञानं हि व्याकरणस्य साक्षात् प्रयोजनम् । महाभाष्यकृता

---

[४९]पा. शि. ४१-४२

[५०] सायणाचार्यकृता ऋग्वेदभाष्यभूमिका

[५१] तै. उ. १/१/१

पतञ्जलिना व्याकरणस्य पञ्च मुख्यप्रयोजनानि त्रयोदश गौणप्रयोजनानि च उक्तानि। उक्तञ्च तेन –"रक्षोहागमलघ्वसन्देहाः प्रयोजनानि"[५२] इति। प्रचलितेषु व्याकरणसम्प्रदायेषु पाणिनीयव्याकरणं हि मुख्यं सर्वोत्कृष्टञ्च। अस्य सम्प्रदायस्य प्रवक्ता हि भगवान् पाणिनिः। पाणिनीयव्याकरणे एव वैदिकानां तथा लौकिकानां सर्वेषामेव शब्दानां साधुत्वरक्षणं परिलक्ष्यते। तस्मादेव संस्कृतवाङ्मये अस्य व्याकरणस्य सर्वाधिकं प्रचलनं दृश्यते। पाणिनीयव्याकरणं त्रिमुनिव्याकरणमिति उच्यते। त्रिमुनि हि सूत्रकारः पाणिनिः, वार्तिककारः कात्यायनः, भाष्यकारः पतञ्जलिश्च। पाणिनिः प्रायेण चतुःसहस्रसूत्रात्मकम् *अष्टाध्यायीति* सूत्रग्रन्थं विरचितवान्। तत्र कात्यायनेन वार्तिकमुपन्यस्तम्। वार्तिकोपरि पतञ्जलिना *महाभाष्यं* विरचितम्। यत्र त्रयाणां मुनीनां विरोधः दृश्यते तत्र उत्तरवर्तिनः मुनेः प्रामाण्यं स्वीक्रियते "यथोत्तरं मुनीनां प्रामाण्यमि"ति न्यायात्।

*निरुक्तं* हि चतुर्थं वेदाङ्गम्। *निरुक्तं* नाम पदविभागमन्त्रार्थदेवतानिरुपकं शास्त्रम्। निरुच्यते निःशेषेण उपदिश्यते निर्वचनविधिना तत्तदर्थावबोधनाय पदजातं येन यत्र वा तन्निरुक्तम्। निरुक्तलक्षणप्रसङ्गे सायणाचार्येण उक्तम्- 'अर्थाववोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्'।[५३] इति। निघन्टूवाख्यस्य वैदिककोषस्य व्याख्यानं हि यास्काचार्यविरचितं *निरुक्तम्*। निरुक्ते त्रीणि काण्डानि द्वादश अध्यायाश्च सन्ति। प्रथमतः तृतीयाध्यायपर्यन्तं नैघन्टुककाण्डम्, चतुर्थाध्यायात् षष्ठाध्यायपर्यन्तं नैगमकाण्डम्, सप्तमाध्यायात् द्वादशाध्यायपर्यन्तं दैवतकाण्डम्। उक्तञ्च अनुक्रमणिकाभाष्ये –

'आद्यं नैघन्टुकं काण्डं द्वितीयं नैगमं तथा।

---

[५२]महा. १/५

[५३]ऋग्वेदभाष्यभूमिकायां वेदस्य षडङ्गसमुद्देशप्रसङ्गः

तृतीयं दैवतञ्चेति समाम्नायस्त्रिधा स्थितः॥’[५४]इति।

गवादिर्देवपत्न्यन्तशब्दाः निरुक्ते आलोचिताः। निरुक्तकारयास्काचार्येण शाकटायनादिपूर्ववर्तिनः निरुक्तकाराः उल्लिखिताः। यास्काचार्येण नामाख्यातोपसर्गनिपाताः चत्वारि पदजातानि उक्तानि। तेनोच्यते- “तद् यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति।”[५५]इति।

छन्दो हि पञ्चमं वेदाङ्गम् । वेदाङ्गमिदं वेदपुरुषस्य पादत्वेन अङ्गीकृतम् । यथा वेदवाणी आधिक्येन पद्यात्मिका तथा लौकिककाव्यानि अपि । छन्दश्शास्त्रं हि अखिलकाव्यप्रपञ्चस्य प्रसवभूमिः। ऋषीणां हृदि उद्भासिताः वेदमन्त्राः छन्दोमयीवाणीरूपेण निसृताः। छन्द एव शब्दान् सूत्रवत् वध्नाति। छदि संवरणे इति धातोः छद अपवारणे इति धातोः वा छन्दःशब्दस्योत्पत्तिः। यास्काचार्येण निरूक्तग्रन्थे छन्दःशब्दस्य निर्वचनप्रसङ्गे उक्तम्- “छन्दांसि छादनात्”[५६]इति। वैदिकछन्दांसि अक्षरपरिमितानि भवन्ति । तस्मादुच्यते- “यदक्षरपरिमाणं तच्छन्दः”[५७] इति। अत्र अक्षरपदेन केवलं स्वरस्यैव ग्रहणं “सव्यञ्जनः सानुस्वारः शुद्धो वापि स्वरोऽक्षरम्” इत्यादिभाष्यवचनात् । वैदिकछन्दांसि प्राधान्येन सप्त । तानि यथा गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्ति, त्रिष्टुप्, जगती च । एतानि छन्दांसि चतुस्संख्याभिः उत्तरोत्तरम् एधमानानि । इदञ्च आम्नातम् अथर्ववेदसंहितायाम् –“सप्त छन्दांसि चतुरुराण्यन्यो अन्यस्मिन्नध्यर्पितानि”।[५८] इति। सम्प्रति उपलभ्यमानेषु छन्दोग्रन्थेषु पिङ्गलाचार्यकृतं छन्दःसूत्रमेव प्राचीनतमं वेदाङ्गत्वेन स्वीकृतञ्च । न केवलमत्र वैदिकछन्दसामेव विवरणमपि तु लौकिकछन्दसामपि विशदुपदेशोऽत्र उपलभ्यते ।

---

[५४]अनुक्रमणिकाभाष्यम्

[५५]नि. १/१/१

[५६] तदेव ७/३/१२

[५७]कात्यायनसर्वानुक्रमणी 2/6

[५८] अ. वे. सं. (शौनकीया) ८/९/१९

पिङ्गलसूत्रमिदम् अष्टभिरध्यायैः उपनिबद्धम् । अन्ये अपि बहवः छन्दोग्रन्थाः उपलभ्यन्ते । केदारभट्टस्य *वृत्तरत्नाकरः*, क्षेमेन्द्रस्य *सुवृत्ततिलकः*, हेमचन्द्रस्य *छन्दोऽनुशासनम्* इत्यादयः। विद्वद्वरेण गङ्गादासेन *छन्दोमञ्जरी*नाम्ना एकोऽपरोऽपि ग्रन्थः विद्वद्भिः समादृतो भवति। ग्रन्थेऽस्मिन् षट् स्तवकाः सन्ति ।

षष्ठः वेदाङ्गो हि ज्योतिषम् । वेदपुरुषस्य नेत्रत्वेन अङ्गीकृतं वेदाङ्गमिदं कालविज्ञापकं शास्त्रम् । सुमुहूर्तमनुरुध्य क्रियमाणाः वेदप्रतिपादिताः यज्ञादिक्रियाविशेषाः फलाय कल्पन्ते न तु यदृच्छया सम्पाद्यमानाः। तन्मुहूर्तज्ञानञ्च ज्योतिषं विना न सम्भवति । तस्मादेव ज्योतिषस्य वेदाङ्गत्वम् अङ्गीकृतम् ऋषिभिः। चतुर्णां वेदानां भिन्नं ज्योतिषशास्त्रमुपलभ्यते । *ऋग्वेदस्य* ज्योतिषशास्त्रम् ऋग्ज्योतिषम्, *यजुर्वेदस्य* याजुष्ज्योतिषम्, *अथर्ववेदस्य* अथर्वज्योतिषम् । *सामवेदस्य* ज्योतिष्शास्त्रं नोपलभ्यते । अमावस्यातिथौ पूर्णिमातिथौ च दर्शपूर्णमासयागः क्रियते । वसन्ते ब्राह्मणोऽग्नीनादधीत, ग्रीष्मे राजन्यः, शरदि वैश्यः इत्यादिश्रुतिवचनानुसारम् एकैकस्य आधानं भिन्नकालिकं निर्दिष्टम् । अतः वेदप्रतिपादितयज्ञानुष्ठानाय ऋतुतिथ्यादीनां ज्ञानार्थं ज्योतिषज्ञानम् आवश्यकम्। वेदपरवर्तिनि काले बहवः लब्धकीर्तयः ज्योतिषाचार्याः आविर्भूताः सन्ति। तेषु केचित् यथा *वृहज्जातक-वृहत्संहिता*दिग्रन्थानां प्रणेता वराहमिहिरः, *आर्यसिद्धान्त*प्रणेता आर्यभट्टः, *ब्रह्मस्फूटसिद्धान्त*प्रणेता ब्रह्मगुप्तः, सिद्धान्तशिरोमणिकर्ता भास्कराचार्यः।

### **१.६ साहित्यपर्यालोचना (Literature Review.)**

‘Research’ इति आङ्गलशब्दस्य संस्कृतपर्यायो वर्तते ‘गवेषणा’। कस्यचिद् गवेषणाकर्मणः मुख्यमुद्देश्यं वर्तते तद्विषये सुसंबद्धानुशीलनेन तथ्यानुसन्धानेन च विशिष्टतत्त्वे विशिष्टसत्ये वा उपनीतार्हता । गवेषणायां प्राप्तानां तथ्यानां माध्यमेन तद्विषयोपगमनाय बहुधाः विशिष्टाः प्रक्रियाः वर्तन्ते । तासु प्रक्रियासु ‘Literature Review’ नाम साहित्यपर्यालोचना

अन्यतमा । साहित्यपर्यालोचनायां प्रायेण गवेषणोपलब्धा ग्रन्थास्तेषां प्रासङ्गितका चालोच्यते । 'ऋग्वेदस्य व्याख्यातृत्वेन पदपाठकारः शाकल्यः' इति विषयमादाय गवेषणानिमित्तं बहवः सहायका ग्रन्था अपेक्षिताः। तेषु श्रीमद्रशिष्ठनारायणझामहाभागैर्विरचितः *A Linguistic Analysis of the Ṛgveda-Padapātha* इत्याख्यो ग्रन्थो अन्यतमः । ग्रन्थेऽस्मिन् भागद्वयं वर्तते। तत्र प्रथमे भागे उपोद्घातः, पदपाठसमुद्भवः, ऋग्वेदस्य पदपाठकर्तुः परिचयः, अन्येषां वेदानाञ्च पदपाठपरिचयः, पदपाठे सन्धिः, पाणिनिः शाकल्यश्च इत्यादयो विषयाः आलोचिताः। ग्रन्थस्यास्य द्वितीयार्द्धे पदपाठे प्रयुक्ताः पदविभागनियमाः, समासप्रदर्शननियमाः, तेषां भाषातात्त्विकं विश्लेषणम्, इतिकरणम्, द्विरुक्तमित्यादयो विषयाः आलोचिताः। तदनन्तरं श्रीमद्विश्वनाथवामनदेवविरचितः भाग्यलतापाटसकरेण सम्पादितः *वैदिकं पदविज्ञानम्* इति ग्रन्थः आलोचनीयः। ग्रन्थकृतात्र वेदपरिचयः, ऋग्वेदीयपदपाठस्य तथा अन्येषां पदपाठानाञ्च कर्तृत्वसमयादिविचारः, पदपाठे स्वरविकृतिः, पदपाठे ळकारादिविशिष्टवर्णानामुच्चारणपद्धतिः, ऋग्वेदीयपदेभ्यः सामपदपाठस्य तथा यजुर्वेदीयपदपाठस्य वैशिष्ट्यम्, वेदविकृतीनां लोकोपकारकत्वम्, वेदाक्षररक्षणे विकृतीनां योगः इत्यादयो विषयाः आलोचिताः। तदनन्तरं वेदविदुषा युधिष्ठिरमीमांसकेन सम्पादितः *माध्यन्दिनसंहितायाः पदपाठः* इत्याख्यो ग्रन्थः उल्लेखार्हः। ग्रन्थेऽस्मिन् युधिष्ठिरमीमांसकमहाभागेन पदपाठानां तुलनात्मकालोचना विहिता। तदनन्तरमनेनैव विदुषा विरचितः *वैदिकस्वरमीमांसा* इत्याख्यो ग्रन्थः दर्शनपथमायाति। यद्यपि ग्रन्थोऽयं प्राधान्येन स्वरविधिविषयकस्तथाप्यत्र प्रसङ्गेन पदपाठविषयिणी आचोचना विदुषां दृष्टिं नन्दयति । तदनन्तरं शशीतिवारीविरचितः *वेदव्याख्यापद्धतयः* इत्याख्यो ग्रन्थ उल्लेखयोग्यः। अत्र प्राधान्येन वेदमन्त्रव्याख्याने विद्यमानाः विविधाः पद्धतयः, प्राचीनाः वेदभाष्यकाराः, अर्वाचीनाः वेदभाष्यकाराः, पाश्चात्त्ये वेदानुशीलनमित्यादयो विषयाः

समुपवर्णिताः। एतान् विहाय अन्ये बहवः ग्रन्थाः सहायकत्वेन मयाङ्गीकृतास्तेभ्यः विशेषरूपेण साहाय्यं चोपलब्धम्।

### १.७ गवेषणावकाशः (Research Gap)

ऋग्वेदस्य प्राचीनसाहित्यिकनिदर्शनत्वेन स्वीकृतित्वादस्य पदपाठस्य विद्वत्समाजे विशेषतः वैयाकरणनिकाये विशेषः समादरो वर्तते। एतादृशे महत्वेऽपि गवेषकसम्प्रदाये पदपाठस्य तथा समादरो न परिलक्ष्यते। ऋग्वेदस्य पदपाठं पर्यालोच्य तस्य भाषातात्त्विकदृष्ट्या तस्य विश्लेषणात्मकं कार्यं प्रथमतः वशिष्ठनारायणझामहाभागनैव विहितम्। कार्यमिदं वशिष्ठनारायणझामहाभागेन १९७४ ख्रिस्टाब्दे स्वस्य विद्यावारिधिरित्युपाधिलाभाय पुणेविश्वविद्यालये समर्पितम्। परन्तु पुस्तकरूपेण १९९२ ख्रिस्टाब्दे प्राप्यते। अस्मादेव ग्रन्थात् काशीनाथ-अभ्यङ्कर-शास्त्रिणः पदपाठसम्बन्धी प्रबन्धः प्रकाशितः इति ज्ञायते। परन्तु तत्र तादृशं समीक्षणं नास्तीति ज्ञायते। २०१३ ख्रिस्टाब्दे प्रकाशिते *वैदिकपदविज्ञानाख्ये* ग्रन्थे प्रायेण पदपाठानां तुलनात्मकमध्ययनं परिलक्ष्यते। निगुढार्थानां वैदिकमन्त्राणां दुर्ज्ञेयत्वं विद्वत्समाजे विदितमेव । वेदभाष्यैर्विना प्रकृतो वेदार्थः अस्माभिर्न ज्ञातुं शक्यते। पदपाठः क्रमपाठः विकृतिपाठाश्च यद्यपि वेदमन्त्राणां यथार्थतया संरक्षणाय प्रवृत्ता परन्तु पदपाठे एव प्रथमतः संहितागतमन्त्राणां पदविभागः प्राप्यते । यथार्तया पदविभागाभावे तु मन्त्रार्थो दुर्निर्णेय एव । उपर्युक्तेषु सर्वेष्वेव ग्रन्थेषु यद्यपि पदपाठस्य विविधाः दिशः आलोचिताः परन्तु पदपाठकर्तुः वेदव्याख्यातृत्वं केनापि न विचारितम्। यद्यपि वशिष्ठनारायणझामहाभागेन स्वकीयग्रन्थस्य भूमिकांशे ऋग्वेदस्य पदपाठकर्तुः द्विविधमुद्देश्यं वेदरक्षणं वेदव्याख्यानञ्चेति[५९] उक्तं परन्तु तेन स्वकीये ग्रन्थे पदपाठकर्तुः वेदव्याख्यातृत्वं कुत्रापि न विश्लेषितम्। विषयोऽयं तु तत्र

[५९] The Pp served two purposes. First, it established the base for preserving the Vedas, and, secondly, consequently, it served to clarify the meaning of the Vedic mantras.

उल्लेखमात्रेण पर्यवसितः। वेदव्याख्यातृरूपेण पदपाठकारं शाकल्यमादाय कोऽपि गवेषणाप्रबन्धः दृक्पथं नायाति इत्यस्मात् कारणात् *ऋग्वेदस्य व्याख्यातृत्वेन पदपाठकारः शाकल्यः* इति विषयः तत्त्वावधायकमहाभागसम्मतिक्रमेण मया शोधप्रबन्धस्य विषयरूपेण निर्धारितः।

## १.८ उद्देश्यं प्रयोजनञ्च (Importance and Scope)

मया प्रबन्धेऽस्मिन् वेदस्य अर्थव्याख्याने तथा व्याख्यातृषु मतभेदे सति कथं शाकल्य एव प्रथमः शरणमिति भाष्याणि उद्धृत्य पदविश्लेषणपूर्वकञ्च युक्त्या प्रतिपादनप्रयासः विहितः। अत्रावधेयं यद्यपि इदानीं सर्वानि वेदभाष्याणि दृष्ट्वा मन्यते भाष्येणैव सर्वं ज्ञातुं शक्यते उत पाणिनीयव्याकरणस्य स्वरविधिं दृष्ट्वा स्वरसन्दिग्धस्थलेषु प्रकृतमन्त्रार्थः ज्ञातुं शक्यते परन्तु तथा न। इदमत्र ज्ञातव्यं यत् शाकल्यस्तु पाणिनेः अपि पूर्ववर्ती तस्मात् शाकल्येन यत् कृतं तत्तु पाणिनिमपि स्वरविधिविरचने लोपादिसूत्रप्रवर्तने साहाय्यं व्यदधत्। यद्यपि महर्षेः शाकल्यस्य नाम वेदस्य पदपाठकर्तृरूपेण सर्वत्र प्राप्यते परन्तु कुत्रापि वेदभाष्यकाररूपेण तस्य गणना नोपलभ्यते। अतः अनेन शाकल्यस्य वेदव्याख्यातृत्वेन गणना कर्तव्या, यतो हि प्रायेण सर्वत्र भाष्यरचनायां भाष्यकाराणां स एव प्रथमः शरणम्। न केवलं व्याख्यातृत्वेन अपि तु ऋग्वेदस्य आदिमो व्याख्याकारो भाष्यकारो वा शाकल्य एव इत्यपि न अत्युक्तिर्भवति। अनेन कार्येण वैदिकव्याख्यापद्धतेरालोचनायां तथा वेदव्याख्यातृषु पदपाठकृतः शाकल्यस्यापि सगौरवं गणना भविष्यति। अपि च परवर्तिनि काले ऋग्वेदीयपदपाठस्य शाकल्यस्य वा माहात्म्यमादाय यदा गवेषकैः कार्याणि करिष्यन्ते तदेदं प्रस्तुतं कार्यं सहायकं भवति।

## १.९ गवेषणाप्रकल्पः गवेषणापद्धतिश्च (Hypothesis and Methodology)

ऋग्वेदस्य पदपाठप्रवक्तृत्वेन महर्षेः शाकल्यस्य प्रसिद्धिः सर्वजनविदितैव। कुत्रचित् कुत्रचित् तस्य वैयाकरणरूपेणापि उल्लेखः प्रतिपादितः। परन्तु वेदव्याख्यातृत्वेन कुत्रापि शाकल्यो युक्त्या न प्रतिपादितः। अस्मिन् शोधप्रबन्धे महर्षेः शाकल्यस्य वेदव्याख्यातृत्वप्रतिपादनाय प्रयासो विधास्यते। वर्णनामूलकविश्लेषणपद्धत्या (Descriptive analysis) शोधकार्यमिदं मया करिष्यते । शोधकार्यमिदं मया षट्सु अध्यायेषु विभज्य करिष्यते । तत्र

प्रथमाध्यायो – उपोद्घातः ।

द्वितीयाध्यायः - श्रुतेः व्याख्यानपरम्परा पदपाठकारः शाकल्यश्च ।

तृतीयाध्यायः - पदविभागेन मन्त्रार्थज्ञापनम् ।

चतुर्थाध्यायः - अवग्रहेतिकरणाभ्यां प्रकृतमन्त्रार्थज्ञापनम् ।

पञ्चमाध्यायः - पदपाठेन शाकल्यस्य वैयाकरणत्वसिद्धिः ।

षष्ठः अध्यायः – उपसंहारः ।

सर्वे च अध्यायाः कतिपयेषु उपाध्यायेषु विभक्ष्यन्ते । प्रत्येकमध्यायान्ते अध्यायसाररूपेण अध्यायस्य विशिष्टत्वं विधास्यते । प्रबन्धोऽयं मया संस्कृतभाषां तथा देवनागरीलिपिमाश्रित्य करिष्यते। तत्र वर्णाः कोकिलाफन्ट इत्याधारीकृत्य मुद्रिता भविष्यन्ति, अक्षरपरिमितिश्च भविष्यति अष्टादश । प्रबन्धेऽस्मिन् ग्रन्थनामानि वक्रलेखेन (Italics) भविष्यन्ति, प्रतिपृष्ठं पादटीका प्रदास्यते, प्रबन्धस्यास्य सूचीपत्रात् परं संकेतसूची प्रदास्यते यत्र पादटीकास्थानां संकेतशब्दानां पूर्णरूपाणि भविष्यन्ति । उपसंहारात् परं अकारादिक्रमेण

शोधप्रबन्धस्थितमन्त्रसूची शोधप्रबन्धस्थितपारिभाषिकशब्दसूची, शोधप्रबन्धे व्यवहृतानां पाणिनीयसूत्राणां सूची च प्रदास्यन्ते। प्रबन्धान्ते निर्वाचितग्रन्थपञ्जिरपि प्रदास्यते, ग्रन्थपञ्जिलेखने एम.एल.ए -रीतिः अनुसृता भविष्यति (M.L.A. Eighth edition.)। ग्रन्थपञ्जिः त्रिधा विभज्य करिष्यते, आदौ सर्वे संस्कृतग्रन्थाः हिन्दीग्रन्थाश्च, ततः आङ्गलग्रन्थाः ततश्च वङ्गीयग्रन्थाः भविष्यन्ति । ग्रन्थकर्तुः नाम्नि ज्ञाते आदौ ग्रन्थकर्तुः उपनाम ततः ग्रन्थकर्तुर्नाम ततः वक्रलेखेन ग्रन्थनाम तदनन्तरं सम्पादकनाम तदनन्तरं प्रकाशस्थानं ततः प्रकाशकनाम ततश्च प्रकाशकालः भविष्यति । येषां ग्रन्थानां ग्रन्थकर्ता नोपलभ्यते तत्र तु ग्रन्थनाम्नः आरभ्य पूर्वोक्तक्रमेण ग्रन्थपञ्जिः भविष्यति । ग्रन्थपञ्जिलेखने संस्कृतग्रन्थे आङ्गलनामानि यथा प्राप्तानि तथैव प्रदत्तानि । शोधप्रबन्धेऽस्मिन् ऋग्वेदस्य संहितापाठस्थाः मन्त्राः तथा पदपाठस्थाः मन्त्राः वैदिक-संशोधन-मण्डलात् प्रकाशितात् ऋग्वेदस्य संस्करणात् ग्रहीष्यन्ते । शोधकार्ये व्यवहृतं सायणभाष्यमपि अस्मादेव संस्करणाद् स्वीकरिष्यते । ऋग्वेदस्य स्कन्दस्वामिभाष्यम्, वेङ्कटमाधवभाष्यम्, मुद्गलीया वृत्तिश्च विश्वबन्धुसम्पादितात् विश्वेश्वरानन्दवैदिकशोधसंस्थानतः प्रकाशितात् ऋग्वेदस्य संस्करणात् ग्रहीष्यन्ते । शोधकार्यार्थं मया कलिकातानगरीस्था संस्कृतसाहित्यपरिषत्, गोलपार्क-रामकृष्ण-मिशन् इत्यस्य ग्रन्थागारः, यादवपुरविश्वविद्यालयस्य केन्द्रीयग्रन्थागारश्च व्यवहृता भविष्यन्ति। प्रयोजनानुसारेण अन्तर्जालस्यापि साहाय्यं ग्रहीष्यते । प्रबन्धेऽस्मिन् निरुक्तस्य यः क्रमः प्रदास्यते स तु मुकुन्दझाशर्मसम्पादितग्रन्थानुसारी भविष्यति। शोधप्रबन्धेऽस्मिन् पादटीकायां वैदिकमन्त्राणां यः क्रमः भविष्यति स तु मण्डलक्रमः, तत्र आदौ मण्डलसंख्या, ततः सूक्तसंख्या, तदनन्तरञ्च मन्त्रसंख्या प्रदास्यते । शोधप्रबन्धे पाणिनीयसूत्राणि श्रीशचन्द्रवसुमहाभागसम्पादितात् अष्टाध्यायीग्रन्थात् ग्रहीष्यन्ते ।

## २.१ संहितायामर्थपरिज्ञानम्

सकलवर्णाश्रमधर्माणां मूलभूतत्वात् निखिलज्ञानाधारत्वाच्च वेदमन्त्राणां दुरवगाहत्वं विद्वत्समाजे विदितमेव। दुरूहाणां वेदमन्त्राणां यथार्थार्थावगमाय समग्रे विश्वे बहवो मनीषिणः वेदस्य भाष्याणि विरचयामासुः रचयन्ति च। केचन समग्रवेदस्य , केचन कतिपयानां सूक्तानां, केचित् कतिपयानां मन्त्राणामेव भाष्यं विरचितवन्तः। इदानीं निगूढार्थानां वेदमन्त्राणां यथार्थतया अर्थपरिज्ञानाय यद्यपि बहुभिः विद्वद्भिः विरचितानि बहूनि भाष्याणि समुपलभ्यन्ते परन्त्वेतेषां निगूढार्थानां वेदमन्त्राणां व्याख्यानस्य आवश्यकता तु वैदिककाले एव ऋषिभिरनुभूता। तस्मादेव वेदमन्त्राणां व्याख्यानधारा वैदिककालादेव प्रारब्धा। इमे वेदाः ऋषिभिः आम्नाताः न तु विरचिता इति शास्त्रीयसिद्धान्तः। निरुक्तकृता यास्काचार्येणोच्यते – ‘ऋषीणां मन्त्रदृष्टयः मन्त्रदर्शनानि भवन्ति...मन्त्राणां द्रष्टारो भवन्ति न तु कर्तार इत्यभिप्रायः’[६०] इति। पराशरोपपुराणे उक्तम् - ‘न कश्चिद् वेदकर्तास्ति...[६१]’ इति। ऋषिभिराम्नातेषु वैदिकसंहितागतमन्त्रेष्वेव अर्थज्ञानस्य प्रशंसा दृश्यते। वैदिकसंहितायामेव वेदार्थज्ञानस्य अपरिहार्यता निर्दिष्टा। मन्त्रेषु निहितः प्रकृतः अर्थः एव ज्ञातव्य इति सूचितमृग्वेदीये वृहस्पतिदृष्टे ज्ञानसूक्ते –

“उ॒त त्व॒ः पश्य॒न्न द॑दर्श॒ वाच॑मु॒त त्वः॑ शृ॒ण्वन्न शृ॑णोत्येनाम्।

उ॒तो त्व॑स्मै त॒न्व॒ं॑१ वि स॑स्रे जा॒येव॒ पत्य॑ उश॒ती सु॒वासाः॑।।[६२]” इति।

अर्थज्ञानहीनस्य निन्दापूर्वकमर्थज्ञस्य प्रशंसायामृषिणोक्तं यत् यः प्रकृतवेदार्थं न जानाति स वेदगतां वाचं पश्यन् अपि न पश्यति शृण्वन्नपि निगूढमर्थं न जानाति, अपरतः योऽर्थज्ञानपूर्वकं

[६०] नि. ७/१/३ दुर्गवृत्तिः

[६१] प. सं. १/२१

[६२] ऋ. सं. १०/७१/४

यथार्थतया मन्त्रान् पठन्ति तस्य सविधे वेदमयी वाक् स्वयमेव गच्छति यथा जाया पत्ये गच्छति । अतः अनेन दृश्यते यत् संहिताकाले एव वैदिकमन्त्राणामर्थज्ञानस्य अपरिहार्यत्वमृषिभिरनुभूतम्। प्रकृतवेदार्थज्ञानस्य वेदव्याख्यानाधीनत्वात् वेदव्याख्यानस्य महनीयता वैदिककालेऽव ऋषिभिरनुभूतेति लभ्यते। अतः तदाप्रभृत्येव वेदस्य व्याख्यानधारा प्रारब्धा इति। सायणाचार्येणास्य मन्त्रस्य व्याख्यानरूपेणोच्यते – '...एकः पश्यन्नपि मनसा पर्यालोचयन्नपि वाचं न ददर्श दर्शनफलाभावान्न पश्यति। त्वः एकः शृण्वन् अपि एनां वाचं न शृणोति श्रवणफलाभावात्। इत्यनेनार्धेन अविद्वानभिहितः। तृतीयपादेन विदितवेदार्थमाह।...तद्वदेनां पश्यति शृणोति चेति विदितवेदार्थस्य प्रशंसा।'[६३] इति। अस्य मन्त्रस्य उल्लेखः यास्काचार्येणापि अर्थज्ञस्य प्रशंसावसरे कृतः। तत्र तेनोच्यते – 'अप्येकः पश्यन्न पश्यति वाचमपि च शृण्वन्न शृणोत्येनाम्। इत्यविद्वांसमाहार्धम्। अप्येकस्मै तनवं विसस्र इति। ...यथा स एनां पश्यति स शृणोतीत्यर्थज्ञप्रशंसा।'[६४] इति।

अपि चान्यत्रोक्तम् –

"ऋचो अक्षरे परमे व्योमन्यस्मिन् देवा अधि विश्वे निषेदुः।

यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते।।"[६५] इति।

अर्थात् यस्मिन् परमोत्कृष्टे व्योमवद् व्यापके अक्षररूपे परब्रह्मणि चत्वारो वेदाः, सर्वे देवाः संस्थिताः तं खलु यो न जानाति स पठितया अपि ऋचा वेदेन किं करिष्यति? नाम किमपि फलं न प्राप्नोति। यश्चास्य निहितार्थं ब्रह्माणं जानाति स धर्मार्थकाममोक्षरूपाणि सर्वाणि फलानि सम्यगाप्नोति।

---

[६३] ऋ. सं. १०/७१/४ सायणभाष्यम्

[६४] नि. १/६/१९

[६५] ऋ. सं १/१६४/३९

मन्त्रोऽयं श्रीमद्दयानन्देन स्वविरचितस्य *ऋग्वेदादिभाष्यभूमिका* इत्याख्यस्य ग्रन्थस्य पठनपाठनविषयाभिधेये अध्याये अर्थज्ञानमाहात्म्यप्रसङ्गे उद्धृतः। श्रीमद्दयानन्देन अस्य मन्त्रस्य व्याख्यानप्रसङ्गे उक्तम् - 'यस्मिन् विनाशरहिते परमोत्कृष्टे व्योमवद् व्यापके ब्रह्मणि चत्वारो वेदाः पर्य्यवसितार्थाः सन्ति। ऋगुपलक्षणं चतुर्णां वेदानां ग्रहणार्थम्। तत् किं ब्रह्मेति? उत्तराह- यस्मिन् विश्वेदेवाः सर्वे विद्वांसो मनुष्या इन्द्रियाणि च, सूर्यादयश्च सर्वे लोका अधिनिषेदुर्यदाधारेण निषण्णाः स्थितास्तद् ब्रह्म विज्ञेयम्। (यस्तं न वेद.) यः खलु तं न जानाति, सर्वोपकारकरणार्थायमीश्वराज्ञायां यथावन्न वर्तते, स पठितयाऽपि ऋचा वेदेन किं करिष्यति? नैवायं कदाचिद् वेदार्थविज्ञानजातं किमपि फलं न प्राप्नोतीत्यर्थः। (य इत्तद्विदुस्त इमे समासते) ये चैवं तद् ब्रह्म विदुस्त एव धर्मार्थकाममोक्षाख्यं फलं सम्यक् प्राप्नुवन्ति। तस्मात् सार्थकमेव वेदादीनामध्ययनं कर्तव्यम्'[६६] इति। मन्त्रोऽयं यास्काचार्येणापि स्वकीये निरुक्तग्रन्थे वाक्स्तुतिनिर्वचनप्रसङ्गे एव उल्लिखितः।

मन्त्रान्तर्भूतानां पदानां निहितार्थज्ञानस्य प्रशंसा ऋग्वेदस्य अपरत्रापि दृश्यते। ऋग्वेदस्य प्रथमे मण्डले एको मन्त्रो यथा –

"च॒त्वारि॒ वाक्परि॑मिता प॒दानि॒ तानि विदुर्ब्रा॑ह्म॒णा ये म॑नी॒षिणः॑।

गुहा॒ त्रीणि॒ निहि॑ता॒ नेङ्ग॑यन्ति तुरीय॑ं वा॒चो म॑नु॒ष्या॑ वदन्ति॥"[६७] इति।

अस्य मन्त्रस्य अर्थो बहुभिः विद्वद्भिः विविधैः प्रकारैः प्रतिपादितः। कृत्स्नायाः वाचः चत्वारि परिमितानि पदानि सन्ति। अत्र वाचः पदानां नाम्नि मतवैविध्यं वर्तते। यथा – याज्ञिकानां मतानुसारेण वाचः चत्वारि पदानि मन्त्रः, कल्पः, ब्राह्मणम्, लौकिकी च; नैरुक्तमतेन ऋक् साम यजुः व्यवहारिकी च; वैयाकरणानां मतेन परा पश्यन्ती मध्यमा वैखरी च। यद्यपि विषयेऽस्मिन्

[६६] ऋग्वेदादिभाष्यभूमिका, पृ. ३६५

[६७] ऋ. सं. १/१६४/४५

मतभेदो दृश्यते परन्तु सर्वेषामभिप्रायः एक एव यत् अज्ञा मनुष्याः केवलं वाचः चतुर्थमंशं वदन्ति। यथा याज्ञिकपक्षे लौकिकी, नैरुक्तपक्षे व्यवहारिकी, वैयाकरणपक्षे वैखरी च। परन्तु ये मनीषिणः अर्थज्ञा विद्वांसश्च तेषां सविधे तु वाचः चत्वारि रूपाणि प्रादुर्भवन्ति। अज्ञानां सविधे तु वाचः आद्यानि त्रीणि अज्ञानरूपायां गुहायाम् आबद्धाः सन्ति आत्मनो न प्रकाशयन्ति। महाभाष्ये व्याकरणस्य गौणप्रयोजनप्रसङ्गे प्रसङ्गेऽस्मिन् उत्थापिते तत्रैव व्याख्याकृता कैयटेनोक्तम् - 'अज्ञानमेव गुहा' इति। नागेशेन चोक्तम् – 'गुहा अज्ञानं हृदयादिरूपा च'[६८] इति।

ऋग्वेदसंहितायाः प्रथममण्डलस्यैको मन्त्रो यथा –

"न यं दिप्सन्ति दिप्सन्ति दिप्सवो न द्रुह्वाणो जनानाम्।

न देवमभिमातयः॥"[६९] इति।

अस्य मन्त्रस्य 'अभिमातयः' इति पदस्यार्थः तैत्तिरीयसंहितायामुपलभ्यते। तैत्तिरीयसंहितायामुच्यते - 'पाप्मा वा अभिमातिः'[७०] इति। अर्थात् अभिमातयो नाम पापाचारिणः इति तैत्तिरीसंहितायामेवोक्तम्। ऋग्वेदसंहितायाः अस्य मन्त्रस्य व्याख्यानकाले व्याख्याकृद्भिः पापाचारिणि अर्थे 'अभिमातय' इति पदं व्याख्यातम्। किञ्च सायणाचार्येण अस्य मन्त्रस्य भाष्यरचनायामिममेवार्थं प्रदर्श्य पुनः तैत्तिरीयसंहितायाः मन्त्रोऽयं प्रमाणत्वेनोदाहृतः। अथर्ववेदसंहितायां निर्वचनरूपेण मन्त्रगतपदानां व्याख्या परिलक्ष्यते। यथा- 'उदानिषुर्महीरिति तस्मादुदकमुच्यते'[७१] इति।

[६८] महा./ पस्पशा./ प्रदीपोद्यते

[६९] ऋ. सं. १/२५/१४

[७०] तै. सं. २/१/३/५

[७१] अ. वे. सं. ३/१३/४

अतोऽनेन दृश्यते यत् संहिताकाले एव ऋषिभिः वेदार्थज्ञानस्य महिमा स्वीकृतः। संहिताकालादेव वेदव्याख्यानस्य परम्परा सम्प्रदायेषु प्रचलितासीदित्यनुमीयते।

## २.२ ब्राह्मणेषु वेदार्थव्याख्या

ब्रह्मशब्दस्य विद्यमानेषु बहुषु अर्थेषु 'मन्त्रः' इति अन्यतमः। अमरकोषे उच्यते- 'वेदस्तत्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः'[७२] इति। शतपथब्राह्मणेऽपि उक्तम्- 'ब्रह्म वै मन्त्रः'[७३] इति। एवंप्रकारेण मन्त्रपर्याये वेदपर्याये वा ब्रह्मशब्दस्योल्लेखो बहुत्रोपलभ्यते। गायत्रीमन्त्रस्य प्रसङ्गे उच्यते – विश्वामित्रस्य ब्रह्मेदं रक्षति भारतं जनम् इति। इत्यत्रापि ब्रह्मेदं नाम मन्त्रोऽयमिति । ब्रह्मणः (मन्त्रस्य) व्याख्यानं ब्राह्मणमिति । अनेन वैदिकमन्त्राणां व्याख्यानोपस्थितकरणत्वात् ब्राह्मणग्रन्थानां ब्राह्मणमिति नामकरणम्। भट्टभास्करेणोच्यते - 'ब्राह्मणं नाम कर्मणस्तन्मन्त्राणाञ्च व्याख्यानग्रन्थः'[७४] इति। ड. भवानीप्रसादभट्टाचार्यमहाभागाः स्वकीये *स्कुल अफ वेदिक इन्टारप्रिटेशन् इस्टार्ण एण्ड ओयेस्टार्ण (School of Vedic Interpretation: Eastern and Western)* इत्याख्ये ग्रन्थे आहुः - 'Thus in a sense, the Brāhmaṇa literature makes an attempt at a ritualistic interpretation of the Vedic Mantra.'[७५] इति। संहिताब्राह्मणयोर्मिलित्वैव वेदः, तयोर्मध्ये प्रायेण संहितायां ये मन्त्राः समाम्नातास्तेषां यज्ञेषु प्रयोगः, विधिवाक्यानि प्राप्यन्ते। ब्राह्मणग्रन्थानां विषया दश – हेतुः, निर्वचनं, निन्दा, प्रशंसा, संशयः, विधिः, परक्रिया, पुराकल्पः, व्यवधारणकल्पना उपमानञ्च । पूर्वमीमांसादर्शनस्य भाष्यकृता शबरस्वामिना उच्यते –

---

[७२] अ. को. ३/११४

[७३] शत. ब्रा. ७/१/१/४

[७४] तैत्तिरीयसंहिताभाष्यम्, १/५/१

[७५] *School of Vedic Interpretation: Eastern and Western*, p-3.

"हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः।

पुराकल्पः परकृतिः व्यवधारणकल्पना।।

उपमानं दशैते तु विधयो ब्राह्मणस्य तु।।"[७६] इति।

आपस्तम्बेन यज्ञपरिभाषासूत्रे ब्राह्मणग्रन्थानां षड् विषया उल्लिखिताः। विधिः, अर्थवादः, निन्दा, प्रशंसा, परकृतिः, पुराकल्पश्च। ब्राह्मणलक्षणकथनावसरे तेनोच्यते - 'कर्मचोदना ब्राह्मणानि। ब्राह्मणशेषोऽर्थवादः। निन्दा प्रशंसा परकृतिः पुराकल्पश्च।'[७७] इति। 'आग्नावैष्णवं पुरोडाशं निर्वपन्ति दीक्षणीयायाम्'[७८] इत्यादिः विधायकं वाक्यं विधिः। विधायकस्य ब्राह्मणस्योपकारकमङ्गमर्थवादः। यथा- 'वायुर्वै क्षेपिष्ठा देवता'[७९]। 'यथातिथये प्रद्रुताय'[८०] इति निन्दा, 'यजमानमेव सुवर्गं लोकं गमयति'[८१] इति प्रशंसा। 'अग्निर्वा' इति 'वसवो वा' इति परकृतिः। 'आपो वा इदमग्रे सलिलमासीत्'[८२] इति पुराकल्पः। अत्रोल्लेख्यं यत् केषाञ्चिन्मतानुसारेण बहुपुरुषकर्तृकमाख्यानं पुराकल्पः, केषाञ्चिच्च अनिर्दिष्टकर्तृकमाख्यानं पुराकल्पः। मन्त्रब्राह्मणात्मकस्य वेदस्य संहिताभागे मन्त्रेषु प्राकृतिकदेवताः उद्दिश्य अप्राकृतिकदेवताश्चोद्दिश्य तत्तद् यज्ञेषु केवलं स्वाभाविकी स्तुतिः परिलक्ष्यते परन्तु ब्राह्मणकाले तेषां यज्ञानां सातिशयं परिवर्तनं परिवर्धनञ्च परिलक्ष्यते। ड. भवानीप्रसादभट्टाचार्य्यमहाभागेन स्वकीयग्रन्थे उक्तम् - 'There is a possibility that when the mantras were originally composed they were nothing but simple prayers to divine forces of nature or that they were only connected with

---

[७६] शा. भा. २/१८

[७७] आ. य. प. १/३४-३६

[७८] ऐ. ब्रा. १/१

[७९] तै. सं. २/१/१

[८०] तै. ब्रा. २/१/२

[८१] तदेव. १/६/३

[८२] शत. ब्रा. ११/१/६/१

some simple sacrificial ceremonies. But in the Brāhmaṇa period we come across a sea change in the religious outlook of the society.'[८३] इति। तत्र प्रत्येकं यज्ञमादाय सूक्ष्मातिसूक्ष्मतया वर्णनमुपलभ्यते। तेषामेव यज्ञानां विवरणावसरे निर्वचनादिमुखेन ब्राह्मणग्रन्थेषु संहितागतानां मन्त्राणां व्याख्यानमुपलभ्यते।

श्रीमद्दयानन्दसरस्वतीस्वामिना *ऋग्वेदादिभाष्यभूमिकायां* वेदस्य व्याख्यानग्रन्थरूपेण ब्राह्मणग्रन्था उपस्थापिताः। यतो हि संहितागतमन्त्रान् आधारीकृत्य ब्राह्मणेषु व्याख्यानमुपलभ्यते तस्माद् वेदव्याख्यारूपाणां ब्राह्मणग्रन्थानां पृथक् वेदत्वं नास्तीति दयानन्दसिद्धान्तः। अपि च महाभाष्यकृता पतञ्जलिना महाभाष्यस्य पश्पशाह्निके शब्दानुशासनस्य प्रतिज्ञाकाले 'केषां शब्दानाम्' इत्याकाङ्क्षायां वैदिकशब्दानामुदाहरणप्रसङ्गे चत्वारि वेदवाक्यानि उल्लिखितानि, किमपि ब्राह्मणवाक्यं तत्र तेन नोद्धृतम्। उक्तञ्च दयानन्देन – "ब्राह्मणानि तु वेदव्याख्यानान्येव सन्ति, नैव वेदाख्यानीति। कुतः 'इषे त्वोर्जे त्वेति' इत्यादीनि मन्त्रप्रतीकानि धृत्वा ब्राह्मणेषु वेदानां व्याख्यानकरणात्। अन्यच्च महाभाष्येऽपि 'केषां शब्दानाम्? लौकिकानां वैदिकानां च। तत्र लौकिकास्तावत् गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इति। वैदिकाः खल्वपि शन्नो देवीरभिष्टये। इषे त्वोर्जे त्वा। अग्निमीळे पुरोहितम्। अग्न आयाहि वीतय इति।' यदि ब्राह्मणग्रन्थानामपि वेदसंज्ञाभिष्टाभूत् तर्हि तेषामप्युदाहरणमदात्... "[८४]। इति।

न केवलं वेदार्थज्ञापकत्वेन वेदस्य व्याख्यानग्रन्थरूपेण ब्राह्मणग्रन्थानां प्रसिद्धिः, अपि च तान्येव ब्राह्मणवचनानि बहुत्र व्याख्याकृद्भिः भाष्यरचनाकाले प्रमाणत्वेनोदाहृतानि। ब्राह्मणग्रन्थेषु बहुत्र शब्दानां निर्वचनमर्थव्याख्यानञ्च परिलक्ष्यते। ऐतरेयब्राह्मणे

---

[८३] *School of Vedic Interpretation: Eastern and Western,* p-2.

[८४] ऋग्वेदादिभाष्यभूमिका, वेदसंज्ञाविचारः।

पूर्वपक्षमुपस्थाप्य सिद्धान्तरूपेण होतृशब्दस्य निर्वचनं तदर्थश्च प्रदर्श्यते। तत्र पूर्वपक्षरूपेणोच्यते यत् यतो हि अध्वर्युः आहुतिप्रदानस्य कर्ता तस्मात् कथं हु-धातुनिष्पन्नं होतृपदं याज्यानुवाक्ययोर्वक्तरि प्रयुज्यते - 'तदाहुर्यदन्यो जुहोत्यथ योऽनु चाह यजति। च कस्मात्तं होतेत्याचक्षत इति'[८५]। इति। अस्यैव पूर्वपक्षमतस्य सिद्धान्तत्वेन होतृशब्दस्य निर्वचनं तदर्थश्चोच्यते यत् –"यद्वाव स तत्र यथाभाजनं देवताममूमावहामूमावहेत्यावाहयति तदेव होतुर्होतृत्वं होता भवति इति।"[८६] इति। अर्थात् यस्मात् कारणात् याज्यानुवाक्ययोर्वक्ता यागे यथाभाजनं नाम यथास्थानं सर्वा देवताः आवाहयति अमूमग्निमावह, अमूं सोममावह इति तस्मादेव कारणात् याज्ञिकप्रसिद्धस्य होतुः तादृशं नाम । अत्र वह्-धातोः वैदिकप्रक्रियया होतृशब्दस्य निष्पत्तिः, न तु जुहोतेर्धातोः। अतः होमकर्तृत्वाभावेऽपि आवाहयितृत्वसद्भावात् याज्यानुवाक्ययोर्वक्तरि होतृत्वमुपपन्नमिति। होतृशब्दस्य अयमेवार्थः परवर्तिभिः व्याख्याकारैरपि स्वीकृतः। निरुक्तकृता यास्काचार्येण "अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म्। होतारं रत्नधातमम्"[८७] इति मन्त्रगतस्य होतृपदस्यार्थः प्रदर्शितः 'होतारं ह्वातारम्'[८८] इति।

अस्मिन्नेव ऐतरेयब्राह्मणे इष्टिशब्दस्य निर्वचनप्रसङ्गे आम्नातम् - "यज्ञो वै देवेभ्य उदक्रामत्तमिष्टिभिः प्रैषमैच्छन् यदिष्टिभिः प्रैषमैच्छंस्तदिष्टीनामिष्टित्वं तमन्वविन्दन् इति"।[८९] इति अर्थात् पुरा देवेभ्यो यज्ञः उत्क्रान्तवान् । देवाः तमुत्क्रान्तं यज्ञम् इष्टिभिः अन्वेष्टुम् ऐच्छन् । यस्माद् इष्टिभिरेव अन्वेष्टुमैच्छन् तस्मादेव इष्टिनामिष्टित्वम् । किञ्च इष्टिभिरन्विष्य तं यज्ञं देवाः लब्धवन्तश्च । अनेन निर्वचनेन ब्राह्मणेन प्रतिपादितं यत् इष्-धातोः इष्टिशब्दो निष्पन्नः, न तु यज्-धातोरिति ।

---

[८५] ऐ. ब्रा. १/२

[८६] तदेव

[८७] ऋ. सं. १/१/१

[८८] नि. ७/४/१५

[८९] ऐ. ब्रा. १/२

एवमेव प्रायणीयशब्दस्यार्थप्रसङ्गे ऐतरेयब्राह्मणे आम्नातं – 'स्वर्गं वा एतेन लोकमुपप्रयन्ति यत् प्रायणीयस्तत् प्रायणीयस्य प्रायणीयत्वम्'[९०] इति। अर्थात् यस्मात् प्रायणीयाख्यः कर्मविशेषः यजमानान् स्वर्गलोकं प्रापयन्ति गमयन्ति तदेव प्रायणीयस्य प्रायणीयत्वम् । प्र-पूर्वकाद् इण्-धातोः करणे अणीयरि प्रायणीयशब्दनिष्पत्तिः । एवंप्रकारेण नराशंसशब्दस्य निर्वचनप्रसङ्गे उच्यते –'प्रजा वै नरो वाक् शंसः।'[९१] सामशब्दस्यार्थप्रसङ्गे निर्वचनमुखेनाम्नातम् – 'यद्वै तत् सा चामश्च समभवतां तत् सामाभवत् तत् साम्नः सामत्वम्'[९२] इति। अर्थात् 'सा' नाम ऋक् 'अम' नाम गान्धारादयः स्वराः । अर्थात् गान्धारादिस्वरयोगेन ऋचः सामसंज्ञां लभन्ते । अस्मिन्नेव ब्राह्मणे ऋक्साम्नोः पारस्परिकसम्बन्धं सूचयितुं तयोर्मध्ये दाम्पत्यभावस्य कल्पना प्रदर्शिता । आम्नायते च तत्र – 'अमोऽहमस्मि सा त्वम्, सामाहमस्मि ऋक् त्वम्, द्यौरहं पृथिवी त्वम्, ताविह सम्भवाव प्रजामाजनयावहै'[९३] इति। जातवेदशब्देन अग्निरुच्यते, कथमग्निः जातवेदपदेनोच्यते इति जातवेदशब्दस्य निर्वचनं ब्राह्मणे आम्नातम्- 'जाता वै प्रजा अनेनाविदमिति यदब्रवीज्जाता वै प्रजा अनेनाविदमिति तज्जातवेदस्यमभवत्तज्जातवेदसो जातवेदस्त्वम्'[९४] इति। अर्थात् प्रजाः जाताः सत्यः अग्निना वित्तं लब्धवत्यः, यतो हि जाताः सत्यः अग्निनैव वित्तवत्यः अभवन् तस्मात् अग्निना जातवेदसः सम्बन्धः, तदेव जातवेदसो जातवेदस्त्वम् ।

न केवलं निर्वचनमुखेन शब्दार्थं प्रकाश्य ब्राह्मणग्रन्थाः मन्त्रव्याख्यानं कुर्वन्ति, अपि तु अर्थवादरूपिण्या आख्यायिकया सुस्पष्टतया मन्त्रार्थावबोधे साहाय्यं विदधति । बहुत्र ब्राह्मणवाक्यानि अस्पष्टानां मन्त्रगतपदानां सम्यगर्थबोधं कारयन्ति । ऋग्वेदसंहितायाः

[९०] ऐ. ब्रा. २/१

[९१] तदेव. ६/४

[९२] तदेव. १२/१२

[९३] तदेव. ४०/५

[९४] तदेव. १३/१२

प्रथममण्डले एको मन्त्रोऽस्ति – 'यज्ञं पृच्छाम्यवमं स तद्दूतो वि वोचति।...' इत्यस्मिन् मन्त्रे 'यज्ञम् अवमं पृच्छामि' इत्यन्वयेन अवमशब्दस्यार्थो न ज्ञायते। तदा ऐतरेयब्राह्मणवाक्यमादाय अस्य मन्त्रार्थः स्पष्टीभवति। ऐतरेयब्राह्मणे आम्नातम् - 'अग्निर्मुखं प्रथमो देवतानाम्'[९५] इति, 'अग्निर्वै देवानामवमः'[९६] इति च। इदमेव ब्राह्मणवचनमादाय भाष्यकृद्भिः – 'तमग्निं पृच्छामि' इत्येवंप्रकारेण मन्त्रार्थः प्रदर्शितः । एवंप्रकारेण बहुत्र ब्राह्मणवचनैः भाष्यकृतः यथार्थतया मन्त्रार्थं व्याख्यातवन्तः। ऋग्वेदीयप्रख्यातपुरुषसूक्तस्य 'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥'[९७] इति मन्त्रस्य व्याख्यानरूपम् ऐतरेयब्राह्मणे परिलक्ष्यते। ऐतरेयब्राह्मणे आम्नातम् - 'यज्ञेन यज्ञमयजन्त देवा इत्युत्तमया परिदधाति । यज्ञेन वै तद् देवा यज्ञमयजन्त यदग्निनाग्निमयजन्त । ते स्वर्गं लोकमायन्।' इति। अर्थात् मन्थनजातेनाग्निना अग्निदेवताम् अयजन्त देवाः। अतः देवाः यज्ञेन यज्ञमयजन्त, तेन यज्ञेन च स्वर्गलोकं प्राप्तवन्तः।

ब्राह्मणपरवर्तिनि आरण्यकसाहित्ये उपनिषदि च विविधप्रसङ्गे मन्त्रव्याख्यानं परिलक्ष्यते । ऋग्वेदीये ऐतरेयारण्यके पदपाठस्य स्वरूपं सूक्ष्मतया ऋषिणा समुपवर्णितम्। तत्राम्नातम् – "यद्धि सन्धिं विवर्त्तयति तन्निर्भुजस्य रूपमथ यच्छुद्धे अक्षरे अभिव्याहरति तत् प्रतृण्णस्याग्र उ एवोभयमन्तरेणोभयं व्याप्तं भवति"[९८] इति। सन्धिं विवर्तयति नाम यत्र विशेषेण सन्धिं सम्पाद्य पदोच्चारणं क्रियते स भवति संहितापाठः। यत्र तु द्वयोः पदयोर्मध्ये सन्धेः सावकाशेऽपि सन्धिं न विधाय पदानां पृथगुच्चारणं क्रियते स भवति पदपाठः।

---

[९५] ऐ. ब्रा. १/४

[९६] तदेव. १/१

[९७] ऋ. सं. १०/९०/१६

[९८] ऐ. आ. ३/१/३

अत एव परिलक्ष्यते यत् वैदिकसंहितायां यदर्थज्ञानं प्रशंसितं कुत्रचिच्च व्याख्यानमपि विहितं तस्य अर्थज्ञानस्य अर्थव्याख्यानस्य च परम्परा ब्राह्मणकाले ब्राह्मणोत्तरकाले च प्रचलिता वर्धिताश्च ।

## २.३ वेदाङ्गेषु वेदार्थप्रकाशनम्

अङ्ग्यन्ते ज्ञायन्ते वेदार्था एभिरिति वेदाङ्गानि इति वेदाङ्गलक्षणादेव तेषां वेदार्थप्रकाशकत्वमवगम्यते । वैदिकमन्त्राणां सम्यक्तया अर्थावबोधाय तेषां भाषापरिज्ञानाय च वेदाङ्गानामावश्यकता वर्तते । एतेषां साहाय्येन वेदार्थावबोधः सुकरो जायते । तस्मादेव वेदोपकारीणि इमानि षट् शास्त्राणि वेदाङ्गसमाख्यां भजन्ते । वस्तुतस्तु वैदिकमन्त्राणां यथार्थतया ज्ञानलाभाय शिक्षा कल्पः व्याकरणं निरुक्तं छन्दः ज्योतिषमिति षण्णां विषयाणां ज्ञानस्य अपरिहार्यता वर्तते ।

### २.३.१ वेदार्थावगमे शिक्षायाः प्रयोजनम्

वर्णस्वराद्युच्चारणप्रक्रिया यत्रोपदिष्टा दृश्यते सा भवति शिक्षा । तैत्तिरीयोपनिषदः शिक्षावल्ल्यां शिक्षायाः षट् विषया उल्लिखिताः – वर्णः, स्वरः, मात्रा, बलम्, साम, सन्तानञ्च । मन्त्रपाठस्य यत् फलं तत्तु शुद्धोच्चारणेनैव प्राप्यते । अशुद्धोच्चारणेन न केवलं फलस्याप्राप्तिर्दृश्यते अपि च तेन अनिष्टमपि जायते । अतः शुद्धोच्चारणाय शिक्षाग्रन्थानामपरिहार्यता विद्यते । वैदिकनिकाये कुत्रचित् कुत्रचित् पृथक् सम्प्रदाये पृथग्वर्णोपस्थितिः, पृथक्तया वर्णोच्चारणं प्रचलितमासीत् । तादृशं विशिष्टत्वं केवलं तत्तत्शिक्षाग्रन्थेष्वेव समुपलभ्यते, नान्यत्र। यथा ऋग्वेदीयशिक्षायां ळकारोपस्थितिः, तस्य विश्लेषणञ्च परिलक्ष्येते । शिक्षाग्रन्थाभावे तादृशवर्णानामुच्चारणमस्माभिः अज्ञातं स्यात् । कस्यचिद् वर्णस्योच्चारणे कति मात्रा अपेक्षिता इति शिक्षाशास्त्रेषु सम्यगुपवर्णिता, अवग्रहे

विरामः कतिमात्रात्मको भवेत्, विबृत्याः स्वरूपमित्यादयो विषया अपि तत्र अलोचिता दृश्यन्ते । शिक्षाग्रन्थेषु उदात्तादिस्वरविषये सुदीर्घा आलोचना परिलक्ष्यते। कस्यचित् शब्दस्य स्वरभेदे अर्थभेदः, स्वराणामर्थनियन्त्रणकारित्वमस्माभिर्ज्ञातमेव । अतः शिक्षाग्रन्थानां विद्यमानाभावे वैदिकसंहितायाः स्वरविषये स्पष्टं ज्ञानं नोपलभ्यते । वेदस्यापरं नाम श्रुतिः। आदौ श्रुत्वा श्रुत्वा एव कण्ठस्थीकरणेन वेदाः पूर्वाचार्यैः प्राप्यन्ते स्म । श्रुत्वा श्रुत्वा मननकाले वक्तुरुच्चारणं यथार्थं न भवेत् चेत् तदा मन्त्रस्य विकृतिः समापतेत् । तस्मात् उच्चारणकाले यथोचिता वृत्तिः यथार्थरुपेणावलम्बनीया। कुत्र द्रुता वृत्तिः प्रयोज्या, कुत्र मध्यमा, कुत्र च विलम्बिता इति शिक्षाशास्त्रेषु सम्यक् प्रतिपादितम् । एवं विविधोपायेन शिक्षाग्रन्थाः वेदार्थज्ञाने सहायका भवन्ति ।

### २.३.२ वेदार्थसिद्धये कल्पमाहात्म्यम्

वेदपुरुषस्य द्वितीयमङ्गं वर्तते कल्पः। कल्प्यते समर्थ्यते यज्ञयागादिप्रयोगा यस्मिन् तत् कल्पसूत्रम् । कल्पसूत्राणि मुख्यतया चतुर्धा विभज्यन्ते – श्रौतसूत्रम्, गृह्यसूत्रम्, धर्मसूत्रम्, शुल्वसूत्रञ्च । ब्राह्मणप्रतिपादितयज्ञानां वैशद्येन पर्यालोचनं भवति कल्पसूत्राणां मुख्यं प्रयोजनम् । श्रौतसूत्रेषु श्रौताग्नियज्ञानां कर्मकाण्डविषयाणां सम्यक् क्रमबद्धं वर्णनमुपलभ्यते । गृह्यसूत्रेषु पञ्चमहायज्ञादिगार्हस्थयज्ञानां विवरणम्, धर्मसूत्रेषु वर्णाश्रमधर्माणां कर्तव्याकर्तव्यविचारो वर्तते । शुल्वसूत्राणि ब्राह्मणप्रतिपादितयज्ञानां वेदिनिर्माणप्रकारं प्रतिपादयन्ति । एवंरीत्या मुख्यतया वेदार्थप्रयोगे कल्पवेदाङ्गस्य माहात्म्यं वर्तते ।

### २.३.३ वेदार्थज्ञाने व्याकरणावश्यकता

वेदपुरुषस्य मुखेनोपमितमिदं वेदाङ्गं षडङ्गेषु प्रधानत्वेन स्वीक्रियते । व्याकरणाद् विना अस्माभिः एकोऽपि मन्त्रो न ज्ञातुं शक्यते यथार्थतया । महाभाष्यकृता पतञ्जलिना

स्वकीयग्रन्थे व्याकरणस्य प्रधानप्रयोजनरूपेण वेदरक्षा उल्लिखिता। कस्यचित् सम्पूर्णमन्त्रस्य अर्थज्ञाने तदन्तर्भूतानां पदानामर्थज्ञानमावश्यकम् । कस्यचिदकस्यैव पदस्यार्थज्ञानं तन्निष्ठप्रकृतिप्रत्ययज्ञानसापेक्षम् । शब्दार्थज्ञाने अपेक्षितं प्रकृतिप्रत्ययज्ञानं केवलं व्याकरणेनैव सम्भवति । 'व्याक्रियन्ते व्युत्पाद्यन्ते प्रकृतिप्रत्ययभेदेन शब्दा अनेनेति व्याकरणम्' इति व्याकरणशब्दस्य व्युत्पत्त्या एव प्रतीयते अस्य शब्दस्वरूपप्रकाशकर्तृत्वम् । कस्यचित् शब्दस्य स्वरज्ञानं तस्य व्युत्पत्तिज्ञानसापेक्षम्, अतः व्याकरणेनैव यथार्थतया प्रकृतिप्रत्ययज्ञानात् स्वरो ज्ञातुं शक्यते । व्याकरणवेदाङ्गेन सन्धिः, कारकविभक्तिः, समासः, स्वरविधिः इत्यादयः सम्यक्तया ज्ञायते । किञ्च वैदिकमन्त्राणां भाषापरिज्ञानाय व्याकरणस्य आवश्यकता विद्यते । अर्वाचीनकाले वैदिकसंहितायां प्रयुक्ताः व्यत्ययनियमाः प्राधान्येन व्याकरणेनैव ज्ञातुं शक्यन्ते। किञ्च वैदिकमन्त्रा यदा यज्ञेषु प्रयुज्यन्ते तदा 'प्रकृतिवद्विकृतिः कार्या' इति नियमेन पदानां विभक्तिविपरिणामः क्रियते । तच्च विभक्तिविपरिणामो व्याकरणज्ञानं विना न सम्भवति । एवंप्रकारेण पदज्ञानाय समासज्ञानाय सन्धिज्ञानाय तथा स्वरपरिज्ञानाय वेदार्थावगमे तथा वेदार्थव्याख्याने व्याकरणवेदाङ्गस्य अपरिहार्यता विद्यते ।

### २.३.४ वेदार्थप्रतिपादने छन्दसो माहात्म्यम्

वेदपुरुषस्य पादत्वेनोपमितं छन्दोवेदाङ्गं षट्सु वेदाङ्गेषु अन्यतमम् । यथा कोऽपि पुरुषः पद्भ्यां विना कुत्रापि गन्तुमसमर्थः भवति तेनैव छन्दोभिर्विना वेदार्थज्ञानमसम्भवः। चतुर्णां वेदानां मध्ये आधिक्येन मन्त्राः छन्दोबद्धा दृश्यन्ते । तस्मात् छन्दोज्ञानं विना मन्त्रज्ञानं न सम्भवति । कस्यचिन्मन्त्रस्य ज्ञानाय आदौ तस्य ऋषेर्ज्ञानं तदनन्तरं तस्य छन्दोज्ञानं तदनन्तरं च दैवतज्ञानमावश्यकम् । आचार्यशौनकमतानुसारेण पुरा धनलाभेच्छया ऋषयः छन्दोभिः देवतानां सविधे गतवन्तस्तस्मात् ऋषिदैवतयोर्मध्ये छन्द उच्यते । तेन *वृहद्देवता*ग्रन्थे उक्तम् –

“अर्थेप्सवः खल्वृषयश्छन्दोभिर्देवताः पुरा । अभ्यधावन्निति छन्दो मध्ये त्वाहुर्महर्षयः॥”[९९] इति। किञ्च मन्त्रस्य ऋषिच्छन्दोदैवतज्ञानाभावे तस्य प्रत्यवायं ज्ञापयन् वृहद्देवताग्रन्थे उच्यते – “अविदित्वा ऋषिं छन्दो दैवतं योगमेव च । योऽध्यापयेज्जपेद्वापि पापीयाञ्जायते तु सः॥”[१००] इति। कस्यचित् अनादिष्टदेवताकमन्त्रस्य छन्दोज्ञानादनन्तरं भक्तिसाहचर्येण तस्य देवता अस्माभिर्ज्ञातुं शक्यते । छन्दोवेदाङ्गस्य प्रसिद्धो ग्रन्थो हि आचार्यपिङ्गलविरचितः ‘*छन्दःसूत्रम्*’ इति ग्रन्थः। अत्र सर्वेषां वैदिकछन्दसां सूक्ष्मतया वर्णनमुपलभ्यते। सर्वेषां छन्दसामक्षरसंख्या, कस्मिंश्चित् पादे अक्षराभावे पादपूरणव्यवस्था, छन्दसां अधिष्ठात्री देवता, छन्दसां वर्णः इत्यादयो विषया पिङ्गलाचार्येण सम्यगुपन्यस्ताः स्वविरचिते ग्रन्थे । मन्त्रज्ञानस्य छन्दोज्ञानाधीनत्वात् छन्दःशास्त्रं वेदार्थज्ञाने तथा वेदार्थप्रकाशे महत् स्थानमधिकुरुते ।

### २.३.५ वेदार्थसिद्धये ज्योतिषापेक्षा

प्राधान्येन वैदिककर्मकाण्डसम्पादनाय ज्योतिषवेदाङ्गस्य महत्वं वर्तते । श्रुतिविहितानि कर्माणि विशिष्टे मासि, विशिष्टे ऋतौ, विशिष्टायां तिथौ, विशिष्टे नक्षत्रे च अनुष्ठेयानि । ‘वसन्ते ब्राह्मणोऽग्नीनादधीत’ इत्यादेः अग्न्याधानविधेः अनुष्ठानमृतुज्ञानमपेक्षते । ‘दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत’ इति विध्यनुसारं दर्शपूर्णमासो यागोऽनुष्ठेयश्चेत् तदा दर्शतिथेः पूर्णमासतिथेः ज्ञानमावश्यकम् । अपि च विविधे मन्त्रे कालानुसारिणी वर्णना, ऋत्वनुसारिणी वर्णना चोपलभ्यते । तादृशानां मन्त्राणां यथार्थतया अर्थावबोधाय ज्योतिषशास्त्रस्य ज्ञानमावश्यकम् ।

---

[९९] वृ. दे. ८/१३७

[१००] तदेव. ८/१३६

### २.३.६ वेदार्थावबोधे निरुक्तमाहात्म्यम्

षट्सु वेदाङ्गेषु वेदपुरुषस्य श्रोत्रत्वेनोपमितं निरुक्तमन्यतमम् । निःशेषेण उच्यते इति निरुक्तम् । के उच्यते इत्याकाङ्क्षायां वैदिकशब्दाः लभ्यन्ते । सायणाचार्येण ऋग्वेदभाष्यभूमिकायां निरुक्तस्य लक्षणप्रसङ्गे उच्यते – "अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्"[१०१] इति। निरुक्तग्रन्थस्य रचयितास्ति यास्काचार्यः। पञ्चाध्यायविशिष्टं निघन्ट्वभिधेयं वैदिककोषमवलम्ब्य यास्काचार्येण द्वादशाध्यायी निरुक्तग्रन्थो विरचितः। निरुक्तस्य प्रयोजनकथनावसरे ग्रन्थकृता यास्काचार्येण स्वयमेवोद्घोषितं यत् वैदिकपदविभागज्ञानाय मन्त्रार्थज्ञानाय च निरुक्तस्यापरिहार्यता विद्यते । तेनोच्यते – "अथापीदमन्तरेण पदविभागो न विद्यते"[१०२] इति। "अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते"[१०३] इति च । निरुक्तस्यापरं नाम वर्तते निर्वचनशास्त्रम् । ग्रन्थेऽस्मिन् यास्काचार्येण वैदिकशब्दानामर्थानुसारि निर्वचनं प्रतिपादितम् । शब्दानां निर्वचनप्रदानावसरे बहुत्र तेन प्रसङ्गप्राप्तस्य समग्रमन्त्रस्यार्थः अपि प्रदर्शितः। षट्सु वेदाङ्गेषु निरुक्तग्रन्थे एव साक्षान्मन्त्राणां प्रतिपदव्यावृत्तिपूर्वकं व्याख्यानं विहितम् । अपराणि वेदाङ्गानि वेदार्थप्रकाशे सहायका भवन्ति, परन्तु निरुक्तवेदाङ्गं विविधप्रसङ्गेन साक्षात् मन्त्राणां व्याख्यानं करोति । निरुक्तग्रन्थे गोशब्दस्य निर्वचनप्रसङ्गे उच्यते - "गौरिति पृथिव्या नामधेयम् । गातेर्वौकारो नामकरणः। अथापि पशुनामेह भवत्येतस्मादेव।[१०४]" इति। प्रसङ्गेऽस्मिन् यास्काचार्येण गोशब्दस्योल्लेखविशिष्टमेकं मन्त्रांशमुदाहृत्योच्यते - "गोभिः श्रीणीत मत्सरमिति पयसः"[१०५] इति। अर्थादत्र दुग्धार्थे गोशब्दो वर्तते । अस्य मन्त्रांशस्य अर्थव्याख्यानपूर्वकं तेनोच्यते -

---

[१०१] सायणाचार्यविरचिता ऋग्वेदभाष्यभूमिका

[१०२] नि. १/६/१

[१०३] तदेव. १/५/१

[१०४] नि. २/२/१

[१०५] तदेव

"मत्सरः सोमो मन्दतेस्तृप्तिकर्मणः। मत्सर इति लोभनामाभिमत्त एनेन धनं भवति"[१०६] इति। निरुक्तग्रन्थस्य सप्तमाध्याये देवतानां भक्तिसाहचर्य्यालोचनावसरे अग्निपूष्णोः विभक्तस्तुतेः ऋगुदाहृता – "पूषा त्वेतश्च्यावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपाः। सत्वैतेभ्यः परिददत्पितृभ्योऽग्निर्देवेभ्यः सुविदत्रियेभ्यः॥"[१०७] इति । ऋचमिमामुदाहृत्य ततः अस्य व्याख्यानं प्रदर्शयति यास्काचार्यः – "पूषा त्वेत प्रच्यावयतु विद्वाननष्टपशुर्भुवनस्य गोपा इत्येष हि सर्वेषां भूतानां गोपायिताऽदित्यः।"[१०८] इति । यास्काचार्येण निरुक्तस्य द्वितीयाध्याये कायमानशब्दस्य निर्वचनप्रसङ्गे एको मन्त्र उदाहृतः – "कायमानो वना त्वं यन्मातृरजगन्नपः। न तत्ते अग्ने प्रमृषे निवर्तनं यद्दूरे सन्निहाभवः॥"[१०९] इति । अत्रापि यास्काचार्येण मन्त्रस्य भाष्यरूपेणोक्तम् - "कायमानश्चायमानः कामयमान इति वा । वनानि त्वं यन्मातृरपोऽगम उपशाम्यन् । न तत्ते अग्ने प्रमृष्यते निवर्तनं दूरे यत्सन्निह भवसि जायमानः"[११०] इति। "तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततं सञ्जभार । यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै "[१११] इति सूर्यसूक्तगतमन्त्रस्य व्याख्यानं यास्काचार्येणैवं प्रदर्शितम् - "तत्सूर्यस्य देवत्वं तन्महित्वं, मध्ये यत्कर्मणां क्रियमाणानां विततं संह्रियते । यदासावयुक्त, हरणानादित्यरश्मीन् हरितोऽश्वानिति वाऽथ रात्री वासस्तनुते सिमस्मै, वेसरमहरवयुवती सर्वस्मात्"[११२] इति । एवंप्रकारेण निरुक्तग्रन्थे ऋग्वेदसंहितायाः बह्वीनामृचां भाष्याणि परिलक्ष्यन्ते । अधुना यानि वेदभाष्याणि ग्रन्थरूपेण अस्माभिः प्राप्यन्ते तेषु प्राचीनतमं स्कन्दस्वामिभाष्यम् । तत्पूर्ववर्तिनि काले निरुक्तग्रन्थमतिरिच्य कोऽपि ग्रन्थो नोपलभ्यते यत्र मन्त्राणां प्रतिपदव्यावृत्तिपूर्वकं

---

[१०६] तदेव

[१०७] ऋ. सं. ७/६/२३

[१०८] नि. ७/३/२

[१०९] ऋ. सं. ३/१/५

[११०] नि. ४/२/१४

[१११] ऋ. सं. १/११५/४

[११२] नि. ४/२/११

निर्वचनप्रदानपूर्वकं तथा शब्दानां प्रकृतिप्रत्ययविभागपूर्वकं व्याख्यानं परिलक्ष्यते। परवर्तिभिः वेदभाष्यकारैः बहुत्र स्वमते दार्ढ्यस्थापनाय यास्काचार्यप्रदर्शितं निर्वचनं तथा मन्त्रव्याख्यानमनुसृतं समुद्धृतञ्च। "अस्मा इदु स्तोमं सं हिनोमि रथं न तत्सिनाय। गिरश्च गिर्वाहसे सुवृक्तीन्द्राय विश्वमिन्वं मेधिराय ॥"[११३] इति मन्त्रव्याख्यानप्रसङ्गे सायणाचार्येण 'सिन' इति शब्दस्यार्थः 'अन्नम्' इति प्रदर्शितम्। इत्यर्थप्रदर्शनादनन्तरं स्वमते दृढतास्थापने यास्काचार्यमतमुत्थापितम् – 'तत्सिनाय। सिनम् इति अन्ननाम। 'सिनमन्नं भवति सिनानि भूतानि' (निरु. ५.५) इति यास्कः। तेन रथेन सिनमन्नं यस्य स तथोक्तः।'[११४] इति। एवमृग्वेदसंहितायाः "बृहत्स्वश्चन्द्रममवद्यदुक्थ्य१मकृण्वत भियसा रोहणं दिवः। यन्मानुषप्रधना इन्द्रमूतयः स्वर्नृषाचो मरुतोऽमदन्ननु॥"[११५] इति मन्त्रस्य व्याख्यानप्रसङ्गे 'प्रधन' इति शब्दस्य 'संग्रामः' इत्यर्थः प्रदर्शितः। मन्त्रेऽस्मिन् संग्रामार्थप्रदर्शनाय सायणाचार्येण यास्काचार्यमतं समुद्धृत्य तेनोच्यते - 'यत् यदा मनुषप्रधनाः। प्रकीर्णान्यस्मिन्धनानि भवन्ति (नि. ९/२३) इति नैरुक्तव्युत्पत्त्या प्रधनमिति संग्रामनाम। मनुष्यहितसंग्रामाः...।'[११६] इति। न केवलं सायणाचार्येणापि तु स्कन्दस्वाम्यादिभिः अपरैः भाष्यकारैरपि बहुत्र मन्त्रव्याख्यानाय निरुक्तमुद्धृतम्।

यास्काचार्येण निर्वचनमुखेन केचन शब्दाः बहुषु अर्थेषु व्याख्याताः। किञ्च कस्मिन् मन्त्रे स शब्दः कस्मिन्नर्थे प्रयुक्त इत्यपि तेन बहुत्र प्रतिपादितम्। तस्मात् तत्तन्मन्त्राणां व्याख्यानकाले अर्थज्ञानकाले च स एव विशिष्टोऽर्थः स्वीक्रियते। न केवलं व्याकरणमादाय वेदार्थस्य यथार्थतया ज्ञानं लभ्यते, वेदार्थावबोधे तु निरुक्तमपरिहार्यमेव। निरुक्तग्रन्थे शब्दानां

---

[११३] ऋ. सं. १/६१/४
[११४] तदेव. सायणभाष्यम्
[११५] ऋ. सं. १/५२/९
[११६] तदेव. सायणभाष्यम्

निर्वचनकाले सर्वत्र समाना रीतिराश्रिता । परन्तु अर्थं परिलक्ष्य वर्णसादृश्येनापि कस्माच्चित् धातोः प्रत्ययाद्वा शब्दस्य व्युत्पत्तिः प्रदर्श्यते । तेन तस्मात् विशिष्टात् शब्दात् प्रकरणप्राप्तेन अर्थेन मन्त्रस्य प्रकृतोऽर्थो ज्ञायते। वेदार्थज्ञाने प्रकरणस्य आवश्यकतां परिलक्ष्य यास्काचार्येणोच्यते - 'न तु पृथक्त्वेन मन्त्रा निर्वक्तव्याः। प्रकरणश एव तु निर्वक्तव्याः।'[११७] इति। अतः प्रकरणमतिरिच्य वेदार्थो न कर्तव्यः। औचित्यानुसारेण तच्छब्दगतं धातुं प्रत्ययं स्वीकृत्य मन्त्रार्थः कर्तव्य इति यास्काचार्यसिद्धान्तः। यास्काचार्यविरचिते निरुक्तग्रन्थे केचन पूर्ववर्तिनो निरुक्तकारा उल्लिखिताः। विविधप्रसङ्गे यास्काचार्येण कुत्रचित् तेषां मतमङ्गीकृतं कुत्रचिच्च निराकृतम्। यद्यपि पूर्वाचार्याणां ग्रन्था नोपलभ्यन्ते परन्तु यास्काचार्यविरचितात् निरुक्तादेव प्रतीयते यत् यास्काचार्यात् प्रागेव नैरुक्तसम्प्रदायः प्रचलितः आसीत् । नैरुक्तसम्प्रदायानुसारेण अधियाज्ञिकपद्धत्या वेदस्य व्याख्यानधारा प्रचलिता आसीत् ।

## २.४ वेदार्थावगमे विविधाः सम्प्रदायाः

यास्काचार्यविरचितान्निरुक्तग्रन्थाद् नैरुक्तपरम्परामतिरिच्य वेदव्याख्यानकर्मणि प्रवृत्ताः केचन पूर्ववर्तिनः सम्प्रदायाः विविधप्रसङ्गे ज्ञायन्ते। यथा ऐतिहासिकसम्प्रदायः, पौराणिकसम्प्रदायः, याज्ञिकसम्प्रदायः, प्राजापत्यसम्प्रदायः, ब्रह्मसम्प्रदायः, नैदानसम्प्रदायः, परिव्राजकसम्प्रदायः प्रमुखाः। एतेषां वेदव्याख्यानानि यद्यपीदानीं नोपलभ्यन्ते परन्तु निरुक्तग्रन्थे तेषामुल्लेखः प्राप्यते । निरुक्तग्रन्थे "य ई॑ च॒कार॒ न सो अ॒स्य वे॑द॒ य ई॑ द॒दर्श॒ हिरु॒गिन्नु तस्मा॑त् । स मा॒तुर्योना॒ परि॑वीतो अ॒न्तर्ब॑हुप्र॒जा निर्ऋ॑ति॒मा वि॑वेश॥"[११८] इति मन्त्रस्य व्याख्यानावसरे मन्त्रस्यास्य बहुप्रजा इति शब्दमादाय तदानीन्तने परिब्राजकसम्प्रदाये योऽर्थः प्रचलितः आसीत् तदुल्लिख्य नैरुक्तसम्प्रदाये प्रचलितः अर्थोऽपि उल्लिखितः - "बहुप्रजाः कृच्छ्रमापद्यत इति

[११७] नि. १३/१/१२

[११८] ऋ. सं. १/१६४/३२

परिव्राजकाः, वर्षकर्मेति नैरुक्ताः।"[११९] इति। एवंप्रकारेण बहुत्र मन्त्रव्याख्यानकाले यास्काचार्येण नैरुक्तसम्प्रदाये प्रचलितं मन्त्रार्थं प्रतिपाद्य सम्प्रदायान्तरेष्वपि प्रचलितोऽर्थः प्रतिपादितः।

### २.५ वेदार्थप्रतिपादने मीमांसकसम्प्रदायः

मानेर्जिज्ञासायामिति धातोः सन्-प्रत्ययेन मीमांसाशब्दो निष्पन्नः । महर्षिजैमिनिप्रवर्तितं पूर्वमीमांसादर्शनं वाक्यार्थविचारशास्त्रमिति नाम्नाभिधीयते । मीमांसकमतानुसारेण वेदस्तु धर्मज्ञानस्य उपायभूतः, स च धर्मः यागादिरेव । मीमांसकमतानुसारेण यागानुष्ठाने एव वैदिकमन्त्राणां प्रासङ्गिकता। मीमांसकनये वेदो नित्यः, अपौरुषेयः स्वतःप्रमाणञ्च । मीमांसासूत्रस्य प्रणेता जैमिनिः यद्यपि अधियाज्ञिकपद्धतेः प्रवर्तकाचार्यः नासीत् परन्तु पूर्वमीमांसादर्शनेन वेदार्थव्याख्याने याज्ञिकपद्धतिः दृढत्वेन प्रतिष्ठिता। नास्तिकदर्शनसम्प्रदायैः वेदस्य अप्रामाण्यप्रतिपादने, भिन्नप्रकरणान्तर्गतवाक्यान् स्वविरोधिरूपेण प्रतिपाद्य वेदवाक्यानामानर्थक्यप्रतिपादने बहुधा प्रयासः विहितः । वाक्यार्थविचारापराभिधं मीमांसाशास्त्रं तेषु तेषु स्थलेषु युक्त्या स्वविरोधित्वं निराकृत्य वेदमन्त्राणामर्थवत्त्वं प्रतिपादितम् । मीमांसकाचार्यैः जनमनसि याज्ञिकमतं सुसंस्थाप्य अध्यात्मचिन्तोपयोगिनी सूक्ष्मा दृष्टिर्निवेशिता । तस्मात् मीमांसादर्शनेन जनमनांसि ऐहिकभावनाम् अतिरिच्य वेदमन्त्रेषु अन्तर्निहितां शक्तिं ज्ञातुं प्रवर्तितानि । याज्ञिकपद्धत्या वेदमन्त्राणामर्थं प्रकाश्य मीमांसकसम्प्रदायेन मन्त्रेषु अभिमानिदेवतावादः प्रकाशितः। मीमांसकसम्प्रदायेन यज्ञस्य प्रकृतरहस्यं उन्मुच्य यज्ञेषु देवतासु च विद्यमानायाः विशिष्टायाः शक्तेः धारणा प्रतिपादिता।

---

[११९] नि. २/२/८

## २.६ वेदार्थव्याख्याने पुराणेतिहासानुक्रमणीकानां माहात्म्यम्

वेदार्थव्याख्याने यथा वेदाङ्गानि अपरिहार्याणि तथैव अनुक्रमणिकाग्रन्थानां परिशिष्टग्रन्थानां च वेदार्थव्याख्याने अवदानं वर्तते। ऋषिच्छन्दोदैवतज्ञानं विना वेदः अधीयते अध्याप्यते चेत्तदध्ययनम् अध्यापनं वा अनर्थफलकं भवति । कस्यचिन्मन्त्रस्य ऋषिच्छन्दोदैवतज्ञानं अनुक्रमणिकाग्रन्थेभ्य एव प्राप्यते । परवर्तिनि काले वेदभाष्यकारैः मन्त्रव्याख्यानात् पूर्वं तन्मन्त्रस्य छन्दोदेवतानिर्देशाय अनुक्रमणिकाग्रन्थाः प्रमाणत्वेनोदाहृताः।

याज्ञवल्क्यस्मृतौ धर्मस्य चतुर्दशलक्षणप्रतिपादनावसरे तथा विद्यास्थानप्रतिपादनावसरे वेदाङ्गैः सह पुराणन्यायमीमांसाधर्मशास्त्राणि च समानवर्गे उल्लिखितानि। तेनोच्यते –

"पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः।

वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥"[१२०] इति।

वेदार्थावबोधाय न केवलं वेदाङ्गान्येव अपेक्षितानि अपि तु इतिहासः, पुराणं, न्यायशास्त्रं, धर्मशास्त्रं, मीमांसाशास्त्रमित्येतान्यपि यथार्थरूपेण वेदार्थावबोधे बहूपकुर्वन्ति । बहुत्र संहितागतमन्त्राणामस्पष्टतानिराकरणाय पुराणकथा इतिहासश्च आश्रीयेते । इतिहासपुराणयोर्वेदव्याख्याने अपरिहार्यतां प्रतिपादयता महाभारतकारेणोच्यते –

"इतिहासपुराणाभ्यां वेदं समुपवृंहयेत्।

बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरेदिति॥"[१२१] इति।

अर्थाद् यो मानवः इतिहासपुराणज्ञानहीनस्तस्माज्जनाद् वेदः सर्वदा विभेति अपव्याख्याभयात् । ऋग्वेदसंहितायाः बहुषु सूक्तेषु इन्द्रस्तुत्यवसरे वृत्रेण सह तस्य युद्धः वर्णितः। ननु कोऽयं वृत्र

---

[१२०] या. स्मृ. १/३

[१२१] महा. भा./आदि./ १/२६७

इत्याकाङ्खायां निरुक्तग्रन्थे उच्यते – "मेघ इति नैरुक्ताः। त्वाष्टोऽसुर इत्यैतिहासिकाः।"[१२२] इति। अर्थात् निरुक्तकाराणां मतानुसारेण वृत्रशब्दस्यार्थः मेघः परन्तु ऐतिहासिकसम्प्रदायानां मतानुसारेण वृत्रशब्दस्यार्थः असुरः। ऐतिहासिकमतानुसारेण यो वृत्रो मन्त्रेऽस्मिन् उच्यते स न केवलमसुरः अपि तु स त्वष्टुः पुत्रश्च । पुराणेषु इन्द्रो देवतानामधिपतिरूपेणोपवर्णितः, वृत्रश्च दानवानामसुराणां वा अधिपतिः। रणाङ्गने उभयोर्मध्ये महान् संग्रामो जातः, संग्रामे च इन्द्रो विजयी अभवत् । एवंप्रकारेण वृत्रस्योपाख्यानमैतिहासिकैस्तथा पुराणकारैर्वर्णितम् ।[१२३] संहितायां तथा उपनिषदि वर्णिता सृष्टिस्थितिलयादिविषयाः ब्राह्मपाद्मवैष्णवादिषु पुराणेष्वप्युल्लिखिता दृश्यन्ते । एवंप्रकारेण वेदोक्ताः बह्व्यः कथाः पुराणेषु इतिहासेषु च समुपवर्णिता वर्तन्ते । वेदस्य प्रकृतमर्थमुद्घाटयितुं पुराणानां तथा इतिहासस्य वर्णना उपयोगिनो वर्तन्ते । श्रीमद्भगवद्गीतायां तु सर्वासामुपनिषदां सारवत्त्वं प्रतिपादितम् । केषाञ्चनोपनिषद्गतमन्त्राणां अर्थस्पष्टीकरणाय श्रीमद्भगवद्गीता प्रमाणत्वेनाङ्गीक्रियते। तस्मादेव वेदाङ्गवत् वेदोत्तरकाले विरचितानां पुराणादीनां वेदार्थानुशीलनाय उपयोगित्वं वेदविद्भिः स्वीक्रियते।

## २.७ वेदव्याख्याने भारतीयपरम्परा

पुराकाले समुद्भूतस्य कस्यचिद् ग्रन्थस्य यथार्थतया अर्थप्रकाशः तदुत्तरकालीनैः जनैः बह्वायाससाध्यः। कस्यचिद् साधारणग्रन्थस्यैव एतादृशी व्यवस्था, दुरूहवेदमन्त्राणां का कथा। अतीव प्राचीनानामृषिदृष्टानां मन्त्राणामर्थज्ञानं तत्परवर्तिभ्यः जनेभ्यः कालक्रमेण अतीव दुरूहोऽभवत् । तस्मात् वैदिकमन्त्राणां व्याख्यानधारा प्रचलिता एव । निगूढार्था वेदमन्त्राः अनेकार्था भवन्ति । पुराकालतः अद्यावधिः विविधाभिः पद्धतिभिः वैदिकमन्त्राणां व्याख्यानं

[१२२] नि. २/५/१६
[१२३] भा. पु. ६/११-१२

कृतम् । कैश्चिद् याज्ञिकपद्धत्या, कैश्चिद् आध्यात्मिकपद्धत्या, कैश्चिच्च तुलनात्मकपद्धत्या वैदिकमन्त्राणां व्याख्यानं विहितम्। अधः प्रसिद्धाः ऋग्वेदीयभाष्यकाराः समासेनोल्लिख्यन्ते।

### २.७.१ याज्ञिकपक्षस्य प्रसिद्धा भाष्यकाराः

#### २.७.१.१ स्कन्दस्वामी

ऋग्वेदसंहितायाः प्राचीनः भाष्यकारोऽस्ति स्कन्दस्वामिमहाभागः। "स्कन्दस्वामी नारायण उद्गीथ इति ते क्रमात् । चक्रुस्सहैकमृग्भाष्यं पदवाक्यार्थगोरवम्॥" इति वेङ्कमाधववचनात् प्रतीयते यत् ऋग्वेदभाष्यरचनायां नारायणः उद्गीथश्च स्कन्दस्वामिनः सहायकौ आस्ताम्। स्कन्दस्वामिना ऋग्वेदस्य पञ्चमाष्टकपर्यन्तं भाष्यं चकार। स्कन्दस्वामिना स्वभाष्यस्य प्रारम्भे विघ्नविघाताय हेरम्बस्य स्तुतिर्विहिता । स्कन्दस्वामिना यज्ञपरकत्वेन मन्त्राणां व्याख्यानं कृतम् । तस्य याज्ञिकरीत्या मन्त्रव्याख्यानविषये आत्मानन्देनोच्यते - "स्कन्दादिव्याख्या अधियज्ञविषया एव, क्वचित्तु निरुक्तानुसारादधिदैवतविषया एव।" इति। स्कन्दस्वामिना मन्त्रव्याख्यानात् प्राक् सूक्तादौ ऋषिदेवते उल्लिखिते । मन्त्रव्याख्यानावसरे वहुत्र तेन निघण्टुः, सर्वानुक्रमणी, वृहद्देवता चोल्लिखिताः । तद्भाष्ये निरुक्तस्य प्रभावोऽपि परिलक्ष्यते । तेन 'एवा ह्यस्य सूनृता...'[१२४] इति मन्त्रस्य 'गोमती' इति शब्दव्याख्यानाय यास्काचार्यमतमुद्धृत्योच्यते – 'गोमती अथाप्यस्यां ताद्धितेन कृत्स्नवन्निगमा भवन्ति। इत्येवं पयोऽत्र गोशब्देनोच्यते'।[१२५] इति। कुत्रचित् कुत्रचित् तेन मन्त्रार्थप्रतिपादनाय ऐतिहासिकम् आख्यानमुद्धृतम् । 'इन्द्रो दीर्घाय चक्षस...'[१२६] इति मन्त्रव्याख्यानावसरे तेनोच्यते-

---

[१२४] ऋ. सं १/८/८

[१२५] तदेव. स्कन्दस्वामिभाष्यम्

[१२६] ऋ. सं. १/७/३

'अत्रेतिहासमाचक्षते।'[१२७] इति । स्कन्दस्वामिविरचितं भाष्यमतीव सरलममिताक्षरञ्च, येन वैदिकमन्त्राणामर्थः अस्माकं सविधे स्पष्टतया प्रतिभाति।

### २.७.१.२ नारायण उद्गीथश्च

स्कन्दस्वामिनः परवर्ति याज्ञिकपक्षस्य व्याख्याकारद्वयं वर्तते नारायणः उद्गीथश्च। इमौ भाष्यकारौ स्कन्दस्वामिनं भाष्यरचनायां साहाय्यं व्यदधदतामिति पूर्वमेवोक्तम् । ऋग्वेदस्य षष्ठाष्टकस्य सप्तमाष्टकस्य च नारायणभाष्यं समुपलभ्यते। उद्गीथेन च ऋग्वेदस्यान्तिमभागस्य व्याख्यानं विरचितम्। अस्यैव भाष्यस्य समाप्तितः ज्ञायते यदयं वनवासीनिवासी आसीत्। स्कन्दस्वामिवदनेनापि ऋषिदेवतयोरुल्लेखं विधायं मन्त्रव्याख्यानं कृतम्। अनेनाचार्येण बहुत्र स्वमतमुपस्थापनाय ब्राह्मणानि आरण्यकाणि उपनिषदश्च प्रमाणत्वेनोद्धृतानि।

### २.७.१.३ वेङ्कटमाधवः

वैदिकभाष्यकारेषु 'माधवः' इति नामधेयश्चत्वारो भाष्यकाराः समुपलभ्यन्ते। एकः सामवेदसंहितायाः भाष्यकारः माधवः अन्ये त्रयस्तु ऋग्वेदस्य – माधवभट्टः, वेङ्कटमाधवः, सायणमाधवश्च। ऋग्वेदसंहितायाः प्राचीनभाष्यकारेषु वेङ्कटमाधवोऽतिप्रसिद्धो वर्तते। तस्य भाष्यत एव ज्ञायते यत् तस्य पितासीत् वेङ्कटाचार्यः, माता च सुन्दरीदेवी। अस्य विदुषः पूर्वजाः दक्षिणभारतवर्षस्य चोलदेशे न्यवसन्। अस्य विदुषः सम्पूर्णम् ऋग्भाष्यं समुपलभ्यते। वेङ्कटमाधवानुसारेण यथार्थरूपेण ब्राह्मणग्रन्थानां ज्ञानाभावे वेदार्थज्ञानं न सम्भवति । तेनोच्यते –

[१२७] तदेव. स्कन्दस्वामिभाष्यम्

'अथ ब्राह्मणार्थानां विवेक्तारः कृतश्रमाः।

शब्दरीतिं विजानन्ति ते सर्वं कथयन्त्यपि॥' इति।

अनेन विदुषा अतीव संक्षिप्तरूपेण मन्त्रार्थो व्याख्यातः। भाष्यस्य संक्षिप्तीकरणाय अनेन केषाञ्चन सुखबोधानां पदानामर्थो न प्रदत्तः, कुत्रचिच्च मन्त्रगतं पदं नोल्लिख्य केवलं तस्यार्थः प्रतिपादितः।

### २.७.१.४ सायणाचार्यः

प्राचीनभारतीयवेदविद्वत्सु सायणाचार्यः मूर्धन्यो विद्वान् । अयञ्च विद्वान् "यज्ञो वै श्रेष्ठतमं कर्म"[१२८] इति मतमाधारीकृत्य याज्ञिकपद्धतिमाश्रित्य समग्रायाः ऋग्वेदसंहितायाः भाष्यं विरचितवान् । सायणाचार्यस्य पितासीत् मायणः, माता च श्रीमती देवी । सायणाचार्यस्य अग्रजः माधवाचार्यः, अनुजश्च भोगनाथः। सायणाचार्यः विजयनगरसंस्थापकस्य महाराजवुक्कस्य अमात्य आसीत् । तेनादौ यज्ञप्राधान्यत्वात् यजुर्वेदः ततश्च ऋग्वेदो व्याख्यातः। तेन ऋग्वेदभाष्यस्य भूमिकायामुच्यते – "आध्वर्यवस्य यज्ञेषु प्राधान्यात् व्याकृतः पुरा । यजुर्वेदोऽथ हौत्रार्थमृग्वेदो व्याकरिष्यते॥"[१२९] इति। अनेन विदुषा परम्पराप्राप्तं व्याख्यानमनुसृत्य मन्त्राणां भाष्यं विरचितम् । सायणाचार्यः एक एव भाष्यकारः येन चतुर्वेदभाष्यं विरचितम् । चतुर्वेदसंहितां विहाय सायणाचार्येण ब्राह्मणानाम् आरण्यकानां भाष्यमपि विरचितम् । सायणाचार्यविरचितस्य वेदभाष्यस्य नाम वेदार्थप्राकाशः, तस्य भाष्यस्य महत्त्वं यदत्र मन्त्रगतानां सर्वेषां पदानामन्वयपूर्वकम् अर्थं प्रदाय मन्त्रार्थो व्याख्यातः। तेन स्वल्पधीनां कृते अधुना वेदार्थज्ञानं सम्भवितम् । मन्त्रव्याख्यानात् पूर्वं तेन सर्वत्र सूक्तगतानां मन्त्राणां

---

[१२८] शत. ब्रा. १/७/१/५

[१२९] सायणाचार्यविरचिता ऋग्वेदभाष्यभूमिका

ऋषिच्छन्दोदेवताः प्रतिपादिताः, किञ्च अनुक्रमणिकानुसारेण श्रौतसूत्रानुसारेण मन्त्राणां यज्ञेषु विनियोगोऽपि तेन स्पष्टतया सूक्तादौ संकलितः। प्रसङ्गानुसारेण तेन ब्राह्मणवचनानि, आरण्यकवचनानि, उपनिषद्वचनानि च समुद्धृतानि । मन्त्रार्थप्रतिपादने सायणाचार्येण 'यद्वा' इत्युक्त्वा वैकल्पिकाः अर्थाः अपि प्रदर्शिताः । 'कालोऽश्व बहति...' इति मन्त्रस्य तु अश्वपरकं परमेश्वरपरकम् आदित्यपरकञ्च व्याख्यानं प्रदर्शितम् ।[१३०]

याज्ञिकपक्षस्य व्याख्याकारः सन्नपि सायणाचार्यः वेदव्याख्यानसमये मन्त्रगतप्रकृततात्पर्यं मनसि निधाय एव मन्त्रान् व्याख्यातवान् । तस्मात् दार्शनिकसूक्तेषु ऋषिभिः यत् सृष्टितत्त्वम् अद्वैततत्त्वं प्रतिपादितं तेषां मन्त्राणां सायणाचार्येण तथैव व्याख्या विहिता । नासदीयसूक्तगतस्य एकस्य मन्त्रस्य व्याख्यानावसरे तेनोच्यते – 'अग्रे सृष्टेः प्राक्प्रलयदशायां भूतभौतिकं सर्वं जगत् तमसा गूढं यथा नैशं तमः सर्वपदार्थजातमावृणोति तद्वत् आत्मतत्त्वस्यावरकत्वान्मायापरसंज्ञं भावरूपाज्ञानमत्र तम इत्युच्यते'[१३१] इति।

मन्त्रव्याख्यानादनन्तरं तेन मन्त्रगतपदानां वैयाकरणदिशा साधुत्वं विचारितम्, व्याकरणानुसारिणी स्वरप्रक्रियापि तेन स्वभाष्ये निबद्धा । तस्मात् सायणाचार्यभाष्यात् वैदिकव्याकरणज्ञानं वैदिकस्वरज्ञानञ्चातिसुखकरतया भवति । सायणाचार्यकृतवेदभाष्यस्यापरं माहात्म्यं वर्तते भाष्यादौ विद्यमानः भूमिकांशः। ऋग्वेदसंहितायाः भाष्यभूमिकांशे सायणाचार्येण वेदोत्पत्तिः, वेदस्य लक्षणप्रमाणे, वेदाङ्गानि, मन्त्रानर्थक्यमित्यादिविषये या सारगर्भा आलोचना प्रदत्ता सा तु वेदस्य मर्मार्थपिपासूनां कृते

[१३०] अ. वे. सं १९/५३/१ सायणभाष्यम्

[१३१] ऋ. सं. १०/१२९/३ सायणभाष्यम्

महदुपकारं साधयति। किञ्च परवर्तिनि काले बहुभिः पाश्चात्त्यविद्वद्भिः मन्त्रार्थप्रतिपादनावसरे सायणाचार्यकृतभाष्यस्य माहात्म्यं स्वीकृतम्।

**२.७.१.५ मुद्गलः**

मुद्गलेन ऋग्वेदसंहितायाः सायणभाष्यानुसारिणी वृत्तिर्विरचिता। भाष्यादौ तेनोच्यते –

'आलोच्य पूर्वभाष्यं च बह्वृचस्य समन्ततः।

गहनं मन्यमानेन सुबोधेन समुद्धृतम्॥

नवनीतं यथा क्षीरात् सिकतायाश्च काञ्चनम्।

तथा समुद्धृतं सारं प्राणिनां बोधसिद्धये॥' इति।

परन्तु ऋग्वेदसंहितायाः सर्वेषां मन्त्राणां तद्विरचिता वृत्तिर्नोपलभ्यते।

**२.७.२ वेदार्थप्रकाशे अध्यात्मपद्धतिः**

आध्यात्मिकरीत्या वैदिकमन्त्राणां व्याख्या तु अतीव प्रचीना। निरुक्तकारो यास्काचार्यः अधिदैवतरीतेः व्याख्याकारः सन्नपि तद्ग्रन्थे बहुत्र अध्यात्मभावनाया उल्लेखः अस्माभिः प्राप्यते। तत्र तेनोक्तं – "महाभाग्याद्देवताया एक आत्मा बहुधा स्तूयते[१३२]" इति। अपि च निरुक्तग्रन्थे बहुत्र अध्यात्मसम्प्रदायः उल्लिखितः। ऋग्वेदे यद्यपि प्रथमतो बहूनां देवानां सत्ता प्रतीयते, परं तत्त्वान्वेषणे सति तेषां सर्वेषामेक एव अधिपतिरिति प्रतिभाति। ऋग्वेदसंहितायामेवास्य स्पष्टप्रतिपादनं वर्तते – 'एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं

---

[१३२] नि. ७/१/५

मातरिश्वानमाहुः।'[१३३] इति। वेदमन्त्रेषु एकस्या एव देवतायाः बहुविधानि रूपाणि समुद्भावितानि ऋषिभिः । वेदोऽस्ति आध्यात्मिकज्ञानस्यापूर्वो निधिः, अत एव आध्यात्मिकपद्धतिरेव वेदार्थव्याख्याने सर्वथा स्वीकरणीया इति अध्यात्मपक्षस्वीकर्तृणां विदुषां विचारः।

### **२.७.२.१ आनन्दतीर्थः**

अध्यात्मपक्षस्य प्राचीन आचार्योऽस्ति आनन्दतीर्थः। ऋग्वेदस्यायं भाष्यकारः 'मध्वाचार्यः' इति नाम्नापि अभिधीयते । आनन्दतीर्थः दक्षिणभारतस्य उडूपनगरस्य निवासी आसीत् । अस्य माता रेवती, गुरुश्च महात्मा अच्युततीर्थः। अनेन विदुषा ऋग्वेदसंहितायाः प्रथममण्डलस्य चत्वारिंशत् सूक्तानां भाष्यं विरचितम् । वैष्णवमतानुसारिणः आनन्दतीर्थस्य वेदव्याख्यानं भगवन्नारायणपरकम् ।

### **२.७.२.२ आत्मानन्दः**

आत्मानन्दः आध्यात्मिकदृष्ट्या केवलम् ऋग्वेदस्य अस्यवामीयसूक्तस्य व्याख्यानं विरचितम् । आत्मानन्देन स्वेनैव तस्य भाष्यादौ उक्तम् – 'स्कन्दादिव्याख्या अधियज्ञविषया एव क्वचित्तु निरुक्तानुसारादधिदैवतविषया एवेति निश्चित्य क्वचिदध्यात्मविषयां शौनकादिरीतिमाश्रित्याध्यात्मं व्याख्यास्यामः।'[१३४] इति। अस्यवामीयसूक्ते द्विपञ्चाशन्मन्त्राः सन्ति । प्राचीनभावानुसारेण तत्र विश्वदेवाः, आपः, शकधूमः, वाक्, सोमः, अग्निः, वायुः, सूर्यः इत्यादयो अनेके देवाः वर्णिताः। परन्तु आत्मानन्दमतानुसारेणात्र देवता एक एव, स च आत्मा इति । अतस्तेन अध्यात्मपक्षेनैव सर्वेषां मन्त्राणां व्याख्या विहिता ।

---

[१३३] ऋ. सं. १/१६४/४६

[१३४] ऋ. सं. १/१६४/१ आत्मानन्दभाष्यम्

### २.७.२.३ स्वामिदयानन्दसरस्वती

स्वामिदयानन्दसरस्वतिमहाभागः अध्यात्मपक्षस्य उल्लेखनीय आचार्योऽस्ति । स्वामिदयानन्दोऽस्ति आर्यसमाजस्य प्रतिष्ठाता । दयानन्देन यास्काचार्यस्य त्रिदेवतातत्त्वं याज्ञिकाचार्याणां बहुदेवतातत्त्वं च निराकृत्य सर्वेषां मन्त्राणां परमेश्वरपरत्वे व्याख्यानं विहितम्। अनेन भाष्यकृता ऋग्वेदस्य सप्तममण्डलस्य द्वितीयसूक्तस्य द्वितीयमन्त्रपर्यन्तं भाष्यं विरचितम् । वेदभाष्यमतिरिच्य ऋग्वेदादिभाष्यभूमिकाख्ये ग्रन्थे वेदविषयिण्यः सारगर्भाः विविधाः आलोचनाः विहिताः । अत्र च तेन वेदस्य संहिताभागस्य नित्यत्वे स्वीकृतेऽपि ब्राह्मणारण्यकोपनिषदां नित्यत्वं निराकृतं स्वयुक्त्या ।

एतान् भाष्यकारान् विहाय उत्तरकाले अन्येऽपि बहवः भाष्यकाराः वेदभाष्याणि विरचितवन्तः। धानुष्कयज्वा वेदत्रयस्य भाष्यं चकार इति ज्ञायते परन्तु तस्य भाष्यं नोपलभ्येत। निरुक्तग्रन्थस्य व्याखाकारो दुर्गाचार्यः निरुक्तवचनव्याख्यानावसरे अप्रत्यक्षतया वेदव्याख्यानं विहितम्। अर्वाचीनवेदव्याख्यातृषु दयानन्दसरस्वती अन्यतमः। तेन पारमात्मिकरीत्या ऋग्वेदस्य सप्तममण्डलपर्यन्तं भाष्यं विरचितम् । तत्परवर्तिनि कालेऽपि वेदविद्वद्भिः वेदव्याख्यानं क्रियते ।

## २.८ वेदार्थप्रतिपादने पाश्चात्त्यपरम्परा

विश्वसाहित्ये संस्कृतमादाय अधुना यः समादरो वर्तते तत्र तु पाश्चात्त्यपण्डितानामवदानमनस्वीकार्यम् । ख्रिष्टीयाष्टादशशतकस्यान्तिमे भागे स्यर् उइलियामजोन्समहाभागेन रयाल-एशियाटिक-सोसाइटि-अफ-वेङ्गल इति संस्थायाः स्थापनादनन्तरं तदानीन्तनविद्वद्भिः साहाय्येन संस्कृतग्रन्थानां भाषान्तरेषु अनुवादकार्यं प्रारब्धम्। तदनन्तरं पाश्चात्त्यदेशे संस्कृतसाहित्यविषये गवेषकाणां दृष्टिरपतत् । तदारभ्य

बहिर्भारते संस्कृताध्ययने संस्कृतशास्त्रार्थज्ञाने च पण्डितानां क्रमवर्धमान उत्साहः परिलक्ष्यते। संस्कृतसाहित्ये विशेषतः वैदिकसाहित्ये निहितं भारतीयसंस्कृतेर्मर्मार्थं प्रति ते आकृष्टाः अभवन् । समग्रे विश्वे वैदिकसाहित्ये अधुना यः समादरो वर्तते तत्र तु पाश्चात्त्यपण्डितानामवदानमतुलनीयं सर्वथा प्रशंसनीयञ्च।

### २.८.१ म्याक्समुलारमहाभागः

जर्मनदेशीयः म्याक्समुलारमहाभागः (Friedrich Max Muller) वेदानुवादसम्पादनाकर्मणि पाश्चात्त्यविद्वत्सु सर्वाग्रगण्यः। इङ्लण्डदेशे निवसन्नपि वेदादिशास्त्राध्ययने तस्य विशिष्टा रुचिरासीत्। वेदाध्ययने स्वीयं जीवनं समर्प्यानेन विदुषा बहवः महत्त्वपूर्णाः ग्रन्थाः प्रणीताः सम्पादिताश्च । आदौ तेन *ए-हिस्टोरि-अफ्-संस्कृत-लिटारेचार ( A History of Sanskrit Literature)* इत्याख्यं ग्रन्थं विरच्य भारतवर्षस्य सुललितमैतिह्यं व्यलिखत्। अनेन विदुषा सायणाचार्यभाष्यसमेता अखिला ऋग्वेदसंहिता चतुर्भिः भागैः प्रथमं सम्पादिता, या वेदानुसन्धानकर्मणि गवेषकैः विशेषेणाद्यपि समाद्रिता भवति। अस्य विदुषः निर्देशेन प्रायः पञ्चाशत्-खण्डेषु बहवः वैदिकग्रन्थाः प्रकाशिताः। तुलनात्मकभाषातात्त्विकरीत्या अनेन विदुषा धर्मस्य तत्त्वं विशदीकृतम् । सायणाचार्यस्य वेदव्याख्यापद्धत्याः समालोचकः सन्नपि असौ बहुत्र तं प्रति कृतज्ञतां व्याहरति।

### २.८.२ ओल्डेनवार्गमहाभागः कयेगीमहाभागश्च

ये तावद् पाश्चात्त्यमनीषिणः प्राच्यविद्याचर्चायां विशिष्टत्वं भजन्ते तेषु ओल्डेनवार्गमहाभागः (Hermann Oldenberg) कयेगीमहाभागश्च (Adolf Kaegi) अन्यतमौ। प्राच्याः विद्वांसः यद्यपि वेदं पवित्रधर्मग्रन्थरूपेण स्वीकृत्य मन्त्रार्थव्याख्यानं चक्रुः परन्तु ओल्डेनवार्गमहाभागः वेदं प्राचीनभारतीयजनानां साहित्यिकनिदर्शनरूपेणादाय

तुलनामूलकभाषातात्त्विकरीत्या वेदार्थव्याख्यानस्य पक्षपाती। ओल्डेनवार्गमहाभागेन वेदस्य धर्म (*Religion des Veda*) इत्याख्ये स्वविरचिते ग्रन्थे वैदिकदेवताशास्त्रं वैदिककर्मकाण्डञ्च प्रतिपादितम्। यद्यपि तेन तुलनात्मकभाषातात्त्विकरीत्या वेदव्याख्यानं विहितं तथापि तन्नये वैदिकमन्त्राणामर्थज्ञाने कर्मकाण्डस्य ज्ञानं तु आवश्यकमेव। तन्नये वेदमन्त्राणां कर्मकाण्डेन सह विशिष्टः सम्बन्धोऽस्ति, आदौ वेदमन्त्राः कर्मकाण्डान्तर्गतेषु यज्ञेषु प्रयुक्ताः आसन् परवर्तिनि काले वैदिकसंहितारूपेण तेषां प्रसिद्धिर्जातेति ओल्डेनवार्गमहाभागस्य मतम्। कयेगीमहाभागस्तु मतस्यास्य विपरीतमार्गानुसारी। तन्नये वेदमन्त्राणामर्थज्ञाने कर्मकाण्डस्यावश्यकता नास्ति, केवलं तुलनात्मकभाषातात्त्विकरीत्या वेदार्थो ज्ञातुं शक्यते। किञ्च कयेगीमतानुसारेण वैदिकमन्त्राणां यज्ञेन सह सम्बन्धो नास्ति, उत्पत्तिकाले संहितागता मन्त्रा निरपेक्षा आसन् परवर्तिनि काले कर्मकाण्डस्य प्राबल्यात् यज्ञेषु मन्त्राणां विनियोगः परिलक्ष्यते।

एतान् विहाय बहवः पाश्चात्त्यविद्वासः ऋग्वेदसंहितायाः व्याख्यानमनुवादश्च विहितः। रोजेनमहाभागः (Friedrich August Rosen) पाश्चात्त्यस्य प्रथमो वेदभाष्यकारो मन्यते। तेन ऋग्वेदीयप्रथममण्डलस्य लेटिनभाषायां शब्दानुवादः सम्पादितः। फ्रान्सदेशीयः इउजेन-वर्नुफमहाभागः (Eugene Burnouf) फ्रान्समहाविद्यालयस्य वेदविशेषज्ञः अध्यापकः फ्रेञ्चभाषायां वेदानुवादे प्रयासो विहितः। उइलसनमहाभागेन (Horace Hayman Wilson) समग्रस्य ऋग्वेदस्य आङ्गलानुवादः कृतः। लुडभिगमहाभागेन (Alfred Ludwig) जर्मनभाषायामनुवादः कृतः ऋग्वेदस्य। अपि च थियोदोर-आउफ्रेख्टमहाभागः (Theodor Aufrecht), ग्रासम्यानमहाभागः (Hermann Grassmann), ग्रिफितमहाभागः (Ralf T. H. Griffith), गेल्डनारमहाभागः (Karl F. Geldner), ओयेवारमहाभागः (Albrecht Weber), उइन्टारनित्जमहाभागः (Moriz Winternitz), वार्णेलमहाभागः

(A.C.Burnell), वेनेफिमहाभागः (Theodor Benfey) प्रमुखाः उल्लेखार्हाः। पाश्चात्त्यविद्वद्भिः यद्यपि प्रायेण तुलनात्मकभाषातात्त्विकदृष्ट्या वेदव्याख्यानं विहितं परन्तु बहुत्र वेदविषये गवेषणाकार्ये तेषामवदानमतुलनीयम् ।

**२.९ वेदस्य विविधाः पाठाः**

ऋग्वेदसंहिता न केवलं विश्वस्य प्राचीनतमं साहित्यिकं निदर्शनमपि त्वियं वृहत्तमं निदर्शनञ्च। वेदस्यापरं नाम श्रुतिः। भारतीयविदुषां सविधे वेदानामपौरुषेयत्वं स्वीक्रियते । भारतीयपरम्परानुसारेण वेदमन्त्राः न ऋषिभिर्विरचिता परन्तु दृष्टा एव। ऋषयो मन्त्रदर्शनादनन्तरं स्वशिष्येभ्यः उपदिष्टवन्तः, ते शिष्या अपि स्वशिष्येभ्यः। एवंप्रकारेण शिष्यप्रशिष्यपरम्पराक्रमेण श्रुत्वा श्रुत्वा एव कण्ठस्थीकरणेन वेदमन्त्राः संरक्षिताः ऋषिभिः, ते च सम्प्रदायक्रमेण उत्तरोत्तरं प्रचलिताः। यदा वैदिकमन्त्राणां प्रादुर्भावः स्वीक्रियते तदा लेखनव्यवस्थाया विद्यमानाभावात् केवलं श्रुत्वा एव कण्ठस्थीकरणे कदाचित् वक्तुः कथनदोषादुत श्रोतुः श्रवणदोषात् मन्त्रमध्ये मन्त्रगतपदमध्ये वा प्रक्षिप्तप्रवेशस्य पाठभेदस्य वा सम्भावना समीचीना एव । एतादृशस्य वृहत्तमसाहित्यिकनिदर्शनस्य भावीकालाय यथार्थतया संरक्षणार्थं प्रक्षेपनिवारणार्थञ्च दूरदर्शिभिर्ऋषिभिः विविधाः पन्थानः आविष्कृताः। तेषु विविधपाठप्रकारः अन्यतमः सर्वोत्कृष्टश्च । विविधपाठपद्धतिमाध्यमेन तदाननीन्तने काले या वैज्ञानिकी रीतिः समुद्भाविता ऋषिभिः सा तु अर्वाचीनकालेऽपि अभावनीया एव ।

वैदिकसम्प्रदाये एकादश पाठपद्धतयः प्रचलिताः। तेषु त्रयः प्रकृतिपाठाः अष्टौ विकृतिपाठाश्च । संहितापाठः पदपाठः क्रमपाठश्चेति त्रय प्रकृतिपाठाः। प्रकृतिपाठेषु संहितापाठः योगाप्रकृतिरिति नाम्नाभिधीयते, पदपाठः क्रमपाठश्च रूढाप्रकृतिरिति नाम्नाभिधीयेते । अष्ट

विकृतिपाठाश्च जटा, माला, शिखा, लेखा, ध्वजः, दण्डः, रथो घनश्च । एतेषां सर्वेषां पाठानां स्वरूपमधः प्रस्तूयते ।

### २.९.१ संहितापाठः

वेदस्य संहितागते मन्त्रे पदानि यथा निबद्धानि सन्ति तथैव पाठः संहितापाठ इत्युच्यते। संहितापाठे मन्त्राः ऋषिणा यथा दृष्टास्तथैव पठ्यन्ते । संहितापाठस्यापरं नाम 'निर्भुज' इति । ऐरतेयारण्यके अस्य स्वरूपमुच्यते - "यद्धि सन्धिं विवर्तयति तन्निर्भुजस्य रूपम्"[१३५] इति। अर्थात् यदुच्चारणं सन्धिं नाम पदयोरत्यन्तं सन्निकर्षं विवर्तयति विशेषेण सम्पादयति तदुच्चारणं निर्भुजशब्दार्थस्य स्वरूपम्। पदरूपभुजादर्शनाद् निर्भुजमिति। अथवा भुजौ पदस्य आद्यन्तरूपौ वाहू निर्गतौ यस्यां संहितायामिति व्युत्पत्त्या निर्भुजशब्दः निष्पन्नः। वर्णानामतिशयसन्निकृष्टत्वात् संहितोच्चारणे पदस्य शुद्धस्वरूपं पृथक्तया न ज्ञायते । ऋग्वेदप्रातिशाख्यस्य वर्गद्वयवृत्तावपि उच्यते - "सन्धेर्विवर्तनं निर्भुजं वदन्ति"[१३६] इति । ऋग्वेदसंहितायाः प्रथममन्त्रस्य संहितापाठ एवं भवति - "अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्" इति ।

पदपाठः – संहितापाठादनन्तरं मन्त्राणां पदपाठः क्रियते । पदपाठे प्रधानतया प्रत्येकं पदानि दण्डेन पृथक् प्रदर्श्यन्ते । पदपाठविषये तथा पदपाठप्रवक्तुः शाकल्यस्य विषये अग्रे २.१० इति उपाध्याये वक्ष्यते ।

### २.९.२ क्रमपाठः

[१३५] ऐ. आ. ३/१/३

[१३६] ऋग्वेदप्रातिशाख्यस्य वर्गद्वयवृत्तिः, श्लोक-३

पदपाठादनन्तरं क्रमपाठः क्रियते। पदपाठे केवलं प्रत्येकं पदानां स्पष्टतया प्रकृतस्वरूपं प्रदर्श्यते। मन्त्रगतानां सर्वेषां पदानां स्वरूपज्ञानात् परं मन्त्रमध्ये यथा कोऽपि प्रक्षेपो न स्यात् तथा क्रमपाठे मन्त्रगतानि प्रत्येकं पदानि द्विरावर्त्यन्ते । क्रमपाठविषये शौनकेन ऋग्वेदप्रातिशाख्यग्रन्थे उच्यते –"द्वाभ्यामभिक्रम्य प्रत्यादायोत्तरं तयोः। उत्तरेणोपसन्दध्यात् तथार्धर्चं समापयेत्।[137]" इति। प्रकृतिपाठस्यास्य नामत एव प्रतीयते यदत्र पदानि क्रमानुसारेण पुनरुच्चार्य्यन्ते। क्रमपाठः पूर्ववर्तिनं पदपाठमपेक्ष्यते, यतो हि संहितापाठस्य पदपाठाद् विना पृथक् पदज्ञानं न भवति । पृथग्रूपेण पदज्ञानाभावे यथार्थतया पदानामावृत्तिरसम्भवा । ऋग्वेदसंहितायाः प्रथममन्त्रस्य क्रमपाठ एवं भवति - " अग्निम् ईळे। ईळे पुरोहितम्। पुरोहितं यज्ञस्य। यज्ञस्य देवम्। देवम् ऋत्विजम्। ऋत्विजं होतारम्। होतारं रत्नधातमम्"। अत्र दृश्यते यत् 'अग्निम्' इति प्रथमपदं 'रत्नधातमम्' इति अन्तिमपदमतिरिच्य प्रत्येकं पदानि द्विरावृत्तानि। पदपाठे यथा अवग्रहप्रदानमितिकरणमित्यादिभिः समासप्रगृह्यादीनामवबोधो जायते क्रमपाठे तथा न परिलक्ष्यते। अत्र केवलं पृथक् पदानि प्रक्षेपनिवारणार्थं द्विरावृत्तानि। संख्याक्रमेण क्रमपाठस्य स्वरूपं प्रदर्श्यते चेत्तदा क्रम एवं भवति – १-२, २-३, ३-४, ४-५, ५-६, ६-७, ७-८...। प्रक्षेपनिवारणार्थमेवास्य पाठस्य प्रवृत्तिश्चेत् आद्यन्त्ययोः पदयोः पुनरावर्तनाभावात् मन्त्रादौ मन्त्रान्ते च प्रक्षेपापत्तिर्वर्तते एव। आपत्तिरियं तु परवर्तिनि जटाख्ये पाठे निवारिता दृश्यते।

### **२.९.३ जटापाठः**

त्रयः प्रकृतिपाठादनन्तरं विकृतिपाठाः क्रियन्ते। व्याडिना स्वविरचिते जटापटलाख्ये ग्रन्थे अष्टानां विकृतिपाठानां नामान्युल्लिखितानि। तत्रोच्यते - "जटा माला शिखा लेखा ध्वजो

---

[137] ऋ. प्रा. १०/२

दण्डो रथो घनः। अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा मनीषिभिः।।"[१३८] इति। अष्टसु विकृतिपाठेषु जटापाठः प्रथमोऽन्यतमश्च। जटापाठविषये उच्यते –

"अनुलोमविलोमाभ्यां त्रिवारं हि पठेत् क्रमम्।

विलोमे पदवत्सन्धिः अनुलोमे यथाक्रमम्।।

क्रमे यथोक्ते पदजातमेव द्विरभ्यसेदुत्तरमेव पूर्वम् ।

अभ्यस्य पूर्वं च तथोत्तरपदेऽवसानमेवं हि जटाभिधीयते।।"[१३९] इति ।

जटापाठे मन्त्रस्य प्रथमद्वितीये पदे साधारणक्रमेण विपर्ययेन च त्रिरावर्त्येते । ततः द्वितीयतृतीये पदे पूर्वोक्तक्रमेण त्रिरावर्त्येते, ततः तृतीयचतुर्थे, ततः चतुर्थपञ्चमे, ततः पञ्चमषष्ठे...। एवं प्रकारेण जटापाठे कस्यचिन्मन्त्रस्य आद्यन्त्ये पदे वारत्रयं पठ्येते, मध्यवर्तीनि शिष्टानि पदानि च षट् आवर्त्यन्ते । ऋग्वेदसंहितायाः प्रथममन्त्रस्य जटापाठ एवं भवति – "अग्निम् ईळे । ईळे अग्निम् । अग्निम् ईळे । ईळे पुरोहितम्। पुरोहितम् ईळे । ईळे पुरोहितम् । पुरोहितं यज्ञस्य । यज्ञस्य पुरोहितम् । पुरोहितं यज्ञस्य । यज्ञस्य देवम् । देवं यज्ञस्य । यज्ञस्य देवम् । देवम् ऋत्विजम् । ऋत्विजं देवम् । देवम् ऋत्विजम् । ऋत्विजं होतारम् । होतारम् ऋत्विजम् । ऋत्विजं होतारम् । होतारं रत्नधातमम् । रत्नधातमं होतारम् । होतारं रत्नधातमम्।" अत्र दृश्यते यत् प्रथमान्तिमपदे विहाय सर्वाणि पदानि षड् आवर्तिनानि । संख्याक्रमेण जटापाठस्य स्वरूपं प्रदर्श्यते चेत्तदा पदानां क्रम एवं भवति – १ २, २ १, १ २; २ ३, ३ २, २ ३; ३ ४, ४ ३, ३ ४; ४ ५, ५ ४, ४ ५; ५ ६, ६ ५, ५ ६; ७ ८, ८ ७, ७ ८। लौकिके यथा कस्याञ्चित् जटायां

---

[१३८] जटापटलकारिका, श्लोक – २.

[१३९] रामनारायण-चतुर्वेदिविरचितः *वेदवाङ्मयविमर्शः*, पृ. १४२

स्तरत्रयस्य विद्यमानेऽपि वाह्यतः स्तरद्वयमिति मन्यते तथैव वेदमन्त्राणां जटापाठे त्रिस्तरत्वेऽपि पदद्वयमेवावगम्यते।  क्रमपाठे प्रथमान्तिमपदयोः पुनरुच्चारणाभावे तत्र या प्रक्षेपापत्तिरासीत् सा त्वत्र निवारिता तयोरप्यत्र वारत्रयं पुनरावर्तनत्वात्।

### २.९.४ मालापाठः

जटापाठादनन्तरं मालापाठः क्रियते । मालापाठमादाय कस्यचिन्मन्त्रस्य पाठः बह्वायाससाध्यः। मालापाठः पुष्पमाला क्रममाला चेति द्विधा विभज्यते। यथा पुष्पचयनादनन्तरं विविधपुष्पाणां क्रमेण तथा वैपरीत्येन वारं वारं योजयित्वा माला प्रस्तूयते तथैव मालापाठेऽपि पदानि क्रमेण वैपरित्येन च पठ्यन्ते । मालापाठस्य स्वरूपमधोलिखितेन प्रचलितश्लोकेन प्रतिपादितम्

"माला मालेव पुष्पाणां पदानां ग्रन्थिनी हि सा।

आवर्त्तन्ते त्रयस्तस्यां क्रमव्युत्क्रमसंक्रमाः॥"[१४०] इति।

मालापाठे प्रथमद्वितीयपदे उक्त्वा पञ्चमषष्ठपदे उच्येते । तदनन्तरं द्वितीयतृतीये पदे ततश्च पञ्चमचतुर्थे पदे। ऋग्वेदसंहितायाः प्रथममन्त्रस्य मालापाठो भवति – "अग्निम् ईळे ऋत्विजं देवम्। ईळे पुरोहितं देवं यज्ञस्य। पुरोहितं यज्ञस्य यज्ञस्य पुरोहितम्। यज्ञं देवस्य पुरोहितम् ईळे। देवम् ऋत्विजम् ईळे अग्निम् । होतारं रत्नधातमं रत्नधातमं होतारम्।" इति। संख्याक्रमेण मालापाठस्य स्वरूपं प्रदर्श्यते चेत्तदा पदानां क्रम एवं भवति १ २ ६ ५, २ ३ ५ ४, ३ ४ ४ ३, ४ ५ ३ २, ५ ६ २ १, ७ ८ ८ ७ इति।

---

१४० रामनारायण-चतुर्वेदिविरचितः *वेदवाङ्मयविमर्शः*, पृ. १४६

### २.९.५ लेखापाठः

कुत्रचित् कुत्रचित् लेखा इत्यस्य रेखा इति नामान्तरं परिलक्ष्यते, द्वे एव साधूनी । क्रमपाठस्य विपर्य्यासेन लेखापाठो भवति। लेखापाठस्य लक्षणविषये उच्यते –

“क्रमाद् द्वित्रिचतुःपञ्चपदक्रममुदाहरेत्।

पृथक् पृथक् विपर्यस्य लेखामाहुः पुनः क्रमात्।”[१४१] इति।

लेखापाठे कदाचित् मन्त्रस्य पदद्वयं कदाचित् पदत्रयं पठ्यते यथाक्रमं वैपरीत्येन च । ऋग्वेदसंहितायाः प्रथममन्त्रस्य लेखापाठ एवं भवति- “अग्निम् ईळे, ईळे अग्निम्, अग्निम् ईळे; ईळे पुरोहितं यज्ञस्य, यज्ञस्य पुरोहितम् ईळे…इत्यादिरूपेण। संख्याक्रमेण लेखापाठस्य स्वरूपं प्रदर्श्यते चेत्तदा पदानां क्रम एवं भवति – १ २, २ १ १ २; २ ३ ४, ४ ५ २; २ ३, ३ ४....इत्येवम्।

### २.९.६ शिखापाठः

शिखापाठस्य स्वरूपं प्रायेण जटापाठवत् । जटापाठे एकत्र पदद्वयं उच्चार्यते परन्तु शिखापाठे तृतीये षष्ठे तथा नवमे पदत्रयमुच्चार्यते । जटापाठे प्रथमद्वितीयौ, द्वितीयप्रथमौ, प्रथमद्वितीयौ इति क्रमेण पदानि उच्चार्यन्ते, परन्तु शिखापाठे तृतीयचरणे प्रथमद्वितीयपदाभ्यां तृतीयपदमपि उच्यते । शिखालक्षणप्रसङ्गे उच्यते – ‘पदोत्तरां जटामेव शिखामार्याः प्रचक्षते’[१४२] इति। ऋग्वेदसंहितायाः प्रथममन्त्रस्य शिखापाठ एवं भवति – अग्निम् ईळे, ईळे अग्निम्, अग्निम् ईळे पुरोहितम्; ईळे पुरोहितम्, पुरोहितम् ईळे, ईळे पुरोहितं यज्ञस्य; पुरोहितं यज्ञस्य, यज्ञस्य पुरोहितम्, पुरोहितं यज्ञस्य देवम्; यज्ञस्य देवम्, देवं यज्ञस्य, यज्ञस्य देवम्

---

[१४१] तदेव. पृ. १४९

[१४२] रामनारायण-चतुर्वेदिविरचितः *वेदवाङ्मयविमर्शः*, पृ. १४८

ऋत्विजम्; देवम् ऋत्विजम्, ऋत्विजं देवम्, देवम् ऋत्विजं होतारम्; ऋत्विजं होतारम्, होतारम् ऋत्विजम्, ऋत्विजं होतारं रत्नधातमम्। इति। संख्याक्रमेण शिखापाठस्य स्वरूपं प्रदर्श्यते चेत्तदा पदानां क्रम एवं भवति – १ २, २ १, १ २ ३; २ ३, ३ २, २ ३ ४; ३ ४, ४ ३, ३ ४ ५; ४ ५, ५ ४, ४ ५ ६; ५ ६, ६ ५, ५ ६ ७; ६ ७, ७ ६, ६ ७ ८ इति।

**२.९.७ ध्वजपाठः**

ध्वजपाठस्य स्वरूपप्रसङ्गे उच्यते –

'ब्रुयादादेः क्रमं सम्यगन्तादुत्तारयेदिति ।

वर्गे वा ऋचि वा यत्र पठनं सध्वजः स्मृतः।।'[१४३] इति।

अर्थात् ध्वजपाठे आदौ पदानि क्रमपाठवत् पठ्यन्ते ततः तान्येव पदानि वैपरीत्येन आवर्त्यन्ते। ऋग्वेदसंहितायाः प्रथममन्त्रस्य ध्वजपाठो भवति – अग्निम् ईळे, ईळे पुरोहितम्, पुरोहितं यज्ञस्य; पुरोहितं यज्ञस्य, ईळे पुरोहितम्, अग्निम् ईळे; यज्ञस्य देवम्, देवम् ऋत्विजम्, ऋत्विजं होतारम्; ऋत्विजं होतारम्, देवम् ऋत्विजम्, यज्ञस्य देवम्; होतारं रत्नधातमम्, रत्नधातमं होतारम् इति । संख्याक्रमेण ध्वजपाठस्य स्वरूपं प्रदर्श्यते चेत्तदा पदानां क्रम एवं भवति – १ २, २ ३, ३ ४; ३ ४, २ ३, १ २; ४ ५, ५ ६, ६ ७; ६ ७, ५ ६, ४ ५; ७ ८; ८ ७ इति।

**२.९.८ दण्डपाठः**

दण्डपाठस्य लक्षणविषये उच्यते –

---

[१४३] रामनारायण-चतुर्वेदिविरचितः *वेदवाङ्मयविमर्शः*, पृ. १५०

"क्रममुक्त्वा विपर्यस्य पुनश्च क्रममुत्तरम्।

अर्धर्चादेवमुक्तोऽयं क्रमदण्डो विधीयते॥"[१४४] इति।

अर्थात् दण्डपाठे आदौ अर्द्धर्चसमाप्तिपर्यन्तं क्रममुक्त्वा ततः तस्य विपर्यासः ततः पुनः क्रमः वक्तव्यः, एवंप्रकारेण शिष्टमर्द्धर्चमपि पुनः पठनमेव दण्डपाठः। ऋग्वेदीयप्रथममन्त्रस्य दण्डपाठ एवं भवति – अग्निम् ईळे, ईळे अग्निम्, अग्निम् ईळे; ईळे पुरोहितम्, पुरोहितम् ईळे अग्निम्...इत्यादिरूपेण। संख्याक्रमेण दण्डपाठस्य स्वरूपं प्रदर्श्यते चेत्तदा पदानां क्रम एवं भवति- १ २, २ १, १ २; २ ३, ३ २ १...इत्यादि।

### २.९.९ रथपाठः

रथपाठस्य स्वरूपप्रसङ्गे उच्यते –

'पादशोऽर्द्धर्चशो वापि सहोक्त्या दण्डवद्रथः'[१४५] इति। अर्थात् पादे पादे अर्द्धर्चे वा क्रमविपर्यासौ दण्डवत् सह उक्तौ चेत् स विकृतिपाठविशेषः रथ इत्युच्यते। कस्यचित् मन्त्रस्य द्विधा रथपाठः क्रियते- समग्रमन्त्रस्य उत एकस्य पादस्य। रथपाठे क्रमपाठः तस्य वैपरीत्यं च परिलक्ष्येते। ऋग्वेदीयप्रथममन्त्रस्य रथपाठ एवं भवति – अग्निम् ईळे, यज्ञस्य देवम्; ईळे अग्निम् देवं यज्ञस्य; अग्निम् ईळे ईळे पुरोहितम्; यज्ञस्य देवं देवम् ऋत्विजम्... इत्यादिरूपेण। संख्याक्रमेण रथपाठस्य स्वरूपं प्रदर्श्यते चेत्तदा पदानां क्रम एवं भवति – १ २ ४ ५; २ १ ५ ४; १ २ २ ३; ४ ५ ५ ४ इत्यादि।

---

[१४४] रामनारायण-चतुर्वेदिविरचितः *वेदवाङ्मयविमर्शः*, पृ. १५३

[१४५] रामनारायण-चतुर्वेदिविरचितः *वेदवाङ्मयविमर्शः*, पृ. १५५

### २.९.१० घनपाठः

घनपाठस्य लक्षणप्रसङ्गे उच्यते –

"अन्तात्क्रमं पठेत्पूर्वमादिपर्यन्तमानयेत्।

आदिः क्रमं नयेदन्तं घनमाहुर्मनीषिणः ॥"[१४६] इति।

अर्थात् मन्त्रस्य पूर्वार्द्धस्य अन्तादारभ्य आदिपर्यन्तं विपरीतक्रमेण पठित्वा ततः पूर्वार्द्धस्य आदितः आरभ्य अन्तपर्यन्तं यथाक्रमेण पठनीयनम्। ततश्च उत्तरार्द्धस्य अन्तादारभ्य आदिपर्यन्तं विपरीतक्रमेण पठित्वा ततः आदितः आरभ्य अन्तपर्यन्तं यथाक्रमेण पठनीयम्। अयं विकृतिपाठविशेषः घनपाठ इत्युच्यते। ऋग्वेदसंहितायाः प्रथममन्त्रस्य घनपाठ एवं भवति –ऋत्विजं देवं यज्ञस्य पुरोहितम् ईळे अग्निम्, अग्निम् ईळे पुरोहितं यज्ञस्य देवम् ऋत्विजम्, रत्नधातमं होतारं होतारं रत्नधातमम् इति।

त्रिसहस्रवर्षात् पूर्वं मुद्रणयन्त्राभावेऽपि सहस्राणां वेदमन्त्राणां यथार्थतया संरक्षणाय कण्ठस्थीकरणेनैव ऋषिभिः या वैज्ञानिकी रीतिराविष्कृता सा तु अभावनीयैव।

## २. १० पदपाठः, पदपाठकारः शाकल्यश्च

### २.१०.१ पदपाठस्वरूपम्

संहितापाठे मन्त्रस्य सन्धियुक्तानि सर्वाणि पदानि पदपाठे पृथक्तया प्रदर्श्यन्ते । पदपाठस्यापरं नाम प्रतृण्णमिति । ऋग्वेदप्रातिशाख्यस्य वर्गद्वयवृत्तौ विष्णुमित्रेण पदपाठस्य

[१४६] रामनारायण-चतुर्वेदिविरचितः *वेदवाङ्मयविमर्शः*, पृ. १६१

स्वरूपमुच्यते - 'शौद्धाक्षरोच्चारणं च प्रतृण्णम्'[१४७] इति। पदपाठस्य प्राचीनतम उल्लेखः ऋग्वेदीये ऐतरेये आरण्यके समुपलभ्यते । ऐतरेयारण्यके संहितापाठस्वरूपमुक्त्वा पदपाठस्य स्वरूपप्रसङ्गे उच्यते - "...अथ यच्छुद्धे अक्षरे अभिव्याहरति तत् प्रतृण्णस्याग्र उ एवोभयमन्तरेणोभयं व्याप्तं भवति"[१४८] इति अर्थात् यत्र द्वयोः पदयोर्मध्ये सन्धेः सावकाशेऽपि सन्धिं न विधाय पदानां पृथगुच्चारणं क्रियते स भवति पदपाठः। तदुच्यते सायणाचार्येण - "'यत्' उच्चारणं, 'सन्धिं' पदयोरुभयोरत्यन्तसन्निकर्षं 'विवर्तयति' विशेषेण सम्पादयति, 'तत्' उच्चारणं, निर्भुजशब्दार्थस्य स्वरूपम् । निर्दिष्टौ भुजसदृशौ पूर्वोत्तरशब्दो यस्मिन् संहितारूपे उच्चारणे तदुच्चारणं निर्भुजम् । 'अथ'शब्दः पूर्ववैलक्षणार्थः। 'शुद्धे' विकाररहिते, पूर्वोत्तरे उभे 'अक्षरे', 'अभिव्याहरति' स्पष्टमुच्चारयतीति, यदस्ति, 'तत्', प्रतृण्णशब्दाभिधेयस्य पदच्छेदस्य स्वरूपम् । तद्यथा । इषे त्वोर्जे त्वेत्यत्र योऽयमोकारः, सोऽयं संहितास्वरूपः। यदा तु आकारान्तं त्वेत् पदं, ऊकारादिकमूर्ज इत्यादि पदमुच्चारयति तदानीमाकार उकारश्चेत्युभे 'अक्षरे शुद्धे' भवतः। तदानीं सन्निकर्षरूपायाः संहितायाः विच्छिन्नत्वात् । विच्छेदरूपहिंसावाचिना 'प्रतृण'शब्देन विच्छिन्नं पदमभिधीयते । यदेतत् प्रतृणस्वरूपं तदेतत् 'अग्र उ एव' प्रथमभाव्येव । सिद्धे हि पदस्य स्वरूपे पश्चात् संहिता प्रवर्तते। संहितायाः सन्धीयमानपदद्वयधर्मत्वेन पदपूर्वकत्वस्यावश्यम्भावात् । येन क्रमेण संहिता पदं चेति 'उभयं व्याप्तं भवति'। सोऽयं क्रम उभयमध्यवर्तित्वात् 'उभयमन्तरेण' इत्युच्यते।।[१४९] इति। *"ए-डिकशनारि-अफ्-संस्कृत-ग्रामार" (A Dictionary of Sanskrit Grammar)*- इत्याख्ये ग्रन्थे महामहोपाध्याय-काशीनाथ-वासुदेव-अभ्यङ्करमहाभागेन पदपाठस्वरूपमुक्तं यत् - वेदमन्त्राणां यदुच्चारणं सन्धिं विभज्य क्रियते स एव पदपाठः। तेनोच्यते – "पदपाठ the

---

[१४७] ऋ. प्रा. / वर्गद्वयवृत्तिः ३

[१४८] ऐ. आ. ३/१/३

[१४९] ऐ. आ. ३/१/३ सायणभाष्यम्

recital of the Veda text pronouncing or showing each word separately as detached from the adjoining word. It is believed that the Veda texts were recited originally as running texts by the inspired sages, and as such, they were preserved by people by oral tradition. Later on after several centuries, their individually distinct words were shown by grammarians who were called Padakāras."[१५०] इति। एतादृशस्य पाठस्य नामत एव प्रतीयते यदत्र मन्त्रस्थितानां सर्वेषां पदानां प्रकृतस्वरूपं ज्ञायते । पदपाठे प्रथमतः प्रत्येकं पदानि दण्डेन पृथक् प्रदर्श्यन्ते । पदान्ते विद्यमानः अनुस्वारः 'म्'-रूपेण प्रदर्श्यन्ते । पदपाठे न केवलं सन्धियुक्तानि पदानि पृथक् कृत्वा प्रदर्श्यन्ते अपि तु अत्र समस्तपदे पूर्वोत्तरपदयोर्मध्ये अवग्रहप्रदानेन समासः सूच्यते, इतिकरणेन प्रगृह्यत्वं सूच्यते च । समासमतिरिच्य केषुचित् प्रकृतिप्रत्यययोः मध्ये अवग्रहप्रदानेन प्रकृतिप्रत्यययोर्ज्ञानं यथार्थतया प्रदीयतेऽत्र। संहितापाठे अवस्थिताः उदात्तादिस्वराः बहुत्र परवर्तिस्वरं दृष्ट्वा परिवर्तिता भवन्ति । यथा परवर्तिनि पदे उदात्तस्वरितयोः विद्यमाने पूर्ववर्ती अनुदात्तस्वरः प्रचितं न भूत्वा अनुदात्ततरो भवति । परन्तु पदपाठे सर्वेषां पदानां पृथग्रूपेण प्रकृतः स्वरविन्यासः प्रदर्श्यते। ऋग्वेदस्य प्रथममन्त्रस्य पदपाठ एवं भवति – "अ॒ग्निम् । ई॒ळे॒ । पु॒रःऽहि॑तम् । य॒ज्ञस्य॑ । दे॒वम् । ऋ॒त्विज॑म्॥ होता॑रम् । र॒त्न॒ऽधात॑मम्॥" इति। अत्र 'अग्निमीळे' इति सन्धियुक्तं पदम् 'अग्निम् । ईळे' इत्येवंप्रकारेण सन्धिं विभज्य प्रदर्शितम्। अपि च 'अग्निं' इत्यत्र अनुस्वारः 'अग्निम्' इत्येवंप्रकारेण प्रदर्शितः, 'पुरोहितम्' इत्यत्र 'पुरःऽहितम्' इति अवग्रहप्रदानेन गतिसमासः सूचितः। संख्यानुसारेण पदपाठस्य स्वरूपं प्रदर्श्यते चेत्तदा पदक्रम एवं भवति – १, २, ३, ४, ५, ६, ७, ८...। ऋग्वेदस्य पदपाठकर्तास्ति महर्षिः शाकल्यः। ऋग्वेदसंहितायाः षट् ऋचोऽतिरिच्य शिष्टानां सर्वासामृचां

---

[१५०] K. V. Abhyankar. *A Dictionary of Sanskrit Grammar.* p-218.

पदपाठः शाकल्येन प्रदर्शितः। ते षन्मन्त्रा यथा – ७.५९.१२, १०.२०.१, १०.१२१.१०, १०.१९०.१, १०.१९०.२, १०.१९०.३। एतासामृचां पदपाठाभावे किं कारणमिति न ज्ञायते।

जटादिविकृतिपाठानां पदपाठनिर्भरता परिलक्ष्यते। सक्रमजटादिविकृतिपाठेषु दृश्यते यत् आदौ मन्त्रगतानि पदानि पृथक्कृत्वा ततः कदाचित् क्रमानुसारेण वैपरीत्येन विपर्यासेन वा पुनरुच्चार्यन्ते। पदपाठकृता शाकल्येन पदपाठे दण्डेन सम्यक्तया पदानि न प्रदर्शितानि चेत्तदा पृथक्पदस्वरूपज्ञानाभावे कस्यचिन्मन्त्रस्य क्रमजटामालाशिखालेखाध्वजदण्डरथघनाः इत्येते पाठा न सम्भवन्ति।

### २.१०.२ पदपाठकारः शाकल्यः

ऋग्वेदसंहितायाः समुपलब्धस्य पदपाठस्य प्रवक्तास्ति महर्षिः शाकल्यः इत्यस्मिन् विषये वेदविदो न विवदन्ते। महर्षेः शाकल्यस्य पदपाठप्रवक्तृत्वे बहुनि प्रमाणान्युपलभ्यन्ते। ऋग्वेदोत्तरकालादारभ्य वैदिकवाङ्मये तथा वेदोत्तरसंस्कृतसाहित्ये बहुत्र शाकल्यस्योल्लेखः प्राप्यते। वैदिकसाहित्ये बहुत्र शाकलशब्दस्य तथा शाकल्यशब्दस्योल्लेखो दृश्यते। शतपथब्राह्मणस्य चतुर्दशाध्याये शाकलशब्दस्य तथा शाकल्यशब्दस्योल्लेखः परिलक्ष्यते। तत्रोच्यते – "अथ शाकलैर्जुहोति। प्प्राणा वै शाकलाः प्प्राणानेवास्मिन्नेतद्दधाति"[१५१] इति। अत्र शाकलशब्देन अग्नेः प्राणस्वरूपाः समिधः काष्ठखण्डविशेषा गृह्यन्ते। शाकलैः अग्नेः उद्दीपनं जायते, अतः शाकला अग्नेः प्राणस्वरूपा एव। शतपथब्राह्मणस्य अन्यत्र च शाकल्ययाज्ञवल्क्यसंवादः समुपलभ्यते, यत्र मिथिलानृपतेः वैदेहजनकस्य राजसभायां याज्ञवल्क्यमुद्दिश्य विदग्धशाकल्येन विविधाः प्रश्नाः उपस्थापिताः। तत्राम्नातम् - "अथ हैनं विदग्धः शाकल्यः पप्रच्छ। कति देवाः? कानि आयतनानि। कादिदेवताः कुत्र हृदयस्थानं

[१५१] शत. ब्रा. १४/२/२/३१

चेति"[१५२] इति। अत्र विदग्धशब्दस्यार्थः चतुरः तीक्ष्णधीः सूक्ष्मदर्शी वा । एवमेकमुपाख्यानं सामवेदीये जैमिनीये ब्राह्मणे समुपलभ्यते । तत्रापि शाकल्यः विदग्ध इति विशेषणेन विशेषितः। तत्रोच्यते -"जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे । ते तद् उ ह कुरुपञ्चालानां ब्राह्मणा अभिसमाजग्मुः। स ह सहस्रं गवाम् अरुन्धान उवाच – ब्राह्मणा एता वो यो ब्रह्मिष्ठस् स उदाजताम् इति। स होवाच वाजसनेयोऽर्वाचीरेतास् सोम्येति । होचुस्त्वं नु नो ब्रह्मिष्ठोऽसी३इति। स होवाच नमो वो ब्रह्मिष्ठायास्तु । गोकामा एव वयं स्म इति । ते होचुः को न इमं प्रक्ष्यतीति । स होवाच विदग्धश् शाकल्योऽहम् इति।..."[१५३] इति। अस्यैव ब्राह्मणस्य वचनानुसारेणावगम्यते यत् पुरा विदेहजनकराजसभायां समायोजिते शास्त्रार्थे याज्ञवल्क्येन स्वगुरुः शाकल्यः पराजितः। ऐतरेयारण्यके स्थविरशाकल्यस्योल्लेखः परिलक्ष्यते - "प्राणो वंश इति स्थविरः शाकल्यस्तद्यथा शालावंशे सर्वेऽन्ये वंशाः समाहिताः स्युरेवमस्मिन्प्राणे चक्षुः श्रोत्रं मनो वागिन्द्रियाणि शरीरं सर्व आत्मा समाहितः।"[१५४] इति। अस्यैवांशस्य भाष्यरचनावसरे सायणाचार्येणोच्यते - "शकलस्य पुत्रः शाकल्यः। स बालोऽपि कश्चिदस्तीति स्थविरशब्देन विशेष्यत इति।"[१५५] इति। स्थविरशब्दस्यार्थो दृढः, स्थिरः, वृद्धश्चेति । अत्र च सायणाचार्यवचनात् प्रतीयते स तु न वयोवृद्धः परन्तु ज्ञानवृद्ध एव। ऐतरेयारण्यकस्य अन्यत्रापि स्थविरविशेषणेन शाकल्यः विशेषितः - "अथ यद्वयमनुसंहितमृचोऽधीमहे यच्च माण्डूकेयीयमध्यायं प्रब्रूमस्तेन नो णकारषकारावुपाप्ताविति ह स्माऽह स्थविरः शाकल्यः"[१५६] इति।

[१५२] तदेव. १४/६/९/१
[१५३] जै. ब्रा. २/७६
[१५४] ऐ. आ. ३/२/१
[१५५] तदेव. सायणभाष्यम्
[१५६] ऐ. आ. ३/२/६

ब्राह्मणपरवर्तिनि काले वेदाङ्गेषु शाकल्यस्योल्लेखः प्राप्यते । यास्काचार्यविरचिते निरुक्तग्रन्थे मन्त्रव्याख्यानावसरे पदविभागमादाय स्वमतभिन्नताप्रदर्शनार्थं शाकल्य उल्लिखितः। तद्यथा - “वेति च य इति च चकार शाकल्यः”[१५७] इति। निरुक्तोत्तरकाले व्याकरणवेदाङ्गे पाणिनिविरचितायामष्टाध्याय्यां महर्षेः शाकल्यस्य उल्लेखो दृश्यते। पाणिनिना सूत्रं सूत्रितम् ‘लोपः शाकल्यस्य’[१५८], ‘सम्बुद्धौ शाकल्यस्येतावनार्षे’[१५९], ‘इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च’[१६०], ‘सर्वत्र शाकल्यस्य’[१६१] इति च ।

शौनकविरचिते ऋग्वेदप्रातिशाख्ये स्थविरशाकल्यस्योल्लेखः प्राप्यते –‘प्राच्यपञ्चाल उपधानिभोदयाः शाकल्यस्य स्थविरस्येतरा स्थितिः।’[१६२] इति। शौनकेन स्वरपटलाख्ये तृतीये पटलेऽपि महर्षिः शाकल्यः उल्लिखितः –

“इकारयोश्च प्रश्लेषे क्षैप्राभिनिहितेषु च ।

उदात्तपूर्वरूपेषु शाकल्यस्यैवमाचरेत्।।”[१६३] इति।

शुक्लयजुर्वेदप्रातिशाख्ये कात्यायनेन विसर्गस्य विकारत्वाभावं प्रतिपादनाय शाकल्यमतं समर्थ्य उच्यते- ‘अविकारं शाकल्यः शषसेषु’[१६४] इति। अथर्ववेदप्रातिशाख्ये अवग्रहप्रदानविषये शाकल्यमतमुद्धृत्योच्यते - ‘समस्तमेकाक्षरं वृद्‌ध्या यद् भवेद्विकृतं पदम् ।

---

[१५७] नि. ६/५/२९
[१५८] पा. सू. ८/३/१९
[१५९] तदेव. १/१/१६
[१६०] तदेव. ६/१/१२७
[१६१] तदेव. ८/४/५१
[१६२] ऋ. प्रा. २/८१-८२
[१६३] तदेव. ३/१३
[१६४] वा. प्रा. ३/१०

स्वरान्तं नावगृह्णीयाच्छाकल्यस्य तथा मतम्’[१६५] इति। पतञ्जलिना स्वविरचिते महाभाष्यग्रन्थे शाकल्यस्योल्लेखो विहितः – ‘शाकल्यस्य संहितामनुप्रावर्षत् । शाकल्येन सुकृतां संहितामनुनिशम्य देवः प्रावर्षत् । मेघो वृष्टिं चकार इति।’[१६६] इति ।

वेदाङ्गपरवर्तिनि काले परिशिष्टग्रन्थेषु पुराणादिषु च शाकल्यस्य उल्लेखः परिलक्ष्यते। अनुवाकानुक्रमणीग्रन्थे उच्यते –

“शाकल्यदृष्टे पदलक्षमेकं सार्धं च वेदे त्रिसहस्रयुक्तम् ।

शतानि चाष्टौ दशकद्वयं च पदानि षट् चेति हि चर्चितानि।।”[१६७] इति।

अर्थात् ऋग्वेदसंहितायाः शाकल्यप्रवर्तितपदपाठपरम्परायाः पदसंख्याः षड्विंशत्युत्तराष्टशतत्रिपञ्चाशत्सहस्रैकलक्षपरिमिता वर्तन्ते (१५३८२६)।

एवंप्रकारेण उपर्युक्तप्रमाणैः महर्षेः शाकल्यस्य पदपाठप्रवक्तृत्वं प्रमीयते । यद्यपि ब्राह्मणविवरणे आरण्यकविवरणे च स्थविरशाकल्यस्य विदग्धशाकल्यस्य वा पदपाठप्रवक्तृत्वविषये किमपि नोक्तं परन्तु तत्र तत्र तस्य शास्त्रज्ञत्वं बहुधा प्रतिपादितम् । परवर्तिनि वेदाङ्गसाहित्ये यास्काचार्येण निरुक्तग्रन्थे पदविभागमादाय यो विचारः प्रस्तुतः स तु शाकल्यकृतपदविभाग एव इति निःसंशयम्। यतो हि ऋग्वेदसंहितायाः पदपाठे स एव पदविभागोऽस्माभिः प्राप्यते यः शाकल्येन सह प्रस्तुतः निरुक्तग्रन्थे। परवर्तिनि पुराणसाहित्ये बहुत्र शाकल्यस्योल्लेखेऽपि वायुपुराणे तस्य पदपाठकर्तृत्वं समुल्लिखितम् । तत्रोच्यते –

---

[१६५] अ. प्रा. ३/२१९

[१६६] महा. भा. १/४/८४

[१६७] अनुवाकानुक्रमणी, श्लोक-४५

"देवमित्रस्तु शाकल्यो महात्मा द्विजसत्तमः।

चकार संहिताः पञ्च बुद्धिमान् पदवित्तमः॥"[१६८] इति।

अत्र महर्षेः शाकल्यस्य 'पदवित्तमः' इति विशेषणेन तस्य पदपाठप्रवक्तृत्वं प्रतीयते।

पुराणेषु, प्रातिशाख्येषु, अष्टाध्याय्यां, निरुक्ते च शाकल्यस्य स्पष्टतयोल्लेखात् अयं महर्षिः पाणिनेः तथा यास्काचार्यस्यापि पूर्ववर्तीति ज्ञायते। *Critical Studies in the Phonetic Observations of Indian Grammarians* इत्याख्ये ग्रन्थे ग्रन्थकारः सिद्धेश्वरवर्मामहाभागः निरुक्तकृद्यास्काचार्यस्य समयः ख्रीष्टपूर्वपञ्चमशतकः निर्धारितः।[१६९] निरुक्तकारः यास्काचार्यस्तु पाणिनेरपि पूर्ववर्ती। अतः पदपाठकारः शाकल्यः ख्रीष्टपूर्वपञ्चमशतकात् पूर्ववर्तीति वक्तुमुचितम्।

जनश्रुत्यनुसारेण त्रेतायुगस्थो रावणोऽपि ऋग्वेदस्य पदपाठं चकार। पुराणादिषु रावणस्य शास्त्रेषु नैपुण्यं ज्ञायते, परमशैवस्य तस्य शिवस्तोत्रमद्यावधि प्रचलति, परन्तु तद्विरचितः ऋग्वेदस्य सम्पूर्णः पदपाठः अस्माभिर्न प्राप्यते। आचार्यः भगवद्दत्तः स्वकीये '*वैदिक वाङ्मय का इतिहास*' इत्याख्ये ग्रन्थे भणति – "ऋग्वेद का प्राचीन पदपाठ शाकल्यकृत है। रावण ने ऋग्वेद का भाष्य ही नही रचा, प्रत्युत उसने ऋग्वेद का पदपाठ भी किया था..."[१७०] इति। सुधीर-कुमार-गुप्त-महाभागेन सम्पादिते *रावणभाष्यम्* इत्याख्ये ग्रन्थे रावणस्य पदपाठप्रवक्तृत्वेन उल्लेखः प्राप्यते। परन्तु तत्र रावणकृतात् भाष्यात् तदीयः पदपाठः अनुमितः, न तु

[१६८] वा. पु. ६०/६२

[१६९] *Critical studies in the phonetic observations of Indian grammarian.* p-21

[१७०] भगवद्दत्तः, *वैदिक वाङ्मय का इतिहास.* प्रथमभाग, द्वितीयखण्ड पृ-६६.

रावणकृतपदपाठस्तत्र प्रदर्शितः ।[१७१] प्रसङ्गत उल्लेख्यं यत् सामवेदस्य पदपाठकारोऽस्ति गार्ग्यः यजुर्वेदस्य आत्रेयश्च। अथर्ववेदस्य पदपाठकाररूपेण शाकल्यस्यैव प्रसिद्धिर्वर्तते।

## २.११ अध्यायसारः

"साक्षात्कृतधर्माण ऋषयो बभुवुः। तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुः। उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च॥"[१७२] इति निरुक्तवचनादेव प्रतीयते यत् पुरा मन्त्रद्रष्टृभिः ऋषिभिः मन्त्राः उपदिष्टाः ततश्च परम्पराप्राप्तानां वेदमन्त्राणामर्थज्ञानं जनानां सविधे साधारणतया असम्भवत्वात् तदाप्रभृत्येव वेदव्याख्यानार्थं वेदाङ्गानि प्रवृत्तानि । तदुत्तरकाले ततोऽपि अल्पधीनां कृते वेदस्य अर्थप्रकाशनाय वेदभाष्याणि भाष्यकृद्भिः विरचितानि। किञ्च वेदाङ्गकाले या व्याख्यानधारा प्रारब्धा सा तु इदानीमपि प्रचलितैव। उत्तरकाले च तस्याः व्याख्यानपरम्परायाः विस्तारश्च जातः। कैश्चित् प्राचीनपद्धतिमतिरिच्य व्याख्यानस्य नवीना पद्धतिरपि आविष्कृता, वेदमन्त्राणामनेकार्थत्वात् एकस्यैव मन्त्रस्य विविधप्रकारकं व्याख्यानमस्माभिर्लक्ष्यते । अष्टादशशतकोत्तरकाले पाश्चात्त्यविद्वद्भिः वैदिकसाहित्यं विश्वस्य विद्वत्समाजे स्थानं स्वीचकार। अनयैव परम्परानुसारेण प्रचलितया व्याख्यानधारया विश्वसमाजे वेदमाहात्म्यं प्रसारितं प्रचारितञ्च । तेन च समग्रे विश्वे वैदिकसाहित्यस्य विशेषः समादरो दृश्यते सृष्टेः एतावत्परवर्तिकालेऽपि।

---

[१७१] सुधीर-कुमार-गुप्त-सम्पादितं रावणभाष्यम्, पृ. ८

[१७२] नि. १/६/२०

## ३.१ पदलक्षणविमर्शः

पदविभागस्तु पदज्ञानापेक्षी। पदज्ञानं विना पदानि पृथक्तया विभक्तुं न शक्यन्ते। ननु पदं नाम किम् इत्याशङ्कायां वैयाकरणैः प्रातिशाख्यकारैः आलङ्कारिकैश्च बहुविधं पदलक्षणं प्रदत्तम्। भगवता पाणिनिना स्वकीये *अष्टाध्यायी*ग्रन्थे पदसंज्ञाविधायकानि चत्वारि सूत्राणि निगदितानि।[१७३] तेषु प्रथमं सूत्रं – 'सुप्तिङन्तं पद'मिति सूत्रं प्रधानतया पदस्वरूपं ज्ञापयति। पाणिनिना अनेन सूत्रेण उक्तं यत् – सुबन्तं तिङन्तं च यत् शब्दस्वरूपं तस्य पदसंज्ञा भवति। भट्टोजिदीक्षितेन वृत्तावुच्यते – 'सुबन्तं तिङन्तं च पदसंज्ञकं स्यात्' इति। पाणिनिना 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्'[१७४] इति सूत्रेण एकविंशतिः सुब्विभक्तयः, 'तिप्तस्झिसिप्थस्थमिप्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्'[१७५] इति सूत्रेण अष्टादश तिङ्विभक्तयश्च उक्ताः। एताः विभक्तयः यस्य शब्दस्वरूपस्य अवयविनः वा अन्त्यावयवो भवन्ति तच्छब्दस्वरूपं पदसज्ञकं भवति। अर्थात् रामः (राम +सु) इत्यस्य शब्दस्वरूपस्य अन्त्यावयवः सु इति विभक्तिः, तस्मात् अस्य पदत्वं सिद्ध्यति। अपि च पठति (पठ् + लट् तिप्) इत्यस्य शब्दस्वरूपस्य अन्त्यावयवो वर्तते तिबिति प्रत्ययः, तेन अस्यापि पदत्वं सिद्ध्यति। न्यायदर्शनस्य प्रवक्ता गौतमः *न्यायसूत्रे* पदलक्षणमाह – 'ते विभक्त्यन्ताः पदम्'[१७६] इति। न्यायसूत्रेऽपि विभक्त्यन्तस्य शब्दस्वरूपस्य पदत्वमङ्गीकृतम्। तर्कसंग्रहकृता अन्नंभट्टेन पदलक्षणविषये उक्तम् – 'शक्तं पदमिति'। शक्तिर्नाम अस्मात् पदात् अयमर्थो बोध्यः इतीश्वरसंकेतः। अतः शक्तिविशिष्टशब्दस्वरूपस्य पदत्वं स्वीकृतं तर्कसंग्रहकारेण,

---

[१७३] सुप्तिङन्तं पदम् (१/४/१), नः क्ये (१/४/१५), सिति च (१/४/१६), स्वादिष्वसर्वनामस्थाने (१/४/१७)
[१७४] पा. सू. ४/१/२
[१७५] तदेव. ३/४/७८
[१७६] न्या. सू. २/२/५८

विभक्तिविषये किमपि न सूचितम्। साहित्यदर्पणकृता विश्वनाथेन पदलक्षणविषये उक्तम् – ‘वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः’ इति।[१७७] अर्थात् प्रयोगयोग्यताविशिष्टाः अनन्विताः अर्थबोधकाः वर्णाः पदत्वेनोच्यते। भामहः स्वकीय*काव्यालंकार*ग्रन्थे आह – ‘अर्थवान् वर्णसंघातः सुप्तिङन्तं पदं पुनः’ इति।[१७८] अर्थात् सुबन्तस्य तिङन्तस्य वा अर्थविशिष्टशब्दस्वरूपस्य पदत्वमङ्गीकृतं भामहेन। *शब्दशक्तिप्रकाशिकायां* पदलक्षणमुक्तम् – ‘पदं विभक्त्यन्तम्’ इति। कौटिल्यकृतस्य *अर्थशास्त्रस्य* शासनाधिकारे ‘‘पदसमूहः वाक्यमर्थपरिसमाप्तौ’’ इति वाक्यलक्षणप्रसङ्गे तत्र पदलक्षणमाह कौटिल्यः ‘वर्णसंघातः पदमिति।’[१७९] अत्र कौटिल्येन यद्यपि पदलक्षणे अर्थविषये नोक्तं परन्तु वाक्यलक्षणे पदसमूहः वाक्यमर्थपरिसमाप्तौ इत्यत्र अर्थस्य प्राधान्यं सूचितम्। अतः तन्नये अर्थविशिष्टवर्णसंघातः पदमिति, पदार्थाभावे वाक्यार्थासम्भवात्। *तैत्तिरीयप्रातिशाख्ये* उक्तम् – ‘एकवर्णः पदम्’ इति।[१८०] *शुक्लयजुर्वेदप्रातिशाख्ये* ‘एकवर्णः पदमपृक्त’[१८१]मिति सूत्रतः एकाक्षरस्य पदत्वं *शुक्लयजुर्वेदप्रातिशाख्या*नुमितमिति ज्ञायते। तच्चैकाक्षरविशिष्टपदम् अपृक्तसंज्ञयाभिधीयते, यथा आ सुव इति। पुनश्च *शुक्लयजुर्वेदप्रातिशाख्ये* पदलक्षणं स्पष्टतयोक्तम् – ‘अर्थः पदम्’[१८२] इति । अर्थात् येन शब्दस्वरूपेण अर्थः अवगम्यते तत् पदम्। अत्र तु विभक्तिविषये किमपि नोक्तम्। अस्यैव सूत्रस्य भाष्ये उवटः पदलक्षणविषये आह – ‘अर्थाभिधायि पदम्’ इति। अपि चोक्तं तेन – ‘पद्यते गम्यते ज्ञायतेऽर्थोऽनेनेति पदम्।’[१८३] इति। ननु शुक्लयजुर्वेदानुसारेण उवटभाष्यानुसारेण च यदि अर्थाभिधायिशब्दस्वरूपस्य पदत्वं स्वीक्रियते तदा निपातानां

[१७७] सा. द. २/२
[१७८] काव्यालंकारः ४/३
[१७९] अ. शा. २/१६
[१८०] तै. प्रा. १/५४
[१८१] वा. प्रा. १/१५१
[१८२] तदेव. ३/२
[१८३] वा. प्रा. ३/२ उवटभाष्यम्

आनर्थक्यत्वात् पदसंज्ञा न प्राप्नोति। तर्हि नामाख्यातानि चत्वारि पदजातानि न भवन्ति। अस्यामाशङ्कायामुच्यते निपातानामपि पादपूरणरूपार्थत्वेन अर्थत्वात् अर्थः पदम् इति लक्षणं यथार्थम्। उक्तञ्च भाष्यकृता अनन्तभट्टेन – ''अर्थाभिधायकं यच्छब्दरूपं तत्पदं स्यात्। यद्येवं तर्हि निपातस्यानर्थकत्वात् पदसंज्ञा न प्राप्नोतीति चेत्। नैष दोषः। उपरिष्टादर्थभेदेन पदचतुष्टयं वक्ष्यति। तद्यथा–

क्रियावाचकमाख्यातमुपसर्गो विशेषकृत्।

सत्वाभिधायकं नाम निपातः पादपूरणः॥ इति।

तस्मिन्निपातस्यापि पादपूरणार्थत्वेनार्थत्वात् अर्थः पदमिति साधूक्तमिति।''[१८४] इति। निरुक्तकृता यास्केन चत्वारि पदजातानि स्वीकृतानि- नाम, आख्यातम्, उपसर्गः निपातश्च। उच्यते च निरुक्तग्रन्थे - 'तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च'।[१८५] इति। यद्यपि अत्र साक्षात् पदलक्षणं नोक्तं तथापि अस्मादनुमीयते यद् अर्थवत्वं पदत्वमिति यास्कानुमतं पदलक्षणम्। उपसर्गाः निपाताश्च प्रायेण वाक्येषु पृथक् न प्रयुज्यन्ते, ते नाम्ना आख्यातेन वा सह व्यवह्रीयन्ते। यास्कमतानुसारेण उपसर्गा निपाताश्च अर्थवन्तः। उक्तञ्च तेन – 'तद् य एषु पदार्थः प्राहुरिमे तं नामाख्यातयोरर्थविकरणम्' ।[१८६] इति। यतो हि तेषामर्थो विद्यते तस्मात्तेषां पृथग्रूपेण पदत्वस्वीकारेण अर्थवत्त्वं पदलक्षणमित्यनुमानं न अयौक्तिकम्। अतः अत्रापि अर्थमेवादाय पदलक्षणं यास्काभिमतम् । निरुक्तग्रन्थस्य प्रसिद्धटीकायाम् ऋज्वर्थायां व्याख्यायाम् उक्तं यत् ऐन्द्रसम्प्रदाये एकमेव पदजातं स्वीकृतम्। तत्रोक्तम् – 'अर्थः

[१८४] वा. प्रा. ३/२ अनन्तभट्टभाष्यम्

[१८५] नि. १/१/१

[१८६] तदेव. १/१/४

पदमैन्द्राणामिति' ।[१८७] इति। अतः ऐन्द्रसम्प्रदाये अर्थविशिष्टानां वर्णानां पदत्वं स्वीकृतमासीत्। आचार्यः शौनकः स्वकीये *वृहद्देवता*ग्रन्थ आह –

''अर्थात् पदं स्वाभिधेयं पदाद्वाक्यार्थनिर्णयः।

पदसंघातजं वाक्यं वर्णसंघातजं पदम्॥''[१८८] इति।

अर्थात् स्वाभिधेयं पदम् उत्पद्यते नाम पदं अर्थाभिधायि भवति। तेभ्यः अर्थाभिधायिभ्यः पदेभ्यः वाक्यार्थः निर्णीयते। वाक्यं पदसंघातेन भवति, पदञ्च वर्णसंघातेन जायते। अनेन अर्थविशिष्टस्य वर्णसंघातस्य पदसंज्ञा शौनकाभिमता।

अतः दर्शनशास्त्रेषु प्रातिशाख्येषु व्याकरणशास्त्रे अर्थशास्त्रे च पदलक्षणं पर्यालोच्य दृश्यते यत् कुत्रचित् विभक्त्यन्तार्थविशिष्टवर्णानां पदत्वमङ्गीकृतं कुत्रचिच्च अर्थमेवादाय पदत्वमङ्गीकृतं तत्र विभक्तिविषये किमपि स्पष्टतया नोक्तम्। संहितापाठतः पदपाठकरणसमये पदपाठकृता शाकल्येन प्रायेण विभक्त्यन्तार्थविशिष्टवर्णानां पदत्वमङ्गीकृत्य दण्डेन छेदेन वा पदविभागः प्रदर्शितः। कुत्रचिच्च तेन केवलमर्थमादाय पदविभागः प्रदर्शितः। यथा उपसर्गाणां पृथक्करणकाले विभक्तिशून्यतया तेषां विभागः प्रदर्शितः।

## ३.२ पदविभागः

पदयोः पदानां वा विभागः विच्छेदः पदच्छेदः। संहितानिष्पन्नानां पदानां पृथक्करणं पदच्छेदः। *वाजसनेयिप्रातिशाख्ये* पदच्छेदविषये उक्तम् – 'पदविच्छेदोऽसंहितः'।[१८९] इति। अर्थात् सन्धियुक्तानां पदानां पृथक्तया उल्लेखः पदच्छेदः। तत्रैव उवट आह – 'पदे पदे विच्छेदः

[१८७] नि. १/१/४ दूर्गवृत्तिः
[१८८] वृ. दे. २/११७
[१८९] वा. प्रा. १/१५६

पदविच्छेदः। पदविच्छेदो यदा क्रियते तदा असंहितः पाठः।'[१९०] इति। पूर्वपदस्य अन्तिमवर्णेन सह उत्तरपदस्यादिवर्णस्य मेलनं भवति संहिता। पाणिनिना उक्तम् – 'परः सन्निकर्षः संहिता'[१९१] इति। संहिताविषये ऋग्वेदप्रातिशाख्यकृता शौनकेनोच्यते – "संहिता पदप्रकृतिः। पदान्तान् पदादिभिः सन्दधदेति यत् सा। कालाव्यवायेन" ॥ इति।[१९२] संहिताविच्छेद एव पदच्छेदः। शुक्लयजुर्वेदप्रातिशाख्यस्य भाष्यकृत् अनन्तभट्ट उवाच – '...पूर्वेण पदान्तेन उत्तरः पदादिः संहिता न क्रियते। तदा असंहितः पदपाठो ज्ञेयः।'[१९३] इति।

### ३.३ पदविभागेन मन्त्रार्थप्रकाशः

ऋग्वेदस्य पदपाठकारोऽस्ति शाकल्यः। महर्षिणा शाकल्येन वैदिकमन्त्राणां संहितापाठतः पदपाठः प्रदर्शितः। पदपाठकरणसमये शाकल्येन बह्व्यः पद्धतयः समाश्रिताः। तेन संहितागतमन्त्रे यानि पदानि सन्ति तानि सर्वाण्येव दण्डेन पृथक् प्रदर्शितानि। यद्यपि वेदस्य बहुविधाः पाठप्रकाराः प्राधान्येन तस्य यथायथरक्षणार्थमेव विहिताः, अपितु शाकल्येन यथा पदपाठः प्रस्तुतः तेन न केवलं वेदस्य अक्षुण्णतया रक्षा विहिता अपि च तेन पदपाठे पदविभागमाध्यमेन वेदव्याख्यायां भाष्यरचनायाञ्च भाष्यकारान् बहुधा साहाय्यं विहितम्। यत्र कुत्रचित् निरुक्तकृता यास्काचार्येण सह भाष्यकाराणां पदविभागमादाय विरोधः, यत्र कुत्रचिद् वा पदच्छेदमादाय व्याख्याकारेषु मतभेदो तत्र तु प्रामाणिकतया पदपाठस्थः पदविभाग एव बहुभिः व्याख्यातृभिः स्वीकृतः। पदपाठकारः प्रत्येकेषां मन्त्राणाम् अन्तर्भूतपदानां पृथक्करणं कृत्वा संहितायाः पदपाठं चकार। अनेन पदपाठेन मन्त्राणामर्थावबोधः अतिसुखकरतया भवति। बहुत्र एवं दृश्यते यत् यदा एकस्य पदस्य अर्थमादाय भाष्यकाराणां मध्ये विवादः परिलक्ष्यते

---

[१९०] वा. प्रा. १/१५६. उवटभाष्यम्

[१९१] पा. सू. १/४/१०९

[१९२] ऋ. प्रा. २/१-२

[१९३] वा. प्रा. १/१५६ अनन्तभट्टभाष्यम्

तदा बहवो विद्वांसः शाकल्यमेवानुकुर्वन्ति। शाकल्यकृतपदच्छेदं स्वीकृत्य एव मन्त्रार्थं कुर्वन्ति। यथा ऋग्वेदस्य एकः संहितागतो मन्त्रोऽस्ति –

''अरुणो मासकृद्वृकः पथा यन्तं ददर्श हि।

उज्जिहीते निचाय्य तष्टेव पृष्ट्यामयी वित्तं मे अस्य रोदसी॥''[१९४]इति

अस्याः संहितायाः पदपाठः शाकल्येन एवं प्रदर्शितः –

''अरुणः। मा। सकृत्। वृकः। पथा। यन्तम्। ददर्श। हि।

उत्। जिहीते। निऽचाय्य। तष्टाऽइव। पृष्टिऽआमयी। वित्तम्। मे। अस्य। रोदसी इति॥[१९५]''

अस्य मन्त्रस्य 'मासकृत्' इति संहितागतपदमादाय व्याख्यातृषु मतभेदो दृश्यते। केचित् शाकल्यकृतपदच्छेदं स्वीकृत्य 'मा' 'सकृत्' इति पृथक्पदद्वयं कृत्वा मन्त्रार्थं कुर्वन्ति। केचिच्च 'मासकृत्' इति एकं समस्तपदं मन्वन्ते। निरुक्तकारो यास्कः 'मासकृत्' इति एकं समस्तपदं स्वीकृत्य अर्थमेवं कृतवान् - मासकृत् नाम मासानाम् अर्धमासानां च कर्ता।[१९६] समस्तपदे स्वीकृते मन्त्रार्थ एवं भवति – स्वीयज्योत्स्नया जगत्प्रकाशकः मासानां तथा पक्षाणां कर्ता चन्द्रः स्वीयपथि गच्छतः नक्षत्रान् ददर्श, दृष्ट्वा च पृष्ठरोगाक्रान्तः त्वष्टा इव उद्गतो भवति। हे द्यावापृथिवी विषयमिमम् अवगच्छताम्। परन्तु 'मा' इति पृथक्पदम् 'सकृत्' इति पृथक्पदं च स्वीकृते सति मन्त्रार्थ एवं भवति- लोहितवर्णः वृकः सकृत् (एकवारम्) मार्गेण गच्छन्तं मा (माम्) दृष्टवान्, दृष्ट्वा च मां जिघृक्षुः सन् उद्गच्छति स्म। तत्र दृष्टान्तः - यथा नित्यकुटिलत्वात् उपजातपृष्ठरोगः तदुपगमनाय उत्तिष्ठति तद्वत्। भो द्यावापृथिवी इमं विषयम् अवगच्छताम्।

---

[१९४] ऋ. सं १/१०५/१८

[१९५] तदेव. पदपाठः

[१९६] अरुणो आरोचनो मासकृन्मासानां चार्द्धमासानां च कर्ता...(निरुक्तम् ५/२१)

द्विविधयोः अर्थयोर्मध्ये परवर्तिनि काले भाष्यकाराः द्वितीयमर्थं स्वीकृतवन्तः। अर्थात् ते शाकल्यकृतपदपाठं मान्यतां प्रदाय भाष्यं चक्रुः। पदपाठे यथा मा इति पृथक् पदम्, सकृत् इति पृथक्पदरूपेण च प्रदर्शितम् तथैव पृथक्पदत्वेनाङ्गीकृत्य भाष्याणि चक्रुः भाष्यकाराः। अस्य मन्त्रस्य व्याख्यानकाले स्कन्दस्वामिनोक्तं यथा- 'अरुणः आरक्तवर्णः सकृत् वृकः पथा स्वगृहगमनमार्गेण यन्तं गृहं प्रति गच्छन्तं मा मां ददर्श दृष्टवान्...'[१९७] इति। अस्य मन्त्रस्य व्याख्यानकाले वेङ्कटमाधवेनापि उक्तं यथा- 'तृपितं मां मार्गेण गच्छन्तं पृष्ठतः स्थितः कश्चित् अरुणः वृकः ददर्श हि ....'[१९८] इति। सायणाचार्येण भाष्यं कृतम्-'अरुणवर्णः लोहितवर्णः वृकः अरण्यश्वा सकृत् एकवारं पथा यन्तं मार्गेण गच्छन्तं मां ददर्श हि दृष्टवान्'[१९९] इति। प्रायेण सर्वत्रैव भाष्येषु मा इति पृथक्पदम्, सकृदिति पृथक्पदं दृश्यते। अतोऽनेन परिलक्ष्यते यत् सन्दिग्धेषु स्थलेषु प्रकृतमन्त्रार्थकरणे पदपाठः भाष्यकारान् साहाय्यं विदधाति। पदपाठकारप्रदर्शितः पदपाठ एव अधिकैः व्याख्यातृभिः स्वीकृतः। अपरत्रैकत्रापि निरुक्तकारो यास्कः पदपाठकृतपदच्छेदम् अन्यथाकृत्य मन्त्रव्याख्यानं चकार । ऋक्संहितायाः तृतीयमण्डले एको मन्त्रो यथा-

''न जामये तान्वोˈरिक्थमाˈरैक्चकार गर्भं सनितुर्निधानˈम्।

यदीˈमातरोˈजनयˈन्त वह्निˈमन्यः कर्ता सुकृतोˈरन्य ऋन्धन् ॥''[२००] इति।

संहितागतेऽस्मिन् मन्त्रे 'गर्भं' 'निधानम्' इति द्वयोः पदयोः मध्ये 'सनितुः' इत्यस्य व्यवधानमस्ति । पदपाठकारः शाकल्यः पदपाठकाले अनानुपूर्विकसंहितायाः पृथगवस्थितान् पदान् एकीकृत्य प्रदर्शितवान् यथा 'नरा च शंस्यम्' इत्यत्र 'नराशंस्यम्'। अस्मिन् मन्त्रे तु

---

[१९७] ऋ. सं. १/१०५/१८ स्कन्दस्वामिभाष्यम्

[१९८] तदेव. वेङ्कटमाधवभाष्यम्

[१९९] ऋ. सं. १/१०५/१८ सायणभाष्यम्

[२००] ऋ. सं ३/३१/२

शाकल्येन पदपाठे 'गर्भं' 'निधानम्' च पदद्वयं पृथक्पदरूपेणैव प्रदर्शितः, तन्मध्ये 'सनितुः' इत्यस्य व्यवधानमपि प्रदर्शितं संहितावत्। अस्याः संहितायाः पदपाठो यथा –

''न । जामये । तान्वः । रिक्थम् । अरैक् । चकार । गर्भम् । सनितुः । निऽधानम् ।

यदि । मातरः । जनयन्त । बह्निम् । अन्यः । कर्ता । सुऽकृतोः । अन्यः । ऋन्धन्॥''[२०१]

इति।

निरुक्तकृद् यास्काचार्यः शाकल्यकृतं पदविभागमनादाय 'गर्भं निधानम्' इति पदद्वयम् एकीकृत्य 'गर्भनिधानीम्' एवं प्रकारेण मन्त्रमिदं व्याख्यातवान् तेन उक्तम् – 'न जामये भगिन्यै। तान्व आत्मजः पुत्रो रिक्थं प्रारिचत् प्रादात्। चकारैनां गर्भनिधानीं सनितुर्हस्तग्राहस्य।''[२०२] ....इति। यद्यपि अन्ये भाष्यकाराः गर्भमिति पदं सनितुः इत्यनेन सह अन्वयं कृत्वा मन्त्रार्थं दर्शितवान् परन्तु यास्कः सनितुः इति पदं पृथक् संस्थाप्य गर्भेन सह निधानीमित्यस्य अन्वयपूर्वकं मन्त्रमिदं व्याख्यातवान् – गर्भनिधानीम् नाम गर्भस्य निधानीम् इति। सायणाचार्यस्तु गर्भस्य सनितुः निधानीम् इत्येवं प्रकारेण अन्वयं कृतवान्। उक्तञ्च सायणाचार्येण – '...सनितुः एनां संभजमानस्य भर्तुः गर्भम्। षष्ठ्यर्थे द्वितीया। गर्भस्य निधानं रेतः सेकनिधानीमेनां चकार।'[२०३] इति। यद्यप्यत्र तादृशमर्थपार्थक्यं न परिलक्ष्यते तथाप्यत्र पदद्वयमन्यथा कृत्वा पाठं गर्हितरुपेण उल्लिख्य शौनकः तस्य वृहद्देवताग्रन्थे आह –

''पदव्यवायेऽपि पदे एकीकृत्य निरुक्तवान्।

गर्भं निधानमित्येते न जामय इति त्वृचि॥''[२०४] इति।

---

[२०१] ऋ. सं. ३/३१/२ पदपाठः

[२०२] नि. ३/६/६

[२०३] ऋ. सं ३/३१/२ सायणभाष्यम्

[२०४] वृ. दे. २/११३

अतः अत्र दृश्यते यद्यपि यास्कः पदद्वयमेकपदरूपेण स्वीकृतवान् परन्तु तत्परवर्तिनः भाष्यकाराः शाकल्यकृतपदच्छेदं मान्यतां प्रदाय पृथग्रूपेण अन्वयं स्वीकृतवन्तः। अतः संहितायाः पदपाठस्य विद्यमानाभावे परवर्तिनः भाष्यकाराः अपि यास्काचार्यकृतमन्त्रव्याख्यानमादाय गर्भनिधानीम् इति अनानुपूर्विकसंहिता इति मन्येरन्।

ऋग्वेदसंहिताया दशममण्डलान्तर्गत एकस्मिन् मन्त्रेऽपि पदच्छेदमादाय व्याख्यातृषु मतानैक्यं दृश्यते। सा ऋक् –

“वने न वा यो न्य॑धायि चाकञ्छुचि॑र्वां स्तोमो॑ भुरणावजीगः।

यस्येदिदिन्द्रः॑ पुरुदिने॑षु होता॑ नृणां नर्यो नृत॑मः क्षपावा॑न्॥”[205] इति।

अस्य मन्त्रस्य पदपाठो यथा –

“वने॑ । न । वा । यः । नि । अधायि । चाकन् । शुचिः॑ । वाम् । स्तोमः॑ । भुरणौ । अजीगरिति।

यस्य॑ । इत् । इन्द्रः॑ । पुरुऽदिने॑षु । होता॑ । नृणाम् । नर्यः॑ । नृऽत॑मः । क्षपाऽवान् ॥”[206] इति।

मन्त्रेऽस्मिन् ‘वा यो’ इति संहितांशमादाय विद्वत्सु मतभेदो दृश्यते। निरुक्तकृता यास्काचार्येणात्र ‘वायः’ इत्येकं पदं स्वीकृतम्। परन्तु तत्परवर्तिनः वेदव्याख्याकृतः ‘वा यः’ इति पदद्वयं स्वीचक्रुः। ‘चाकन्’ इति शब्दस्य निर्वचनप्रसङ्गे मन्त्रोऽयमुद्धृतो व्याख्यातश्च। उच्यते च यास्काचार्येण - ‘वने न वायो न्यधायि चाकन्’[207] इति। अस्य व्याख्यानरूपेण

---

[205] ऋ. सं. १०/२९/१

[206] तदेव. पदपाठः

[207] नि. ६/२८/८

यास्काचार्येणोक्तम् - 'वन इव वायो वेः पुत्रश्चायन्निति वा कामयमान इति वा'[२०८] इति। अर्थात् यास्काचार्यमतानुसारेणात्र 'वाय' इत्येकमेव पदम्। तन्नये एकपदं स्वीकृत्य मन्त्रार्थो भवति – हे भुरण्यौ ! पोषकौ धारकौ वा (अश्विनौ) वने न वने इव वृक्षे यथा शकुनिना नीडे वायः वेः पक्षिणः स्वस्य पुत्रः न्यधायि निहितः चाकन् चायन् पश्यन् अथवा कामयमानः तदुत्सुकमना आसीत् । एवमयमस्मासु नीडभूतेषु शकुनिपुत्रभुतः शुचिः व्यपगतसर्वदोषः वां युवयोः स्वभूत एष स्तोमः स्तुतिविशेषः समस्ति । यस्य स्तोमस्य नृणां मनुष्याणां मध्ये नृतमः मनुष्यतमः मनुष्यश्रेष्ठः राजेति । शूराणां मध्ये शूरतमो वा । नर्यः नृभ्यो हितश्च । क्षपावान् रात्रिपर्यायेषु समभागी इन्द्र इत् इन्द्रोऽपि पुरुदिनेषु बहुष्वहःसु होता नित्य आह्वाता भवति ममायं स्तोमः स्यादिति एवंगुणयुक्तेन इन्द्रेणापि यः स्तोमः प्राथ्यर्ते सोऽयमस्मासु वर्तमानो युवां प्रति अजीगः नित्यकालमेव गच्छति इति। स्वकीयव्याख्यानप्रदर्शनादनन्तरं यास्काचार्यः शाकल्यकृतपदविभागस्य दोषप्रदर्शयन्नाह - 'वेति य इति च चकार शाकल्य उदात्तं त्वेवमाख्यातमभविष्यदसुसमाप्तश्चार्थः।'[२०९] इति। तथाहि पदपाठकृता शाकल्येनात्र 'वा' इति एकं पदं 'यः' इति अपरं पदं स्वीकृतम् । परन्तु तदसाधु आख्यातस्य उदात्तत्वाभावात् सुस्पष्टार्थागमाभावाच्च इति यास्काचार्यसिद्धान्तः। यास्काचार्यमतानुसारेण यद्यत्र वा यः ति पृथक् पदद्वयं स्यात्तदा यत्-शब्दात् परस्थितस्य 'न्यधायि' इति आख्यातस्य "यद्वृत्तान्नित्यम्"[२१०] इति सूत्रेण निघातप्रतिषेधेन उदात्तत्वं भवितव्यम् । यतो हि संहितायां न्यधायि इति क्रियापदम् अनुदात्तं वर्तते तस्मात् य इति यत्शब्दस्य रूपं नास्ति । अपि तु वाय इति एकमेव सुबन्तपदं यस्यार्थो वेः पुत्रो नाम पक्षिपुत्रः। वाय इति सुवन्तात् परं विद्यमानत्वात् 'न्यधायि' इति तिङन्तपदं 'तिङ्ङतिङः'[२११] इति सूत्रेण सर्वानुदात्तं जातम् । किञ्च पृथक्पदे

---

[२०८] नि. ६/२८/९

[२०९] तदेव. ६/२८/११

[२१०] पा. सू. ८/१/६६

[२११] तदेव. ८/१/२८

स्वीकृते सति मन्त्रार्थोऽपि सुस्पष्टयता न ज्ञायते। 'वा' इति पृथक्पदत्वे वा-शब्दस्यार्थः कः इति जिज्ञासा उदेति। वा इत्यस्य विकल्पसमुच्चययोः द्वयोः अर्थयोः कोऽपि अत्र न प्रवर्तते। तस्मात् आख्यातस्य निघातत्वात् सुस्पष्टार्थागमाभावाच्च वाय इत्येकमेव पदं यस्यार्थः शकुनिपुत्रः इति उपपद्यते । अत्रैवोच्यते निरुक्तवृत्तिकृता दुर्गाचार्येण – "एतस्मिन्निगमे पदविभागतः कश्चिद् विचारोऽस्ति। तमाह भाष्यकारः, 'वा इति च, यः इति च, चकार शाकल्यः' इति। 'वा' इति 'यः' इति च पदे चकार शाकल्यः पदकारः। तदेतद् विचार्यमाणं न साधु भवति। किं कारणम्? 'उदात्तं त्वेवमाख्यातमभविष्यत्'। एवम् एतस्मिन् पदद्वये सति यदेतद् आख्यातम् न्यधायीति, एतद् उदात्तम् अभविष्यत् यद्वृतात् परस्य नित्यमाख्यातस्य निघातो न भवतीति लक्षणविदो न मन्यन्ते, न चेदमुदात्तम्, तस्मात् यः इति नेदं यद्वृत्तम्। किं तर्हि? वायः इति एकं पदम्। किञ्च, 'असुसमाप्तश्चार्थः' अपुष्कलः, एवमेतस्मिन् पदद्वये सति मन्त्रस्यार्थोऽसुसमाप्तो भवति। कथम्? द्विपदत्वे हि सति 'वा' शब्दस्यार्थेन केनचिद् भवितव्यम्, न चेह विकल्पः समुच्चयो वा कश्चिदर्थोऽस्ति । स्यादेतत्, उपमार्थो भविष्यतीति, तदपि न सम्भवति, नकारेण उपमार्थस्य कृतत्वात् य इत्यस्यापि पृथग्भूतस्य न कश्चिदर्थोऽस्ति । तस्मादाख्यातस्यानुदात्तत्वादर्थासम्भवाच्च द्विपदत्वे, 'वायः' इत्येतदेकपदमेव, 'शकुनिपुत्रः' एव चास्याभिधेयः उपपद्यते"[२१२] इति। लक्ष्मणस्वरूपमहाभागेनाप्युक्तम् - "As a trembling, or anxiously longing, young bird, i.e. the young offspring of a bird. Śākalya has analysed vāyaḥ in vā and yaḥ: then the finite verb would have had the acute accent, and the sense have been incomplete."[२१३] इति।

परवर्तिनि काले प्रसङ्गेऽस्मिन् व्याख्यातृषु मतानैक्यं परिलक्ष्यते । कैश्चिद् यास्काचार्यमतमादाय व्याख्यानं कृतम्, कैश्चिच्च पदपाठकारशाकल्यकृतपदविभागमादाय

---

[२१२] नि. दुर्गवृत्तिः ६/२९/५

[२१३] Lakshman Sarup, *Nighaṇṭu and the Nirukta*, p -109

व्याख्या विहिता। व्याख्याकृता उद्गीथेन शाकल्यकृतपदच्छेदमादाय भाष्यं विरचितम्। तेन 'वा' इति पृथक् पदम्, 'यः' इति पृथक्पदं स्वीकृत्य व्याख्या विहिता। अपि च तेन यः इति पृथक्पदस्य अर्थश्च स्पष्टतयोल्लिखितः। तन्नये मन्त्रेऽस्मिन् इन्द्रदेवताकत्वात् सामर्थ्येन यच्छब्दस्यार्थः सोम इति आगच्छति। उत्तरपदे च तच्छब्दस्याध्याहारेण मन्त्रार्थस्य सुसमाप्तिर्भवति। अपि च यास्काचार्येण यत् 'वने न वायः' इत्यत्र न इति निपातस्य उपमार्थः स्वीकृतः, उद्गीथेन न इति निपातस्यार्थः 'सम्प्रति' इत्यर्थः प्रदर्शितः। उच्यते च उद्गीथेन – "...यच्छब्दसम्बन्धाच्च तच्छब्द उत्तरे पदे अध्याहार्यः। यच्छब्देनात्र सामर्थ्यात् सोमो निर्दिश्यते। यः सोमः चाकन् इन्द्रेणात्मनः पानं कामयते। यच्छब्दश्रुतेस्तच्छब्दोऽध्याहार्यः। स सोमो वने न वा नशब्दः सम्प्रत्यर्थे। वने वनविकारे वृक्षावयवे पात्रे द्रोणकलसादौ च ध्रुवस्थाल्यादौ वा मृन्मये नि अधायि निहितः इन्द्रार्थमस्माभिः स्थापितः। किञ्च शुचिः शुद्धः सर्वदोषरहितः वाम् युवयोः पत्नीयजमानयोः स्वभूतः स्तोमः स्तुतिविशेषः हे भुरणौ! यज्ञेन सर्वस्य जगतः भर्तारौ! स्वर्गन्तारौ! वा कर्मानुष्ठानेन अजीगः इन्द्रस्य गुणानशेषान् गृह्णाति। यस्य स्तोमस्य। इत्शब्दोऽनर्थकः। इन्द्रः पुरुदिनेषु बहुष्वहस्सु होता। 'ह्वयति' (निघ. ३.१४) इत्यर्चतिकर्मा। स्तोता नास्तीदृशः स्तोम इति प्रशंसितेत्यर्थः, मां प्रति अयमागच्छतु मा गादन्यत इत्याह्वाता वा। स इन्द्रस्य गुणानशेषान् गृह्णातीति सम्बन्धः कार्यः। कीदृशः, नर्यः नृभ्यो हितः नृणाम् मनुष्याणां नृतमः प्रकृष्टमनुष्यश्च क्षपावान् अतिरात्रे क्रतौ यागानां स्तोतृणाञ्चाङ्गभूतया विशिष्टया रात्र्या तद्वांश्चेत्यर्थः।"[२१४] इति।

उद्गीथेनादौ शाकल्यकृतपदच्छेदमादाय व्याख्यानं प्रदर्श्य ततो यास्काचार्याभिमतं पदविभागमादायापि मन्त्रार्थः प्रदर्शितः। उच्यते च तेन – "इदानीं यास्कविधिनार्थ उच्यते – वृक्षे यथा वायः वेः पुत्रः पक्षी। पुत्रः कः। अनुजातपक्षकः। नि अधायि मात्री निहितः स्थापितः। तां

[२१४] ऋ. सं. १०/२९/१ उद्गीथभाष्यम्

चरित्वा आगच्छन्तीं निरीक्षते तदागमनं कामयते । एवम् इन्द्रः श्रोतुमागच्छतीतीन्द्रादमनम् चाकन् चायन् पश्यन् कामयमानो वापि शुचिः शुद्धः सर्वदोषरहितः वाम् युवयोः स्वभूतः स्तोमः हे भूरण्यौ! अजीगः गुणग्रहणद्वारेणेन्द्रम् आगच्छन्तमेव गृह्णाति । उत्तरोऽर्धर्चः समानार्थः पूर्वेण।"[२१५] इति।

भाष्यकृता वेङ्कटमाधवेनापि स्वकीयभाष्ये अस्य मन्त्रस्यार्थप्रदर्शनकाले प्रसङ्गतः यद्यपि यास्कमतमुल्लिखितं तथापि तेनादौ तु शाकल्यकृतपदच्छेदं स्वीकृतिं प्रदाय मन्त्रार्थः प्रदर्शितः। 'वा' इति पृथक् पदं 'यः' इति पृथक् पदं च स्वीकृत्य तेन मन्त्रार्थः क्रियते –"वृक्षे इव गच्छन् पक्षी निहितः इन्द्रं कामयमानः सोमः पात्रेषु शुचिः च वाम् स्तोमः हे भरणशीलौ! इन्द्रकुत्सौ! निर्गमयति। यस्य एव इन्द्रः पानेन बहुषु दिनेषु शत्रूणाम् आह्वाता नृणाम् नृतमः निहितक्षपावान् भवति हिनस्ति शत्रून् इति"[२१६] इति । प्रसङ्गतस्तेन यास्काचार्यमतमत्रोत्थापितम् – "यास्कः तु वायः इति पदम् एकं मन्यते, यदाह – वन इव । वायो वेः पुत्रः। चायन्निति वा । कामयमान इति वा । वेति च य इति च चकार शाकल्यः। उदात्तं त्वेवम् आख्यातमभविष्यत् । असुसमाप्तश्चार्थः इति।"[२१७] इति।

अत्रेदमवधेयं यत् यद्यपि वेङ्कटमाधवेन प्रसङ्गप्राप्तं यास्काचार्यमतमुत्थापितं परन्तु तद्दृष्ट्या मन्त्रार्थस्तेन न प्रदर्शितः। यद्यपि उद्गीथेन वेङ्कटमाधवेन च यास्काचार्यमतमुल्लिखितं परन्तु पदविभागस्य साधुत्वासाधुत्वादिविषये किमपि नोक्तम् । किञ्च मन्त्रस्यास्य व्याख्यानकाले ताभ्यां पदपाठकारशाकल्यप्रदर्शितपदविभागस्य प्राधान्यं स्वीकृतमिति तु स्पष्टमेव।

---

[२१५] ऋ. सं १०/२९/१ उद्गीथभाष्यम्

[२१६] तदेव. वेङ्कटमाधवभाष्यम्

[२१७] तत्रैव

यद्यपि बहुत्र परवर्तिभिर्भाष्यकारैः शाकल्यकृतपदच्छेदं स्वीकृत्य यास्काचार्यकृतपदविभागो स्पष्टतया निराकृतः परन्त्वत्र तथा न दृश्यते। सम्भवतः 'वा' इति 'यः' इति चैवंप्रकारेण द्विपदत्वे स्वीकृते यास्काचार्येण परवर्तिनः 'न्यधायि' इति आख्यातस्य आद्युदात्तत्वं भवितव्यं 'यद्वृत्तान्नित्यम्'[२१८] इति सूत्रेण इति यदुक्तं तस्य निराकरणाय कापि समीचीना युक्तिर्नोपलभ्यते इत्यस्मादेव कारणाद् मन्यते भाष्यकारैः यास्काचार्यमतमत्र स्पष्टतया निराकर्तुं न शक्यते।

एवंप्रकारेण यत्र यत्र पदविभागप्रसङ्गे व्याख्यातृषु मतानैक्यं दृश्यते, तत्र तत्र महर्षिणा शाकल्येन पदपाठे प्रदर्शितः पदविभाग एव प्रामाणिकत्वेन अधिकैः विद्वद्भिः स्वीकृतः। ऋग्वेदसंहितायाः बहूनि स्थानानि सन्ति यत्र पदपाठेन विना मन्त्रार्थो न कर्तुं शक्यते। महर्षिणा शाकल्येन दण्डेन पदविभागो न प्रदर्शितश्चेत् तदा सुस्पष्टपदविभागाभावे भाष्यकृद्भिः भाष्यं कर्तुं न शक्यते। यतो हि संहितायाः तेष्वंशेषु पदच्छेदो बहुधा कर्तुं शक्यते तस्मात् संहितायां कः पदविभाग इष्टः, केन पदविभागेन मन्त्रार्थस्य अनिष्टापत्तिर्न भवति तत् पदपाठेन विना न ज्ञायते। यथार्थपदविभागाभावे च मन्त्रार्थस्यानिष्टापत्त्या सम्यक् देवतास्मरणं तत्फलञ्च न प्राप्यते। अपि तु विपरीतफलप्राप्तेराशङ्का समुदेति। एवंविधेषु स्थलेषु पदपाठकृता शाकल्येन यथार्थपदविभागेन भाष्यकारान् साहाय्यं विहितम्। तेषां सन्दिग्धस्थलानां कतिपयानां विचारोऽधः प्रस्तूयते।

ऋग्वेदसंहितायाः प्रथममण्डलान्तर्गत एक मन्त्रो यथा –

''त्वम॑ग्ने प्रय॑तदक्षिणं॒ नरं॒ वर्मे॑व स्यू॒तं परि॑ पासि वि॒श्वतः॑।

[२१८] पा. सू. ८/१/६६

स्वादुक्षद्मा यो वसतौ स्योनकृज्जीवयाजं यजते सोपमा दिवः"।।[२१९] इति।

आङ्गिरसेन हिरण्यस्तूपेन दृष्टेऽस्मिन् मन्त्रे स्तुतो देवोऽग्निः। अस्य मन्त्रस्य 'सोपमा दिवः' इत्यंशे मन्त्रार्थकरणकाले पदविभागमादाय संशयो दृश्यते। 'सोपमा' इत्यस्य पदच्छेदः प्रथमतः सा उपमा इति पदद्वयं भवितुमर्हति । द्वितीयतः 'सोपमा' इति उपमया सह विद्यमाना इति बहुव्रीहिसमासनिष्पन्नमेकमेव पदं भवितुमर्हति ।

'सा उपमा' इति पदच्छेदे कृते तत्पदेन यजमानस्य बोधो न भवति, 'सा' इत्यस्य स्त्रीलिङ्गकत्वात् । बहुव्रीहिसमासे स्वीकृते सति यजमानभिन्नस्य कस्यचिद् बोधो जायते। पुनश्च बहुव्रीहिसमासे स्वीकृते 'सोपमा दिवः' इत्यंशे दिवः इति षष्ठ्यन्तपदेन सह अन्वयो न सम्भवति, एकदेशेन समासत्वात् । अतः सामर्थ्याभावात् 'सोपमा' इति बहुव्रीहिसमासनिष्पन्नम् एकमेव पदमिति न स्वीकर्तुं शक्यते। यतो हि स उपमा दिवः, स दिवः उपमा इति दिवः इत्यनेन सम्बन्ध उपमा इत्यस्य। सा उपमा इति स्वीकर्तुं न शक्यते तत्पदेन अपेक्षितस्य यजमानस्य सम्बन्धाभावात्। तत्पदेन अपेक्षितेन यजमानेन सम्बन्धोऽपेक्षितश्चेत्तर्हि 'सः उपमा दिवः' इति पदविभागः कर्तव्यः। आपातदृष्ट्या सः उपमा इति पदविभागे कृते 'सस् उपमा' इति स्थितौ 'ससजुषो रुः'[२२०] इति सूत्रेण स रु उपमा इति जाते 'भो-भगो-अघो-अपूर्वस्य योऽशि'[२२१] इति सूत्रेण रोर्यादेशो भवति। तेन सय् उपमा इत्यवस्थायां 'लोपः शाकल्यस्य'[२२२] इति सूत्रेण यलोपो भवति । तेन स उपमा इति जायते। 'स उपमा' इति स्थितौ पुनः 'आद् गुणः'[२२३] इति सूत्रेण गुणैकादेशे सोपमा इति कर्तुं न शक्यते, 'पूर्वत्रासिद्धम्'[२२४] इति नियमेन

---

[२१९] ऋ. सं १/३१/१५

[२२०] पा. सू. ८/२/६६

[२२१] तदेव. ८/३/१७

[२२२] तदेव. ८/३/१९

[२२३] तदेव. ६/१/८७

[२२४] तदेव. ८/२/१

तद्दृष्ट्या लोपस्यासिद्धत्वात्। अतः आपातदृष्ट्या 'सोपमा' इत्यस्य यजमानेन सम्बन्धवशात् 'सः उपमा' इति पदविभागः कर्तुं न शक्यते । बहुव्रीहिरपि न सम्भवति अन्वयाभावादिति पूर्वमेवोक्तम्। अतः अत्र पदपाठाद् विना पदविभागस्तु संशयाविष्टः। पदपाठं विना पदविभागविषये संशयो न निरस्यते, मन्त्रार्थोऽपि यथार्थया प्रतिपादयितुं न शक्यते। अस्य मन्त्रस्य पदपाठ एवमस्ति –

> "त्वम् । अग्ने । प्रयतऽदक्षिणम् । नरम् । वर्मऽइव । सूतम् । परि । पासि । विश्वतः ।
>
> स्वादुऽक्षद्मा । यः । वसतौ । स्योनऽकृत् । जीवऽयाजम् । यजते । सः । उपऽमा । दिवः ॥"[२२५] इति।

पदपाठे 'सोपमा दिवः' इत्यस्य 'सः । उपऽमा । दिवः' इति पदविभागः प्रदर्शितः। पदपाठं दृष्ट्वैवावगम्यते यत् 'सोपमा' इत्यत्र समासो नास्ति, समासे सति पदपाठे एकपदरूपेण दर्शयितव्यम् अवग्रहेण च पृथक् स्थातव्यम्। अतः बहुव्रीहिसमासनिष्पन्नं 'सोपमा' इत्येकमेव पदमिति पक्षः निराकृतः। 'सः उपमा' इति पदपाठं दृष्ट्वा एव ज्ञायते यदत्र 'सः उपमा' इत्यनयोः पदयोर्मध्ये 'सोऽचि लोपे चेत् पादपूरणम्'[२२६] इति सूत्रेण 'सस् उपमा' इत्यवस्थायां सोः लोपो जातः पादश्च पूरितः इति। तेन 'सः' इति पदेन मन्त्रप्रतिपादितेन यजमानेन सह सम्बन्धः कर्तुं शक्यते। अतः अस्याः ऋचः भाष्यरचनायां सायणाचार्येणोच्यते – "हे अग्ने! त्वं प्रयतदक्षिणं येन यजमानेन ऋत्विग्भ्यो दक्षिणा दत्ता तादृशं नरं पुरुषं यजमानं विश्वतः सर्वतः परि पासि सम्यक् पालयसि। तत्र दृष्टान्तः ...यः यजमानः जीवयाजं जीवयजनसहितं यज्ञं यद्वा जीवनिष्पाद्यं यजते अनुतिष्ठति सः यजमानः दिवः स्वर्गस्य उपमा दृष्टान्तो भवति..."[२२७] इति। अतो भाष्यत एव

---

[२२५] ऋ. सं १/३१/१५ पदपाठः

[२२६] पा. सू. ६/१/१३०

[२२७] ऋ. सं १/३१/१५ सायणभाष्यम्

प्रतीतिर्भवति यत् ‘सोपमा दिवः’ इत्यत्र तत्पदेन सम्बन्धः यजमानस्य, नोपमायाः। ‘उपमा’ इत्यस्य च सम्बन्धः ‘दिवः’ इति पदेन। एतच्च पदपाठे पदविभागेनैव स्पष्टीभवति। एवंप्रकारेण पदपाठकारो महर्षिः शाकल्यः पदविभागमाध्यमेन मन्त्रार्थकरणे साहाय्यं व्यदधत्। अत्र पदपाठे ‘सोऽचि लोपे चेत्पादपूरणम्’[२२८] इत्यस्य यः प्रयोगः शाकल्येन सूचितः, सायणाचार्येणापि स्वकीयभाष्ये तस्योल्लेखो विहितः। उक्तञ्च सायणाचार्येण - ‘...सोपमा। सोऽचि लोपे चेत् पादपूरणम्, इति संहितायां सोर्लोपः’[२२९]। इति।

अस्या एव ऋचो व्याख्यानरूपेण स्कन्दस्वामिनोच्यते – “त्वम् हे अग्ने! प्रयतदक्षिणम् प्रयच्छतिर्दानार्थः। दत्तदक्षिणम्। अथवा यमु बन्धने। प्रबद्धदक्षिणम्। सन्ततदक्षिणादानमित्यर्थः...यश्च जीवयाजम् यजते जीवो जन्तुः तेन यो यागः स जीवयागः। यज्ञियपशुलक्षणेन जन्तुना यथेष्टं भवति तथा यः यजत इत्यर्थः। सः उपमा दिवः उपमे (निघ. २,१६) इति अन्तिकनाम। तात्स्थ्यात् ताच्छाब्द्यम्। प्रथमैकवचनस्यायमाकारः। अन्तिकस्थः सन्निकृष्टो दिवः। स त्वत्प्रसादात् स्वर्गं प्राप्नोतीत्यर्थः। अथवा दिवः स्वर्गस्योपमा उपमानं स भवति”[२३०] इति। अत्रापि दृश्यते यत् ‘सोपमा दिवः’ इत्यंशे तत्पदेन परामृष्टो यजमानः, उपमायाः सम्बन्धश्च ‘दिवः’ इति पदेन। स एव इष्टः पदविभागः पदपाठे महर्षिणा शाकल्येन प्रदर्श्य वेदव्याख्यातृभ्यः साहाय्यं विहितम्। व्याख्याकृता वेङ्कटमाधवेनास्य मन्त्रस्य व्याख्यानप्रसङ्गे उच्यते –“त्वम् अग्ने! दरिद्रेभ्यः प्रदत्तधनम् मनुष्यं कवचमिव उरसि बद्धमिषुभ्यः सर्वेभ्यो दुरितेभ्यः परिरक्षसि। स्वाद्वन्नः यः गृहे दरिद्राणां सुखकृत् जीवानामन्नप्रदानाद् यज्ञं करोति, सः स्वर्गस्य उपमा अन्तिके वर्तते।” इति।[२३१] वृत्तिकृता

---

[२२८] पा. सू. ६/१/१३४

[२२९] ऋ. सं १/३१/१५ सायणभाष्यम्

[२३०] तदेव. स्कन्दस्वामिभाष्यम्

[२३१] तदेव. वेङ्कटमाधवभाष्यम्

मुद्गलेनापि शाकल्यप्रदर्शितपदविभागमादाय व्याख्यानं विहितम्। उक्तञ्च तेन – "हे अग्ने! त्वम् प्रयतदक्षिणम् येन यजमानेन ऋत्विग्भ्यो दक्षिणा दत्ता तादृशं नरं पुरुषं यजमानं विश्वतः सर्वतः परिपासि सम्यक् पालयसि। दृष्टान्तः। स्यूतम् निश्छिद्रत्वेन सूचीभिः सम्यक् निष्पादितम् वर्मेव यथा कवचं युद्धे पालयति तद्वत्। स्वादुक्षद्मा स्वाद्वन्नः वसतौ निवासभूते स्वगृहे स्येनकृत् अतिथीनां सुखकारी सः यजमानः जीवयाजम् जीवयजनसहितं यज्ञम् यजते अनुतिष्ठति। सः यजमानः दिवः स्वर्गस्य उपमा दृष्टान्तो भवति।"[२३२] इति।

अतः भाष्याणि पर्यालोच्य एतदवगम्यते यत् प्रथममण्डलान्तर्गताया अस्या ऋचः तुरीये पादे यथार्थपदार्थनिर्णये पदपाठ एव शरणम्। तदभावे न केवलं पदार्थस्यानिष्टापत्तिरपि तु तदभावे यथार्थमन्त्रार्थस्य अनिष्टापत्तिरपि समापतति।

एवंप्रकारेण द्वितीयमण्डलान्तर्गतैका ऋक् –

"सु॒प्र॒वा॒च॒नं तव॑ वीर वी॒र्यं॑१ यदेके॑न॒ क्रतु॑ना वि॒न्दसे॒ वसु॑।

जा॒तुष्ठि॑रस्य॒ प्र वय॒ः सह॑स्वतो॒ या च॒कर्थ॒ सेन्द्र॒ विश्वा॑स्यु॒क्थ्य॑ः।।" इति।[२३३]

अस्या ऋचो गृत्समद ऋषिर्देवता इन्द्रश्च । अनया ऋचा ऋषिणा इन्द्रदेवतायाः स्तुतिर्विहिता। मन्त्रस्यास्य अर्थकरणकाले तुरीये पादे 'सेन्द्र विश्वास्युक्थ्यः' इत्यंशे पदविभागमादाय संशयो दृश्यते। 'सेन्द्र' इत्यस्य पदच्छेदः सा इन्द्रः इति पदद्वयं भवितुमर्हति। सा इन्द्र इत्यवस्थायाम् 'आद्गुणः'[२३४] इति सूत्रेण गुणैकादेशे सेन्द्र इति भवितुमर्हति। अपि च इन्द्रेण सह विद्यमान इत्यर्थे बहुव्रीहिसमासे सेन्द्र इति एकमेव पदं भवितुमर्हति। सा इन्द्र इति पदच्छेदे स्वीकृते तत्पदेन मन्त्रप्रतिपादितायाः देवतायाः इन्द्रस्य बोधो न भवति, सा इत्यस्य स्त्रीलिङ्गकत्वात्।

[२३२] ऋ. सं १/३१/१५ मुद्गलीया वृत्तिः

[२३३] ऋ. सं २/१३/११

[२३४] पा. सू. ६/१/८७

बहुव्रीहिसमासे स्वीकृते इन्द्रेतरस्य कस्यचिद् बोधो जायते, बहुव्रीहौ अन्यार्थप्राधान्यत्वात्। 'सेन्द्र' इत्यत्र तत्पदेन मन्त्रप्रतिपादितस्य देवस्य सम्बन्धः अपेक्षितश्चेत् तदा सः इन्द्रः इति पदविभागः कर्तव्यः। आपातदृष्ट्या आदौ 'सः इन्द्रः' इति पदविभागे कृते सस् इन्द्रः इत्यवस्थायां 'ससजुषो रुः'[२३५] इति सूत्रेण रुत्वे स रु इन्द्रः इति जायते। स रु इन्द्रः इति जाते 'भो-भगो-अघो-अपूर्वस्य योऽशि'[२३६] इति सूत्रेण रोर्यादेशे स य् इन्द्रः इति स्थिते 'लोपः शाकल्यस्य'[२३७] इति सूत्रेण यकारस्य लोपे 'स इन्द्रः' इति प्राप्यते। एवमवस्थायां 'स इन्द्रः' इत्यनयोर्मध्ये 'आद्गुणः'[२३८] इति सूत्रेण गुणैकादेशे प्राप्ते तन्न कर्तुं शक्यते, गुणविधेः दृष्ट्या लोपस्यासिद्धत्वात् 'पूर्वत्रासिद्धम्'[२३९] इति नियमेन। अतः सेन्द्रः इत्यस्य आपातदृष्ट्या सः इन्द्रः इति पदविभागः कर्तुं न शक्यते। अपि च सा इन्द्रः इति पदविभागे कृते पूर्वस्थेन 'या' इत्यनेन पदेन तस्य सम्बन्धो जायते । तदपि न यथार्थम्, यत्पदस्य विश्वपदेन सह सम्बन्धत्वात् । अतः अत्र यथार्थमन्त्रार्थव्याख्यानार्थं पदविभागः संशयापन्नः। पदपाठेन विना संशयोऽयं निराकर्तुं न शक्यते । यथार्थतया मन्त्रार्थप्रतिपादनाय पदविभागविषये पदपाठेनैव संशयो निरस्यते। अस्य मन्त्रस्य पदपाठो यथा –

"सुऽप्रवाचनम् । तवं । वीर । वीर्यम् । यत् । एकेन । क्रतुना । विन्दसे । वसु ।

जातुऽस्थिरस्य । प्र । वयः । सहस्वतः । या । चकर्थ । सः । इन्द्रः । विश्वा । असि । उक्थ्यः ॥"[२४०] इति।

---

[२३५] पा. सू. ८/२/६६

[२३६] तदेव. ८/३/१७

[२३७] तदेव. ८/३/१९

[२३८] तदेव. ६/१/८७

[२३९] तदेव. ८/२/१

[२४०] ऋ. सं २/१३/११ पदपाठः

पदपाठे 'सेन्द्र विश्वास्युक्थ्यः' इत्यस्य 'सः । इन्द्रः । विश्वा । असि । उक्थ्यः।' इति पदविभागः प्रदर्शितः। पदपाठं दृष्ट्वैवावगम्यते यत् सेन्द्र इत्यत्र समासो नास्ति। समासे सति अवग्रहेण पृथक् भवितव्यम्। अतः बहुव्रीहिसमासनिष्पन्नं सेन्द्र इति एकमेव पदमिति पक्षो निराकृतः। अपि च सा इन्द्रः इति पदद्वयात्मकः पक्षोऽपि निराकृतः पदपाठतः। पदपाठे सः इन्द्रः इति पदविभागं दृष्ट्वा ज्ञायते यत् सः इन्द्रः इत्यनयोः पदयोर्मध्ये 'सोऽचि लोपे चेत्पादपूरणम्'[२४१] इति सूत्रेण सस् इन्द्रः इति स्थिते अचि परे सोर्लोपो जातः, पादश्च पूरितः।

आपातदृष्ट्या 'भो-भगो-अघो-अपूर्वस्य योऽशि' इति सूत्रेण रोर्यादेशे 'लोपः शाकल्यस्य' इति सूत्रेण यलोपे कृते ततः आद्गुणः इति सूत्रेण गुणैकादेशे यद्यपि सः इन्द्रः इत्यस्मात् सेन्द्रः इति भवितुं नार्हति तथापि 'सोऽचि लोपे चेत्पादपूरणम्' इत्यनेन सूत्रेण सः इन्द्रः इत्यस्मात् सेन्द्रः इति भवतीति पदपाठत एव सूच्यते । पदपाठे सः इन्द्रः इति पदविभागं दृष्ट्वा अत्र पदविभागविषये यः संशय आसीत्तस्य निरसनं जातम् । तेन सेन्द्रः इति संहितांशे तत्पदेन मन्त्रप्रतिपादितदेवतया इन्द्रेण सम्बन्धः कर्तुं शक्यते। स एवान्वयः अत्रेष्टः अपेक्षितश्च । तस्मादेव दृश्यते भाष्यकारैरत्र तत्पदस्य इन्द्रेणान्वयं दर्शयित्वा मन्त्रव्याख्यानं कृतम् । भाष्यकृता सायणाचार्येणात्रोच्यते – "वीर वलवन् हे इन्द्र तव वीर्यं सामर्थ्यं सुप्रवाचनम् सुष्ठु प्रवचनीयम् । सर्वैः श्लाघनीयमित्यर्थः। एकेन क्रतुना कर्मणा वसु विन्दसे शत्रूणां धनं लभसे...या यानीमान्यान्यानि विश्वा सर्वाणि कर्माणि चकर्थ कृतवानसि । सः तादृशस्त्वम् उक्थ्यः सर्वैः प्रशंसनीयो भवसि।"[२४२] इति । अत्र दृश्यते यत् 'सेन्द्र' इति संहितांशे तत्पदेन समीचीनः अन्वयः इन्द्र इत्यस्यैव । तादृशश्च पदविभागः पदपाठत एवावबोद्धुं शक्यते। पदपाठत एव ज्ञायते यत् सेन्द्र इत्यत्र पदविभागः सा इन्द्र एवं न, परन्तुः सः इन्द्रः एवमेव। अस्यैव मन्त्रस्य

---

[२४१] पा. सू. ६/१/१३०

[२४२] ऋ. सं २/१३/११ सायणभाष्यम्

व्याख्यानप्रसङ्गे वेङ्कटमाधवेनोच्यते - 'सुष्ठु प्रकर्षेण सर्वसन्निधाने प्रकाश्यम् तव हे वीर! वीर्यं यत् त्वम् एकेन कर्मणा शत्रुभ्यो धनं लभसे। जायमानस्थैर्यस्य प्ररिच्यन्ते अन्नानि बलवतः तव, यानि त्वं कृतवान् असि आहृतवान् असि शत्रुभ्यः सर्वाणि। सः त्वम् इन्द्र! सर्वदा स्तुत्यः असि।'[२४३] इति। अतो दृश्यते भाष्यकृता वेङ्कटमाधवेनापि तत्पदेन इन्द्र एव परामृष्टः। तेनापि शाकल्यप्रदर्शितपदविभागमादाय भाष्यं विरचितम्। अत्रेदमवधेयं यत् व्याख्याकाराः पदपाठे प्रदर्शितेन पदविभागेन संशयव्यपगताः सन्तः संहितायाः प्रकृतार्थव्याख्याने समर्था भवन्ति। अन्यथा एतादृशेषु स्थलेषु पदपाठस्य विद्यमानाभावे एकस्यैव संहितांशस्य बहुधा पदविच्छेदे सम्भवे सति भाष्यकृतः मन्त्रार्थव्याख्यानकाले नैकमत्यं भजमाना दृश्यन्ते। तैः पृथक् पृथक् पदविभागं स्वीकृत्य मन्त्रार्थे प्रदर्शिते पाठकैः विद्यार्थिभिश्च प्रकृतमन्त्रार्थज्ञाने असौविध्यं स्यात्। यद्यपि एतादृशेषु स्थलेषु पदविभागमादाय व्याख्यातृषु मतभेदो नास्ति तथापि पदपाठकृता एतेषु संशयाविष्टस्थलेषु प्रकृतं पदविच्छेदं प्रदर्श्य वेदस्य यथार्थतया अर्थज्ञाने तथार्थव्याख्याने महत् श्लाघनीयं सम्पादितम्।

एवंप्रकारेण संशयापन्नोऽपर एको मन्त्रो यथा –

"सास्मा अरं प्रथमं स द्वितीयमुतो तृतीयं मनुषः स होता।

अन्यस्या गर्भमन्य ऊं जनन्त सो अन्येभिः सचते जेन्यो वृषा॥"[२४४] इति।

अनया ऋचा ऋषिः गृत्समद इन्द्रदेवतां स्तौति। अस्य मन्त्रस्य प्रथमे पादे पदपाठाभावे पदविभागकाले संशयो दृश्यते। 'सास्मा अरं प्रथमम्' इत्यंशे आपातदृष्ट्या 'सा अस्मा' इति पदविभागः कर्तुं शक्यते। सा अस्मा इति पदविभागे स्वीकृते तत्पदेन न इन्द्रस्य न वा सोमस्य अन्वयो भवितुमर्हति, तस्य स्त्रीलिङ्गकत्वात्। इन्द्रेण सोमेन वा अन्वयः काङ्खितश्चेत् तदा

---

[२४३] ऋ. सं २/१३/११ वेङ्कटमाधवभाष्यम्

[२४४] ऋ. सं. २/१८/२

तत्पदस्य पुंलिङ्गेन भवितव्यम्। तथा सति ‘सः अस्मा’ इति पदविभागोऽपेक्षितः। परन्त्वापातदृष्ट्या पूर्ववत् सः अस्मा इत्यनयो सन्धौ सास्मा इति रूपं नागच्छति। ‘सस् अस्मा’ इत्यवस्थायां ‘ससजुषो रुः’[२४५] इति सूत्रेण सोः रुत्वे ‘स रु अस्मा’ इति जाते ‘भो-भगो-अघो-अपूर्वस्य योऽशि’[२४६] इत्यनेन सूत्रेण रोर्यादेशे ‘स य् अस्मा’ इति भवति। ततः ‘लोपः शाकल्यस्य’[२४७] इत्यनेन यलोपे स अस्मा इति रूपं प्राप्यते। अत्र पुनः ‘अकः सवर्णे दीर्घः’[२४८] इति सूत्रेण सवर्णदीर्घे प्राप्ते तन्न कर्तुं शक्यते, ‘पूर्वत्रासिद्धम्’[२४९] इति नियमेन सवर्णविधेः दृष्ट्या लोपस्यासिद्धत्वात्। तर्हि दृश्यते यत् आपातदृष्ट्या सास्मा इत्यस्य यज्ञेन सोमेन वा अन्वयवशात् ‘सः अस्मा’ इति पदविभागं कृत्वा मन्त्रार्थो व्याख्यातुं न शक्यते । अतोऽत्र पदपाठाद् विना पदविभागः संशयापन्नः। पदपाठं दृष्ट्वैव सम्यक् पदविभागेन तत्पदस्य सोमेन यज्ञेन वा सम्बन्धं स्वीकृत्य मन्त्रार्थस्य परिष्करणं सम्भवति । अस्य मन्त्रस्य पदपाठो यथा –

‘सः । अ॒स्मै॒ । अर॑म् । प्र॒थ॒मम् । सः । द्वि॒तीय॑म् । उतो इति॑ । तृ॒तीय॑म् । मनु॑षः । सः । होता॑ ।

अ॒न्यस्याः॑ । गर्भ॑म् । अ॒न्ये । ऊँ इति॑ । ज॒न॒न्त॒ । सः । अ॒न्येभिः॑ । स॒च॒तो॒ । जेन्यः॑ । वृषा॑’॥ इति।[२५०]

पदपाठे ‘सास्मा अरम्’ इत्यस्य ‘सः । अस्मै । अरम् ।’ इति पदविभागः प्रदर्शितः। पदपाठं दृष्ट्वैवावगम्यते अत्र ‘सा अस्मा’ इति पदविभागो नास्ति परन्तु सः अस्मा इति पदविभाग

[२४५] पा. सू. ८/२/६६
[२४६] तदेव. ८/३/१७
[२४७] तदेव. ८/३/१९
[२४८] तदेव. ६/१/१०१
[२४९] तदेव. ८/२/१
[२५०] ऋ. सं. २/१८/२

एवास्ति। ‘सः अस्मै’ इत्यनयोः पदयोर्मध्ये ‘सोऽचि लोपे चेत्पादपूरणम्’[२५१] इति सूत्रेण ‘सस् अस्मा’ इत्यस्य सोः लोपे पादपूरणाय सास्मा इति जातम्। वस्तुतस्तु पादपूरणार्थमेव सूत्रस्यास्य प्रवृत्तिः। परन्तु सामान्यतया सवर्णविधिनात्र ‘सास्मा’ इति न भवति। अतः पदपाठस्थं ‘सः अस्मा’ इति पृथक्पदविभागमादाय तत्पदस्य यज्ञेन सोमेन वा सम्बन्धः कर्तुं शक्यते, तस्य पुंलिङ्गकत्वात्। अतः अत्र दृश्यते यत् पदपाठप्रदर्शितः पदविभाग एव इष्टः। तं पदविभागमादाय भाष्यकारैरपि भाष्याणि विरचितानि। अस्य मन्त्रस्य सायणाचार्यकृतं व्याख्यानं यथा - ‘सः यज्ञः सोमो वा अस्मै इन्द्राय प्रथमं प्रातःसवने अरं पर्याप्तोऽभूत्। सः च द्वितीयं माध्यन्दिने सवने पर्याप्तोऽभूत्। ...सः यज्ञः सोमो वा अन्येभिः अन्यैः इनन्द्रादिदेवैः सचते सङ्गच्छते।’[२५२] इति। मन्त्रस्यास्य वेङ्कटमाधवकृतं भाष्यं यथा- ‘सः यज्ञः इन्द्राय प्रथमं पर्याप्तं प्रातःसवने। एवं माध्यन्दिने तृतीयसवने च। सः यज्ञः मनुष्यस्य देवेभ्यः स्वधनं प्रयच्छतः प्रदाता, देवान् वा आत्मना आह्वयति...सः च जातः देवैः सङ्गच्छते उषशीलः कामानां वर्षिता इति’।[२५३] इति।

अत उभयत्र दृश्यते यत् ‘सास्मा अरम्’ इति संहितांशस्य व्याख्यानकाले तत्पदेन सह पुंलिङ्गकस्य यज्ञस्य सोमस्य वान्वय एव भाष्यकारैरिष्टः। ‘सास्मा’ इत्यस्य सन्धिविच्छेदे तत्पदेन सह यज्ञस्य सोमस्य वा अन्वयः कर्तुं न शक्यते। तच्च केवलं पदपाठेनैव स्पष्टीभवति। एवंप्रकारेणात्र पदविभागमाध्यमेन महर्षिणा शाकल्येन वेदस्य प्रकृतमन्त्रार्थज्ञाने साहाय्यं विहितम्।

एवंप्रकारेण संहितापाठे पदविभागो यत्र यत्र संशयापन्नस्तत्र तत्र पदपाठमादायैव व्याख्याकारैः मन्त्रार्थः स्पष्टीकृतः। पदपाठाभावे तत्र तत्र संहितासु मन्त्रार्थव्याख्यानसमये

---

[२५१] पा. सू. ६/१/१३०

[२५२] ऋ. सं. २/१८/२ सायणभाष्यम्

[२५३] तदेव. वेङ्कटमाधवभाष्यम्

भाष्यकारैः पृथक् मन्त्रार्थः प्रदर्शितः, तेन च प्रकृतमन्त्रार्थोऽज्ञात एव भवेत् जनानां सविधे। एवंप्रकारक एको मन्त्रो यथा –

“वहन्ति सीमरुणासो रुशन्तो गावः सुभगामुर्विया प्रथानाम्।

अपेजते शूरो अस्तेव शत्रून्बाधते तमो अजिरो न वोळहा॥”[२५४] इति।

अस्य मन्त्रस्य बृहस्पतिः ऋषिः उषा देवता च। अत्रैव द्वितीये चरणे ‘अजेपते’ इति तिङन्तपदे पदपाठेन विना पदविभागविषये संशयो विद्यते। ‘अपेजते’ इत्यस्य विभागो द्विधा कर्तुं शक्यते। ‘अप एजते’ इत्यवस्थायाम् ‘एङि पररूपम्’[२५५] इति सूत्रेण पररूपैकादेशे अपेजते इति रूपं सिद्ध्यति। पुनश्च ‘अप ईजते’ इत्यवस्थायाम् ‘आद्गुणः’[२५६] इति सूत्रेण गुणैकादेशे अपेजते इति रूपं सिध्यति। अतोऽत्र दृश्यते यत् ‘अपेजते’ इति संहितांशस्य वैयाकरणदिशा पदविभागो द्विधा कर्तुं शक्यते। परन्तु पृथक् पदविभागस्य फलं पृथगेव। यतो द्विविधे विभागे पृथग्धातुद्वयं वर्तते तस्मात् पदविभागद्वयस्य अर्थस्तु पृथगेव भवति। क्रियायाः पृथगर्थे मन्त्रार्थः पृथगेव भवति। ‘अप एजते’ इति स्वीकृते अत्र ‘एजृ दीप्तौ’[२५७] इति भ्वादिगणीयो धातुर्वर्तते, यस्यार्थः प्रकाशः। ‘अप ईजते’ इति स्वीकृते तत्र धातुः भवति ‘ईज गतिकुत्सनयोः’[२५८], यस्यार्थः गतिर्निन्दा वा। एवंप्रकारेण द्विविधे पदविभागे प्राप्ते कः पदविभाग इष्टः स तु पदपाठादेव निश्चीयते। मन्त्रस्यास्य पदपाठो यथा –

‘बहन्ति। सीम्। अरुणासः। रुशन्तः। गावः। सुऽभगाम्। उर्विया। प्रथानाम्।

---

[२५४] ऋ. सं ६/६४/३

[२५५] पा. सू. ६/१/९४

[२५६] तदेव. ६/१/८७

[२५७] पा. धा. १८६

[२५८] तदेव. १८९

अप॑ । ई॒ज॒ते । शूरः॑ । अस्ता॑ऽइव । शत्रू॑न् । बाध॑ते । तमः॑ । अ॒जि॒रः । न । वोळ्ह॑ा ॥'[259]

इति।

आदावेव अस्याध्यायस्य प्रारम्भे शाकल्येप्सितपदत्वविचारावसरे आलोचितं यत् महर्षिणा शाकल्येन वेदस्य संहितापाठतः पदपाठकरणकाले उपसर्गाः धातोः पृथक् प्रदर्शिताः दण्डेन । पदपाठस्य अनेनैव वैशिष्ट्येन सन्धिनिष्पन्नेषु पदेषु कः उपसर्गः कश्च धातुः इति निश्चिद्रूपेण ज्ञायते । तेन धातोः निश्चित्करणेन तदर्थानुसारी प्रकृतमन्त्रार्थोऽपि ज्ञातुं शक्यते । अस्मिन् मन्त्रेऽपि 'अपेजते' इति तिङन्तपदस्य पदपाठकरणकाले शाकल्येन धातोः उपसर्गः पृथक् प्रदर्शितः। अनेनैव पृथक्करणेन निश्चीयते यदत्र अप इति उपसर्गादनन्तरम् ईजते इति तिङन्तं वर्तते यस्यार्थः गतिः। अतः परवर्तिनि काले वेदस्य भाष्यकारैः पदपाठप्रदर्शितम् इममेव धातुरूपं स्वीकृत्य मन्त्रार्थः प्रदर्शितः। अस्य मन्त्रस्य सायणाचार्यकृता व्याख्या यथा - 'अरुणासः लोहितवर्णाः रुशन्तः दीप्यमानाः गावः रश्मयः। किरणा गाव इति रश्मिनामसु पाठात्। सुभगाम् उर्विया उर्वी विस्तीर्णा प्रथानां प्रथमानां सीम् एनामुषोदेवतां बहन्ति । सेयमुषोदेवता शूरो अस्तेव वीरः क्षीप्ता इव शत्रून् तमः अपेजते अपगमयति । वोळहा सेनायाः अजिरो न क्षिप्रगामी शत्रून् यथा बाधते तथा तमांसि बाधते च।'[260] इति। मन्त्रस्यास्य स्कन्दस्वामिकृतं व्याख्यानं यथा - 'बहन्ति सीम् सर्वतः अरुणासः आरक्तवर्णाः रुशन्तः य एषाम् अवहननसम्बन्धे वर्तते असुरादिः कश्चित् तम् निघ्नन्त इत्यर्थः। के बहन्ति। उच्यते गावः उस्राः। ताश्च के बहन्ति उच्यते सुभगाम् सुधनाम् उषसम् उर्विया उरुम् प्रथानाम् अतिविस्तीर्णमानाम्। स्वभाषा कृत्स्नं जगद् व्याप्नुवतीत्यर्थः। उशमाना च अप ईजते । ईज गतिकुत्सनयोः। सामर्थ्याच्चान्तर्नीतण्यर्थः। अपगमयति तमांसि शूरः अस्ता इव शत्रून्। असू

---

[259] ऋ.सं. ६/६४/३ पदपाठः

[260] तदेव. सायणभाष्यम्

क्षेपणे। विनाशयतीत्यर्थः। कम्। तमः अन्धकारम्। क इव। उच्यते- अजिरः न वोळहा । अजिरमिति क्षिप्रनाम। यथा क्षिप्रो वोढा वहन् किञ्चित् वाधते तद्वत्।'[२६१] इति। अस्यैव मन्त्रस्य वेङ्कटमाधवप्रदर्शितं व्याख्यानं यथा - 'वहन्ति एनां समन्ततः अरुणवर्णाः ज्वलन्तः गावः सुधनां विस्तीर्णां प्रथमानाम् । अपगमयति तमांसि शूरः योद्धेव शत्रून् । सेयं तमः ...देशान्तरं प्रापयति।'[२६२] इति।

अतः अत्र सर्वेष्वेव भाष्येषु परिलक्ष्यते यत् व्याख्याकारैः 'अपेजते' इति संहितांशे अप इति उपसर्गादनन्तरं गमनार्थकः ईज्-धातुरेव स्वीकृतः, न तु प्रकाशार्थकः एज्-धातुः। किञ्च स्कन्दस्वामिनात्र पाणिनीयः धातुपाठोऽपि उद्धृतः। अतः अत्र पदपाठेनैव व्याख्यातृषु मतैक्यं दृश्यते। अन्यथा पदपाठाभावे द्विविधे पदविभागे स्वीकृते द्विविधः मन्त्रार्थः समापतति। तेन च प्रकृतमन्त्रार्थस्यानिष्टापत्तिः स्यात् । एवंप्रकारेणात्र महर्षिणा शाकल्येन धातूपसर्गयोः पृथक्करणेन प्रकृतो मन्त्रार्थः ज्ञापितः।

ऋग्वेदसंहितायाः षष्ठमण्डले अपरमेकमुदाहरणं यथा –

"मा नो॒ वृका॑य वृ॒क्ये॑ सम॒स्मा अ॑घाय॒ते री॑रधता यजत्राः।

यू॒यं हि ष्ठा र॒थ्यो॑नस्त॒नूनां॑ यू॒यं दक्ष॑स्य वच॑सो बभू॒व॥" इति।[२६३]

मन्त्रस्यास्य व्याख्यानकाले 'समस्मा अघायते' इति संहितांशे पदविभागविषये संशयो दृश्यते। आदौ समस्मै अघायते इत्यवस्थायाम् 'एचोऽयवायावः'[२६४] इति सूत्रेण ऐकारस्य आयादेशे समस्माय् अघायते इति जाते 'लोपः शाकल्यस्य'[२६५] इति सूत्रेण पदान्तयकारलोपे समस्मा

[२६१] ऋ.सं. ६/६४/३ स्कन्दस्वामिभाष्यम्
[२६२] ऋ. सं. ६/६४/३ वेङ्कटमाधवभाष्यम्
[२६३] तदेव. ६/५१/६
[२६४] पा. सू. ६/१/७८
[२६५] तदेव. ८/३/१९

अघायते इति रूपं प्राप्यते। तच्च पदपाठेऽपि प्रदर्शितम्। परन्त्वत्रादौ समस्मा इति पदे पदपाठेन विना आपातदृष्ट्या 'सम् अस्मा' इति पदच्छेदं मन्यते। समिति उपसर्गः अस्मा इति सुबन्तम्, अघायते इति तिङन्तञ्च। तेन समिति तिङन्तस्य 'अघायते' इति तिङन्तेन परवर्तिना 'बभूव' इति तिङन्तेन वान्वयो भवतीति आपातदृष्ट्या मन्यते । परन्तु तथा कृते सति प्रकृतमन्त्रार्थस्यानिष्टापत्तिर्जायते। यतो ह्यत्र समस्मै इति एकमेव पदमिष्टम्, न तु समित्युपसर्गः अस्मै इति पृथक् सुबन्तम्। तच्चैकपदत्वं पदपाठत एवावगम्यते। अस्य मन्त्रस्य पदपाठो यथा –

'मा। नः। वृकाय। वृक्यै। समस्मै। अघऽयते। रीरधत। यजत्राः।

यूयं। हि। स्थ। रथ्यः। नः। तनूनाम्। यूयम्। दक्षस्य। वचसः। बभूव॥'[२६६] इति।

अस्य मन्त्रस्य पदपाठं दृष्ट्वैवावगम्यते यदत्र संहितापाठे 'समस्मा' इत्येकमेव पदम्। न तु 'सम्' इत्युपसर्गः 'अस्मै' इति चतुर्थ्यन्तं पदम् । समः उपसर्गत्वे पदपाठे अवग्रहेण तस्य पृथक्स्थातव्यम् । पदपाठे तु 'समस्मै' इति अवग्रहहीनमेकमेव पदं शाकल्येन प्रदर्शितम् । प्रकृतमन्त्रार्थावगमाय समः यत्र यत्र उपसर्गत्वमिष्टं तत्र तत्र सम् अवग्रहेण पृथक् प्रदर्शितं शाकल्येन पदपाठे। यथा ऋक्संहितायाः ६/५२/१७ -तमे मन्त्रे 'समिधाने' इत्यस्य 'सम्ऽइधाने' इति, १/२२/१७ – तमे मन्त्रे 'समूळहम्' इत्यस्य 'सम्ऽऊळहम्। अस्य' इति, १/६/३ – तमे मन्त्रे 'समुषद्भिः' इत्यस्य 'सम्। उषत्ऽभिः।' इत्यादिषु समः पृथगवस्थानं परिलक्ष्यते पदपाठे। यद्यपि 'समस्मा' इत्यत्र 'अस्मा' इति सुबन्तं पदं सम् इति चोपसर्गः, तस्माद् 'उपसर्गाः क्रियायोगे'[२६७], 'ते प्राग् धातोः'[२६८] इति नियमेन अस्मा इत्यस्य तिङन्तत्वाभावात् समः

[२६६] ऋ.सं. ६/५१/६
[२६७] पा. सू. १/४/५९
[२६८] तदेव. १/४/८०

उपसर्गत्वं न वक्तव्यमित्युच्यते चेत्तदपि न साधु। यतो हि वैदिकसंहितायाम् उपसर्गा न केवलं धातोः प्राग् वर्तन्ते अपि तु धातोः परं, व्यवधानेन च परिलक्ष्यन्ते । अस्मिन् विषये पाणिनिना सूत्रं सूत्रितम् - 'छन्दसि परेऽपि' इति, 'व्यवहिताश्च'[२६९] इति च । अतः अत्र समः उपसर्गत्वं केवलं पदपाठेनैव निराकर्तुं शक्यते । पदपाठत एवावगम्यते समिति न उपसर्गः परन्तु समस्मै इति एकमेव चतुर्थ्यन्तं पदं, यस्य प्रातिपदिकं सर्वादिगणपठितः सम इति शब्दः।[२७०] सम इत्यस्य चतुर्थ्याः एकवचनान्तं रूपं समस्मै इति ।

अत्र पदपाठस्थं पदविभागमादाय समस्मै इत्येकमेव पदं स्वीकृत्य भाष्यकारैरपि भाष्याणि विरचितानि । अस्य मन्त्रस्य सायणाचार्यकृतं भाष्यं यथा - 'हे यजत्राः यष्टव्या देवाः नः अस्मान् वृकाय हिंसकाय स्तेनाय वृक्ये तस्य स्त्रीयै च मा रीरधत मा वंशं नैष्ट । मा वशीकुरुत। यद्वा वृतोऽरण्यश्वा तस्य स्त्री वृकी । अपि च समस्मै सर्वस्मै अघायते अघमनर्थमस्माकमिच्छते शत्रूजनायास्मान् मा वंशं नयत । यूयं हि यूयं खलु नः अस्माकं तनूनां शरीरीणां रथ्यः नेतारः स्थ भवथ । यूयमेव दक्षस्य अस्मदीयस्य बलस्य वचसः वाक्यस्य च नेतारः बभूव । अतः कारणात् अस्मान् मा रीरधतेत्यन्वयः।'[२७१] इति । अस्य मन्त्रस्य स्कन्दस्वामिप्रदत्तं व्याख्यानं यथा - 'मा नः अस्मान् वृकाय वृक्ये वृको नाम हिंस्रः प्राणिविशेषः तस्मै तत्स्त्रीयै च समस्मै सर्वस्मै अघायते पापमिच्छते । जिघांसत इत्यर्थः। रीरधत रध्यतिवशगमने । वंशं नैष्ट हे यजत्राः! यष्टव्याः! वसवः! विश्वे वा देवाः। कुत एतत्? परस्याम् ऋच्युपादानात् । यावान् कश्चित् अस्मान् जिघांसति तस्य सरवस्य यथा वशे न भवाम तथा कुरुतेत्यर्थः...।'[२७२] इति । वेङ्कटमाधवेनास्य मन्त्रस्य

---

[२६९] पा.सू. १/४/८१-८२

[२७०] सर्व विश्व उभ उभय डतर तम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम। पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्। समज्ञातिधनाख्यायाम्। अन्तरं वहिर्योगोपसंव्यानयोः। त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युस्मद् अस्मद् भवतु किम्। इति सर्वादिगणः (पा.ग.पा. १/१)

[२७१] ऋ. सं. ६/५१/६ सायणभाष्यम्

[२७२] तदेव. स्कन्दस्वामिभाष्यम्

व्याख्यानप्रसङ्गे उच्यते- 'मा अस्मान् वृकाय वृक्यै च सर्वस्मै च अघमिच्छते वशं सन्नयत हे यष्टव्याः! यूयं हि भवथ नेतारः अस्माकम् अङ्गानाम् । यूयं प्रवृद्धस्य वचसः भाजनम् भवथ।'[२७३] इति।

अतः भाष्येषु दृश्यते यत् 'समस्मा अघायते' इत्यत्र समस्मा एकमेव पदं स्वीकृत्य भाष्याणि विरचितानि। तच्च एकपदत्वं पदपाठत एव स्पष्टीभवति। अनेन च पदपाठकृता वेदस्य प्रकृतमन्त्रार्थकरणे साहाय्यं विहितम्। अपि चास्यैव मन्त्रस्य द्वितीये चरणे 'यूयं हि ष्ठा रथ्यो...' इत्यत्र अर्थव्याख्यानसमये पदपाठेन विना 'ष्ठा' इति शब्दस्य बोधो न भवति। 'ष्ठा' इति न सुबन्तं न च तिङन्तम्, न उपसर्गः, न च निपातः। अतः प्रकृतमन्त्रार्थज्ञानाय पदस्यास्य प्रकृतिः स्वरूपं वा ज्ञातुं महर्षिशाकल्यकृतः पदपाठ एव शरणम्। पदपाठे मन्त्रस्यास्य पदविभागावसरे 'ष्ठा' इति शब्दस्वरूपं 'स्थ' इत्येवंप्रकारेण उक्तम्। वस्तुतस्त्वत्र 'स्थ' इति अस्-धातोः लटि मध्यमपुरुषस्य बहुवचनान्तं रूपम्। संहितायाञ्चास्य षत्वं छान्दसदीर्घत्वं जातम्। इदं षत्वं छान्दसदीर्घत्वञ्च केवलं पदपाठत एव ज्ञायते। पदपाठस्य विद्यमानाभावे 'ष्ठा' इति शब्दस्वरूपम् अविज्ञातम् अस्पष्टार्थं वा स्यात्। पदपाठकारेणेदं ज्ञापयित्वात्र मन्त्रस्य प्रकृतार्थकरणे सौविध्यं विहितम्। यद्यपि मन्त्रस्यास्य व्याख्यानावसरे भाष्यकारैः षत्वविषये छान्दसदीर्घत्वविषये वा किमपि नोक्तं परन्तु व्याख्याकारैः 'ष्ठा' इति संहितांशं 'स्थ' इति अस्-धातोः लटि मध्यमपुरुषत्वेनादाय भाष्याणि विरचितानि। सायणाचार्येणोक्तम् - '...यूयं हि यूयं खलु नः अस्माकं तनूनां शरीरीणां रथ्यः नेतारः स्थ भवथ।'[२७४] इति। एवमन्यत्रापि।

ऋग्वेदसंहितायाः प्रथममण्डलान्तर्गत एको मन्त्रो यथा –

"स घा॑ नो॒ योग॒ आ भु॑व॒त्स राये स पुरंध्याम्।

---

[२७३] ऋ. सं. ६/५१/६ वेङ्कटमाधवभाष्यम्

[२७४] तदेव. सायणभाष्यम्

गमुद्वाजेभिरा स नः॥" इति।[२७५]

अस्याः ऋचः मधुच्छन्दा ऋषिः इन्द्रो देवता च। अस्य मन्त्रस्य प्रकृतार्थज्ञानाय पदपाठेन विना पदविभागमादाय संशयो वर्तते। मन्त्रेऽस्मिन् प्रथमे पादे 'योग आ' इति संहितांशे द्वयोः पदयोः मध्ये सन्धिविषये संशयो दृश्यते। 'योग आ' इत्यनयोः पदयोः द्विधा सन्धिविच्छेदः कर्तुं शक्यते। प्रथमतः 'योगस् आ' इति स्थिते 'ससजुषो रुः'[२७६] इत्यनेन सूत्रेण रुत्वे 'योगरु आ' इति जाते 'भो-भगो-अघो-अपूर्वस्य योऽशि'[२७७] इत्यनेन रोर्यादिशे 'योग य् आ' इत्यवस्थायां 'लोपः शाकल्यस्य'[२७८] इत्यनेन यकारलोपे 'योग आ' इति प्राप्यते। पुनः 'योग आ' इत्यनयोः पदयोर्मध्ये न सवर्णदीर्घादिशः, सवर्णदृष्ट्या लोपस्यासिद्धत्वात्। पक्षेऽस्मिन् 'योग आ' इति संहितांशे 'योग' इति प्रथमान्तं पदं प्राप्यते। द्वितीयतः 'योगे आ' इति स्थिते 'एचोऽयवायावः'[२७९] इति सूत्रेण एकारस्य अयादेशे 'योगय् आ' इति स्थिते 'लोपः शाकल्यस्य' इत्यनेन विधिना यकारलोपे 'योग आ' इति रूपं सिध्यति। अत्रापि पुनः सवर्णदीर्घादिशः, सवर्णदृष्ट्या लोपस्यासिद्धत्वात्। अतः द्वितीये पक्षे स्वीकृते 'योग आ' इति संहितायाः पदविभागो भवति 'योगे आ' इति। अत्र 'योग' इति सप्तम्यन्तं पदम्। प्रथमपक्षे स्वीकृते प्रथमान्तस्य योगशब्दस्य अन्वयो मन्त्रोक्तदेवतया इन्द्रेण सह भवति। द्वितीयपक्षे स्वीकृते सप्तम्यन्तस्य योगशब्दस्यान्वयः क्रियया सह भवति। उभयथा पदविभागे सम्भवेऽपि प्रकृतमन्त्रार्थकरणाय कः पदविभाग इष्टः स तु पदपाठादेव ज्ञायते। मन्त्रेऽस्मिन् सप्तम्यन्तरूपेणान्वय एवेष्टः। पदपाठेऽपि योगशब्दस्य सप्तम्यन्तरूपेण निर्देशो वर्तते। यद्यत्र पदपाठो न स्यात्तदा उभयथा पदविभागमादाय द्विविधस्य मन्त्रार्थस्यापत्तिः समापतेत्।

२७५ ऋ. सं. १/५/३

२७६ पा.सू. ८/२/६६

२७७ तदेव. ८/३/१७

२७८ तदेव. ८/३/१९

२७९ तदेव. ६/१/७८

तच्चानिष्टमेव। अतः अत्र पदपाठकृता महर्षिणा शाकल्येन पदविभागमाध्येमेन मन्त्रस्य यथार्थतया अर्थावगमे भाष्यकारेभ्यः सहायता विहिता । पदपाठप्रदर्शितं 'योगे' इति सप्तम्यन्तं पदमादाय परवर्तिनि काले भाष्यकारैः भाष्याणि विरचितानि । मन्त्रस्यास्य सायणाचार्यकृतं व्याख्यानं यथा - 'घशब्दो अवधारणार्थो निपातः। सर्वैस्तच्छब्दैः संबध्यते । स घ स एवेन्द्रः पूर्वमन्त्रोक्तगुणविशिष्टः नः अस्माकं योगे पूर्वमप्राप्तस्य पुरुषार्थस्य संबन्धे आ भुवत् आ भवतु, सः एव पुरंध्यां योषिति आ भुवत्। यद्वा। बहुविधायां वुद्धौ आ भुवत्। 'पुरंधिर्बहुधीः' (निरु.६/१३) इति यास्कः। स एव वाजेभिः देयैरन्नैः सह नः अस्मान् आगमत् आगच्छतु।'[२८०] इति। मन्त्रस्यास्य स्कन्दस्वामिप्रदर्शितं व्याख्यानं यथा - 'घ इति पदपूरणः। सः प्रकृतः इन्द्रः नः अस्माकं योगे योग उद्योगः उत्साहः। अलब्धलाभो वा तस्मिन्। आ भुवत् आभिमुख्येन भवतु। योगमस्माकं करोत्वित्यर्थः। सः एव राये धने। सः एव पुरन्ध्याम् बह्व्यां प्रज्ञायाम् । गमद् वाजेभिः आगमदागच्छतु। वाजेभिः सहयोगलक्षणैषा तृतीया। अस्मभ्यं यानि दातव्यानि तैरन्नैः सह तानि गृहीत्वेत्यर्थः। अथवा हेताावियं तृतीया। प्रयोजनस्य च हेतुत्वेन विवक्षा। हविर्लक्षणैरन्नैर्हेतुभूतैः। हविरुपभोगार्थमित्यर्थः। कः स एवेन्द्रः। कस्य वाजेभिः नः अस्मत्सम्वन्धिभिः।'[२८१] इति। मन्त्रस्यास्य व्याख्यारूपेण मुद्गलीयायां वृत्तावुच्यते - 'घ अवधारणे । सः एवेन्द्रः पूर्वोक्तगुणविशिष्टः नः अस्माकं योगे पूर्वमप्राप्तस्य पुरुषार्थस्य सम्बन्धे आभुवत् आभवतु । पुरुषार्थं साधयत्वित्यर्थः। सः एव राये धनार्थम् आभुवत् । स एव पुरन्ध्याम् योषिति आभुवत् । स एव वाजेभिः देयैरन्नैः सह नः अस्मान् आ गमत् आगच्छतु ।'[२८२] इति।

---

[२८०] ऋ. सं. १/३/५ सायणभाष्यम्

[२८१] तदेव. स्कन्दस्वामिभाष्यम्

[२८२] ऋ. सं. १/३/५ मुद्गलीया वृत्तिः

वेङ्कटमाधवेनाप्युच्यते - 'सः एव अस्माकम् अप्राप्तप्राप्त्यर्थमाभवतु । सः धनाय, स पुरन्धिर्बहुधीर्योषा तस्यै च। अन्नैश्च अस्मान् आगच्छतु सः।'[२८३] इति।

अतः सर्वत्रैव भाष्येषु दृश्यते 'योग आ' इति संहितांशस्य 'योगे आ' इति पदपाठकारप्रदर्शितं पदविभागं स्वीकृत्य प्रकृतमन्त्रार्थो व्याख्यातः व्याख्याकृद्भिः। शाकल्येन पदविभागो न प्रदर्शिते अत्र प्रकृतमन्त्रार्थज्ञाने अनिष्टापत्तिः स्यात्।

संहितापाठे पदविभागमादाय संशयाविष्टः अपरो मन्त्रो यथा –

"स॒ध्रीमा य॑न्ति॒ परि॑ बिभ्र॑तीः॒ पयो॑ वि॒श्वप्स्न्या॑य॒ प्र भ॑रन्त॒ भोज॑नम्।

स॒मा॒नो अध्वा॑ प्र॒वता॑मनु॒ष्यदे॒ यस्ताकृ॑णोः प्र॒थ॒मं सास्यु॒क्थ्यः॑॥[२८४]" इति।

अस्यामृचि ऋषिणा गृत्समदेन इन्द्रदेवता स्तूयते। मन्त्रस्यास्य तुरीये पादे 'सास्युक्थ्यः' इत्यंशे पदपाठस्य विद्यमानाभावे पदविभागकाले संशयो वर्तते। यतो हि आपातदृष्ट्या 'सास्युक्थ्यः' इत्यस्य 'सा असि उक्थ्यः' इत्येवंप्रकारेण पदानि विभक्तुं न शक्यन्ते। 'सा असि' इत्यनयोर्मध्ये 'अकः सवर्णे दीर्घः'[२८५] सूत्रेण सवर्णदीर्घे ततः 'इको यणचि'[२८६] सूत्रेण यकारादेशे 'सास्युक्थ्यः' इति प्राप्यते। एवं पदविभागे स्वीकृते सति तत्पदेन सह मन्त्रप्रतिपादितदेवतया अन्वयः कर्तुं न शक्यते, तस्य स्त्रीलिङ्गकत्वात्। तत्पदेन मन्त्रप्रतिपादितदेवता अपेक्षिता चेत्तर्हि तस्य पुंलिङ्गेन भवितव्यम्। यद्यत्र तत्पदेन सह मन्त्रोक्तदेवतया इन्द्रेण सह सम्बन्धः अपेक्षितश्चेत्तदा 'सः असि उक्थ्यः' इति पदविभागः कर्तव्यः। परन्तु आपातदृष्ट्या सः असि उक्थ्यः इति पदत्रयस्य सन्धिकार्ये सास्युक्थ्यः इति नागच्छति। यतो हि 'सः असि' इति पदयोर्मध्ये 'सस्

---

[२८३] ऋ. सं. १/३/५ वेङ्कटमाधवभाष्यम्
[२८४] ऋ. सं. २/१३/२
[२८५] पा. सू. ६/१/१०१
[२८६] तदेव. ६/१/७७

असि’ इत्यवस्थायां ‘ससजुषो रुः’[२८७] इति सूत्रेण सोः रुत्वे ‘सरु असि’ इति जाते ‘भो-भगो-अघो-अपूर्वस्य योऽशि’[२८८] इति सूत्रेण रोर्यादेशे ‘सय् असि’ इति प्राप्यते । ततः ‘सयसि उक्थ्यः> सयस्युक्थ्यः’ इति प्राप्यते। अन्यथा ‘लोपः शाकल्यस्य’[२८९] इति सूत्रेण यकारस्य लोपे ‘स असि उक्थ्यः> स अस्युक्थ्यः’ इति प्राप्यते। ‘स अस्युक्थ्यः’ इत्यवस्थायां पुनः ‘अकः सवर्णे दीर्घः’[२९०] इति सूत्रेण सवर्णदीर्घादेशे सास्युक्थ्यः इति कर्तुं न शक्यते, सवर्णदीर्घदृष्ट्या लोपस्यासिद्धत्वात् ‘पूर्वत्रासिद्धम्’[२९१] इति नियमेन। अपि च ‘सास्युक्थ्यः’ इत्यत्र ‘सा असि उक्थ्यः’ इति पदविभागमादाय तत्पदं स्त्रीलिङ्गकत्वेन स्वीकृत्य मन्त्रार्थः क्रियते चेत्तदा मन्त्रार्थस्य अनिष्टापत्तिर्भवति । अतः अत्र पदविभागविषये संशयनिराकरणाय पदपाठ एव शरणम्। अस्याः ऋचः पदपाठो यथा –

‘सध्री। ईम्। आ। यन्ति। परि॑। बिभ्र॑तीः। पयः॑। विश्वऽप्स्न्या॑य। प्र। भरन्त। भोज॑नम्।

समानः। अध्वा॑। प्रऽवता॑म्। अनुऽस्यदे॑। यः। ता। अकृ॑णोः। प्रथमम्। सः। असि। उक्थ्यः॑ ॥’[२९२] इति।

पदपाठे दृश्यते यत् ‘सास्युक्थ्यः’ इत्यस्य पदविभागः ‘सः असि उक्थ्यः’ इति। पदपाठं दृष्ट्वैवावगम्यते यदत्र ‘सा असि उक्थ्यः’ इति पदत्रयस्य सन्धिर्नास्ति परन्त्वत्र ‘सः असि उक्थ्यः’ इति त्रीणि पदानि सन्ति। पदपाठस्थमिमं पदविभागं दृष्ट्वा ज्ञायते यत् यद्यपि आपातदृष्ट्या ‘सास्युक्थ्यः’ इत्यस्य ‘सः असि उक्थ्यः’ इति पदविभागः कर्तुं न शक्यते तथापि

---

[२८७] पा. सू. ८/२/६६
[२८८] तदेव. ८/३/१७
[२८९] तदेव. ८/३/१९
[२९०] तदेव. ६/१/१०१
[२९१] तदेव. ८/२/१
[२९२] ऋ. सं. २/१३/२ पदपाठः

‘सः असि’ इत्यनयोः पदयोर्मध्ये ‘सोऽचि लोपे चेत्पादपूरणम्’[२९३] इति सूत्रेण ‘सस् असि’ इत्यवस्थायां सोः लोपे पादपूरणाय ‘सासि’ इति पदं निष्पन्नम्। ततश्च यणसन्धौ सास्युक्थ्यः इति प्राप्यते। अतः पदपाठेनैव निश्चित्कृतमिदं यदत्र ‘सः असि उक्थ्यः’ इति त्रीणि पदानि सन्ति। अपि चात्र तत्पदं पुंलिङ्गकं, वस्तुतस्तु पादपूरणाय एव सूत्रस्यास्य प्रवृत्तिः, तच्च पदपाठतो ज्ञायते। पदपाठं दृष्ट्वैवात्र तत्पदेन सह मन्त्रप्रतिपादितदेवतया इन्द्रेण सम्बन्धः कर्तुं शक्यते। तेन च मन्त्रार्थः सम्पूर्णो भवति। अन्यथा मन्त्रार्थः असुसमाप्तः अनिष्टो वा स्यात्। परवर्तिनि काले वेदव्याख्यातृभिरपि शाकल्यप्रदर्शितं पदविभागमादाय भाष्याणि विरचितानि। अस्याः ऋचः सायणाचार्यप्रदर्शितं व्याख्यानं यथा - ‘सध्री अञ्चतेर्लुक् छान्दसः। सहस्य सध्रीः ति सध्र्यादेशोऽन्तोदात्तत्वेन निपातितः। सध्रीचीनाः पयः उदकं परि परितः बिभ्रतीः बिभ्राणाः ईम् एता नद्यः आ यन्तिसर्वतो गच्छन्ति। ता नद्यः विश्वप्स्न्याय विश्वासामपाम् आश्रयभूताय समुद्राय भोजनम्। भूज्यते ति भोजनम् पयः। प्र भरन्त प्रकर्षेण सम्पादयन्ति। कुत एतत् तदाह। प्रवतां प्रवणवतां निम्नगानां पयसाम् अनुष्यदे। ...अनुष्यन्दनीयः अध्वा मार्गः समानः एको हि। यस्ता तानि सोमोत्पादननदीप्रवर्तनादीनि कर्माणि प्रथमं पूर्वम् अकृणोः अकरोः। स तादृङ्महिमोपेतस्त्वम् उक्थ्यः असि सर्वैः प्रशस्यो भवति।’[२९४] इति। अस्यैव मन्त्रस्य व्याख्यानप्रसङ्गे वेङ्कटमाधवेनोच्यते – ‘सध्रीचीनाः एनं समुद्रम् आगच्छन्ति परितः बिभ्रत्यः उदकम्। विश्वं व्याप्तं येन सः विश्वप्स्न्यः समुद्रः तस्मै भोजनं प्र भरन्ति। समानः मार्गः समुद्राख्यः प्रवणवतां नदानाम् अनुष्यन्दनाय। यः तानि एतानि एवंविधानि कर्माणि अकृणोः सः त्वम् प्रथममेव स्तोतव्यः।’[२९५] इति।

[२९३] पा. सू. ६/१/१३०

[२९४] ऋ. सं. २/१३/२ सायणभाष्यम्

[२९५] तदेव. वेङ्कटमाधवभाष्यम्

अतोऽत्र दृश्यते यत् भाष्यकारैरपि पदपाठप्रदर्शितं ‘सः असि उक्थ्यः’ इति पदविभागमादाय तत्पदस्य पुंलिङ्गत्वं स्वीकृत्य भाष्याणि विरचितानि। तेन च प्रकृतमन्त्रार्थस्य सम्यगवबोधो भवति।

ऋग्वेदसंहितायाः अपर एको मन्त्रो यथा –

“च॒न्द्रमा॑ अप्स्व॒॑१न्तरा सु॑प॒र्णो धा॑वते दि॒वि।

न वो॑ हिरण्यनेमयः प॒दं वि॑न्दन्ति विद्युतो वित्तं मे॑ अ॒स्य रो॑दसी॥”[296] इति।

प्रथममण्डलान्तर्गतस्य संहितागतमन्त्रस्य प्रथमे पादे ‘अप्स्वन्तरा’ इति संहितांशे पदपाठाद् विना पदविभागविषये संशयो वर्तते। आपातदृष्ट्या अत्र पदद्वमस्तीति मन्यते। अप्सु इति अप्-शब्दस्य सप्तमीबहुवचनम्, अन्तरा इति मध्यार्थकमव्ययम्। ‘अप्सु अन्तरा’ इत्यवस्थायां संहितापाठे ‘इको यणचि’[297] इति सूत्रेण उकारस्थाने वकारादेशे ‘अप्स्वन्तरा’ इति निष्पद्यते। अमरकोषे मध्यार्थे अन्तरा-शब्दस्योल्लेखः प्राप्यते - ‘...अन्तरेऽन्तरा। अन्तरेण च मध्ये स्युः।’[298] इति। महर्षिणा पाणिनिना *अष्टाध्यायी*ग्रन्थे सूत्रं सूत्रितम् - ‘अन्तरान्तरेण युक्ते’[299] इति। सूत्रस्यास्यार्थो हि अन्तरा अन्तरेण च इत्यनयोः निपातयोर्योगेन द्वितीया विभक्तिर्भवति। अस्मिन्नेव सूत्रे ‘अन्तरा’ इति शब्दस्यार्थनिर्णयावसरे काशिकावृत्तावुच्यते - ‘तत्र अन्तराशब्दो मध्यमाधेयप्रधानमाचष्टे’[300] इति। द्वितीयतः ‘अप्स्वन्तरा’ इति संहितांशे पदत्रयमस्ति इत्यपि स्वीकर्तुं शक्यते। अप्सु इति अप्-शब्दस्य सप्तमीबहुवचनम्, अन्तः इति मध्यार्थकमव्ययम्, आ इत्युपसर्गश्च। प्रथमे पक्षे स्वीकृते तिङन्तं भवति ‘धावते’ इति। परन्तु द्वितीये पक्षे स्वीकृते

[296] ऋ. सं. १/१०५/१

[297] पा. सू. ६/१/७७

[298] अ.को. ३य काण्डम्/अव्ययवर्गः/३०

[299] पा. सू. २/३/४

[300] तदेव. काशिकावृत्तिः

तिङन्तं भवति 'आ-धावते' इति। द्वितीये पदविभागे स्वीकृते आ इत्युपसर्गस्योपस्थितौ धातुना तस्य सम्बन्धः कर्तव्यः। तदा उपसर्गयोगे प्रकृतधात्वर्थस्यापि परिवर्तनं परिलक्ष्यते । एवमवस्थायां कः पक्षः अत्र समाश्रयणीयः कश्च पदविभागोऽत्र इष्टः प्रकृतमन्त्रार्थज्ञानाय इति संशयः समुदेति । संशयस्यास्य निरसनं पदपाठेनैव सम्भवति । यतो हि पदपाठे एव पदविभागकाले उपसर्गाणामुपस्थितिः पृथक् प्रदर्शिता। उपसर्गाभावे च एकपदरूपेण प्रदर्शितं तत् पदम्। अस्याः ऋचः पदपाठो यथा –

'चन्द्रमाः। अप्सु। अन्तः। आ। सुऽपर्णः। धावते। दिवि।

न। वः। हिरण्यऽनेमयः। पदम्। विन्दन्ति। विऽद्युतः। वित्तम्। मे। अस्य। रोदसी इति॥'[३०१]

इति।

अत्र पदपाठे पदविभागकाले 'अप्स्वन्तः' इति संहितांशः पदत्रयेषु विभक्तः। अतः अत्र द्वितीयः पक्षः एव समाश्रितः। 'अप्सु' इति सप्तमीबहुचनान्तं पदम्, 'अन्तः' इति मध्यार्थकमव्ययम्, आ इत्युपसर्गश्च । अतः अत्र पदपाठेनैव निश्चीयते यदत्र 'अन्तरा' नैकं पदम्, परन्तु पदद्वयमेव । 'अन्तर्' इति अव्ययम् 'आ' इत्युपसर्गश्च । अतः मन्त्रार्थकरणकाले धातोः प्राक् 'आ' इत्युपसर्गं संयुज्य अन्वयः कर्तव्यः। 'अन्तरा' इति एकपदे स्वीकृते तेन केवलं मध्यार्थः प्राप्यते परन्तु 'अन्तर् आ' इति द्विपदत्वे स्वीकृते 'अन्तर्' इत्यनेन मध्यार्थः प्राप्यते 'आ' इत्युपसर्गेण कश्चन नूतनः अर्थः प्राप्यते च। आङ् इत्युपसर्गः मर्यादायामभिविधौ च वर्तते। तादृशः कश्चन अर्थोऽत्र धातुना संयुज्यते। अतः पदपाठप्रदर्शितं पदविभागमादाय 'आ' इत्युपसर्गस्य प्रश्लेषं स्वीकृत्य व्याख्यातृभिः मन्त्रव्याख्यानं विहितम्। अस्याः ऋचः व्याख्यानसमये भाष्यकृता सायणाचार्येण मर्यादार्थकम् 'आ' इत्युपसर्गमादाय मन्त्रार्थः एवं प्रदर्शितः – 'अप्सु

[३०१] ऋ. सं. १/१०५/१ पदपाठः

आन्तरिक्षासु उदकमये मण्डे अन्तः मध्ये वर्तमानः सुपर्णः शोभनपतनः। यद्वा सुपर्णः इति रश्मिनाम। सुषुम्नाख्येन सूर्यरश्मिना युक्तः चन्द्रमाः दिवि द्युलोके आ धावते। आङ् मर्यादायाम्। एकेनैव प्रकारेण धावते शीघ्रं गच्छति। तादृशस्य चन्द्रमसः सम्बन्धिनः हे हिरण्यनेमयः सुवर्णसदृशपर्यन्ताः। यद्वा। हितरमणीयप्रान्ताः। विद्युतः विद्योतमाना रश्मयः वः युस्माकं पदं पादस्थानीयमग्रं न विन्दन्ति मदीयानीन्द्रियाणि कूपेनावृतत्वात् न लभन्ते...'।[३०२] इति। अत्र 'एकेनैव प्रकारेण धावते' इति विशेषार्थः यः सायणाचार्येण भाष्ये प्रदर्शितः स तु पदपाठतः एव लभ्यते। पदपाठे 'अन्तर् आ' इति पदविभागे न प्रदर्शिते एवमर्थं दर्शयितुं न शक्नुयाद्भाष्यकारः। अस्य मन्त्रस्य व्याख्यानप्रसङ्गे स्कन्दस्वामिनोच्यते - 'चन्द्रमाः अप्स्वन्तः अपां मध्ये। साकाङ्खत्वात् स्थित इति वाक्यशेषः। अम्मये स्वमण्डले स्थित इत्यर्थः। कीदृशः। सुपर्णः पृण पृणने इत्यस्यैतद्रूपम्। सुष्ठु प्रीणयिता। आह्लादयिता मनसामित्यर्थः। अथवा सुपर्णशब्दो रश्मिनाम (तु निघ. १,५) सामर्थ्याच्चात्र अन्तर्णीतमत्वर्थः। रश्मिमान्। किं करोति। उच्यते। आधावते मर्यादया सर्वकालं गच्छति। क्व। उच्यते। दिवि द्युलोके। न वः न तु युस्माकम्। हिरण्यनेमयः! नेमी रथचक्रधारोच्यते। हिरण्यमय्यो नेमयो यासां ताः हिरण्यनेमयः, तासां सम्बोधनं हिरण्यनेमयः। पदं पादनिधानात्तदाकारं यत् कर्दमादावुपजायते तत् पदमित्युच्यते। तत् जनाः विन्दन्ति लभन्ते...।'[३०३] इति। वृत्तिकृता मुद्गलेन अस्य वृत्तावुक्तम् - 'अप्सु अन्तरिक्ष्यासु उदकमये मण्डले अन्तः मध्ये वर्तमानः सुपर्णः शोभनपतनः चन्द्रमाः दिवि द्युलोके आ धावते एकेनैव प्रकारेण धावते शीघ्रं गच्छति। तादृशस्य चन्द्रमसः सम्बन्धिनः हे हिरण्यनेमयः सुवर्णसदृशपर्यन्ताः विद्युतः! विद्योतमाना रश्मयः! वः युस्माकं पदं पादस्थानीम् अग्रम् न विन्दन्ति मदीयानीन्द्रियाणि कूपेनावृतत्वात् न लभन्ते। अतः इदमनुचितम्। तस्मात् कूपात् मामुत्तारयेत्यर्थः। अपि च हे रोदसी! द्यावापृथिवी! अस्य मे मदीयं कूपपतनरूपं यदिदं

---

[३०२] ऋ. सं. १/१०५/१ सायणभाष्यम्

[३०३] तदेव. स्कन्दस्वामिभाष्यम्

दुःखं तत् वित्तम् अवगच्छतम् । मदीयं स्तोत्रं श्रुत्वा मदीयं दुःखं ज्ञात्वा अस्मात् कूपात् मामुत्तारयतमित्यर्थः।'[३०४] इति।

अतः भाष्येषु परिलक्ष्यते यत् 'अन्तरा' इत्यत्र 'अन्तर् आ' इत्येवंप्रकारेण पदविभागं स्वीकृत्य मन्त्रार्थः प्रदर्शितो भाष्यकारैः। अयञ्च पदविभागः महर्षिणा शाकल्येन पदपाठे प्रदर्शितः। पदपाठप्रदर्शितमाकारप्रश्लेषमादाय धातोः प्राक् च तं प्रयुज्य विशिष्टः धात्वर्थः प्रदर्शितः मन्त्रव्याख्यानकाले । अयञ्च विशिष्टार्थः पदपाठाद् विना न सम्भवति । अतः पदपाठकृता शाकल्येनात्र पदविभागेन यथार्थमन्त्रार्थज्ञाने तथा व्याख्याने साहाय्यं विहितम् ।

ऋग्वेदसंहितायाः दशममण्डले मन्त्रद्वये संहितापाठे समानाकारं पदं दृश्यते परन्तु मन्त्रार्थकरणकाले समानविभक्तिकत्वेन तयोः स्वीकारे यथार्थतया मन्त्रार्थो न प्राप्यते । अतः तत्र पदद्वये विभक्तेर्ज्ञानार्थं पदपाठ एव शरणम् । अस्माभिः पदपाठत एव तत्र द्वयो पदयोः पृथग्विभक्तित्वमवगम्यते । तौ मन्त्रौ यथा–

"अपे॑हि मनसस्पु॒तेऽप॑ क्राम प॒रश्च॑र।

प॒रो निर्ऋ॑त्या॒ आ च॑क्ष्व बहु॒धा जीव॑तो॒ मनः॑॥"[३०५] इति।

"देवाः॑ क॒पोत॑ इषि॒तो यदि॒च्छन्दू॒तो निर्ऋ॑त्या इ॒दमा॒ज॒गाम॑ ।

तस्मा॑ अर्चाम कृ॒णवा॑म॒ निष्कृ॑तिं॒ शं नो॑ अस्तु द्वि॒पदे॒ शं चतु॑ष्पदे ॥"[३०६] इति च।

प्रथममन्त्रस्य तृतीये चरणे तथा द्वितीयमन्त्रस्य द्वितीये चरणे 'निर्ऋत्या' इति पदं परिलक्ष्यते। प्रथममन्त्रे 'निर्ऋत्या आ' इति संहितांशे त्रिधा पदविभागः कर्तुं शक्यते, प्रथमतः 'निर्ऋत्यै आ'

[३०४] ऋ. सं. १/१०५/१. मुद्गलीया वृत्तिः

[३०५] ऋ. सं. १०/१६४/१

[३०६] तदेव. १०/१६५/१

इति चतुर्थ्यन्तं पदं स्वीकर्तुं शक्यते। ‘निर्ऋत्यै आ’ इति स्थिते ‘एचोऽयवायावः’[३०७] इति सूत्रेण आवादेशे ‘निर्ऋत्याव् आ’ इति जाते ‘लोपः शाकल्यस्य’[३०८] इति सूत्रेण वकारस्य लोपे ‘निर्ऋत्या आ’ इति प्राप्यते। द्वितीयतः ‘निर्ऋत्याः आ’ इति पञ्चम्यन्तं पदं स्वीकर्तुं शक्यते। तृतीयतः ‘निर्ऋत्याः आ’ इति षष्ठ्यन्तं पदं स्वीकर्तुं शक्यते। उभयत्र ‘विसर्जनीयस्य सः’[३०९] इत्यनेन सूत्रेण विसर्जनीयस्य सकारादेशे ‘निर्ऋत्यास् आ’ इति जाते ‘ससजुषो रुः’[३१०] इत्यनेन सूत्रेण रुत्वे ‘निर्ऋत्या रु आ’ इति जाते ‘भोभगोअघोअपूर्वस्य योऽशि’[३११] इति सूत्रेण रोर्यादेशे ‘लोपः शाकल्यस्य’[३१२] इति सूत्रेण यकारलोपे ‘निर्ऋत्या आ’ इति प्राप्यते । अतः ‘निर्ऋत्या आ’ इति संहितांशस्य वैयाकरणदिशा त्रिधा पदविभागः सम्भवः। त्रिविधे पक्षे स्वीकृते पदानां त्रिधान्वयः कर्तुं शक्यते, किञ्च त्रिधान्वयप्राप्तेः मन्त्रार्थस्य त्रैविध्यं समापतति । एवमवस्थायां कः पक्षः अत्र समाश्रयणीय इति पदपाठाद् विना नावगम्यते । यतो हि पदपाठे पदविभागकाले महर्षिणा शाकल्येन सन्धिं विभज्य प्रत्येकं पृथक् पदानि दण्डेन प्रदर्शितानि । मन्त्रस्यास्य पदपाठो यथा –

“अप॑ । इ॒हि॒ । म॒न॒सः॒ । प॒ते॒ । अप॑ । क्रा॒म॒ । प॒रः । च॒र॒ ।

प॒रः । निःऽऋ॑त्यै । आ । च॒क्ष्व॒ । ब॒हु॒धा । जीव॑तः । मनः॑ ॥”[३१३] इति।

पदपाठे महर्षिणा शाकल्येन ‘निर्ऋत्यै । आ’ इति पदविभागं प्रदर्श्य पक्षत्रयेषु प्रथमः पक्षोऽत्र समाश्रयणीय इति सूचितम् । तस्मात् पदपाठत एव प्रतीयते यत् ‘निर्ऋत्या’ इत्यत्र

---

[३०७] पा. सू. ६/१/७८
[३०८] तदेव. ८/३/१९
[३०९] तदेव. ८/३/३४
[३१०] तदेव. ८/२/६६
[३११] तदेव. ८/३/१७
[३१२] तदेव ८/३/१९
[३१३] ऋ. सं. १०/१६४/१ पदपाठः

चतुर्थीविभक्तिरस्ति, तेन चतुर्थ्यन्तरूपेण पदमिदमादाय भाष्यकृद्भिः मन्त्रार्थः कृतः। चतुर्थ्यन्तत्वेन स्वीकारे मन्त्रार्थस्य अनिष्टापत्तिरपि दूरीक्रियते। मन्त्रस्यास्य अर्थप्रदर्शनकाले सायणाचार्येण पदपाठप्रदर्शितं चतुर्थ्यन्तं पदं स्वीकृत्य उच्यते – "हे मनसस्पते स्वप्नावस्थस्य मनसः स्वामिन् दुःस्वप्नाधिदेव अपेहि अपगच्छ। स्वप्नावस्थावतो मत्तो निर्गच्छ। निर्गत्य च अप क्राम। देशान्तरं गन्तुं पादौ विक्षिप। दूरदेशं गच्छेत्यर्थः। अपक्रम्य च परः परस्ताद्विप्रकृष्टे देशे चर यथेच्छं वर्तस्व। अपि च निर्ऋत्यै पापदेवतायै परः परस्ताद्वर्तमानायै आ चक्ष्व। वयं न बाधनीया इति प्रब्रुहि। जीवतः मम मनः बहुधा बहुप्रकारं भवति। भोक्तव्येषु बहुषु विषयेषूत्सुकं सत् वर्तते। अतस्तद्विनाशकं दुःस्वप्नदर्शनं नश्यत्वित्यर्थः।"[३१४] इति।

द्वितीयमन्त्रेऽपि 'निर्ऋत्या इदम्' इत्यत्र पूर्वोक्तप्रकारेण त्रिधा पदविभागः सम्भवः। तत्रापि कः पदविभागः इष्टः इति संहितापाठतः तन्न ज्ञायते। किञ्च पूर्वोक्तमन्त्रे यतः चतुर्थ्यन्तरूपेण अन्वयः स्वीकृतस्तस्मादत्रापि 'निर्ऋत्या' इत्यत्र चतुर्थीविभक्तिरस्तीति मन्यते, परन्तु तथा स्वीकृते प्रकृतमन्त्रार्थो न ज्ञायते अपि च तदुपरि मन्त्रार्थस्यानिष्टापत्तिर्दृश्यते। तर्हि अत्र विभागत्रयेषु प्राप्तेषु कः पक्षः समाश्रयणीय इत्याकाङ्क्षायां पदपाठत एव ज्ञायते यदस्मिन् मन्त्रे 'निर्ऋत्या' इति न चतुर्थ्यन्तं पदं परन्तु षष्ठ्यन्तं पदमिदम्। मन्त्रस्यास्य पदपाठो यथा -

"देवाः। कपोतः। इषितः। यत्। इच्छन्। दूतः। निःऽऋत्याः। इदम्। आऽजगाम।

तस्मै। अर्चाम। कृणवाम। निःऽकृतिम्। शम्। नः। अस्तु। द्विऽपदे। शम्। चतुःऽपदे ॥"[३१५] इति।

तस्मात् मन्त्रस्यास्य भाष्यरचनाकाले भाष्यकृद्भिरपि पदपाठप्रदर्शितं षष्ठीविभक्तिकं पदमिदमादाय भाष्यं विरचितम्। मन्त्रस्यास्य व्याख्यानरूपेण सायणाचार्येणोच्यते - "हे देवाः

---

[३१४] ऋ. सं. १०/१६४/१ सायणभाष्यम्

[३१५] ऋ. सं. १०/१६५/१

इषितः प्राप्तः निर्ऋत्याः पापदेवतायाः दूतः अनुचरः कपोतः यत् बाधनम् इच्छन् अभिलषन् इदम् अस्मदीयं गृहम् आजगाम प्राप्नोत् तस्मै बाधनाय तद्धावननिवृत्यर्थम् अर्चाम । युस्मान् हविषा पूजयाम । ततः निष्कृतिं कपोतप्रवेशजन्यस्य दोषस्य परिहृतिं कृणवाम । अनेन हविर्दानेन करवाम। अतः नः अस्माकं द्विपदे पुत्राय शं सुखम् अस्तु चतुष्पदे गवाश्वप्रभृतये च शं सुखमस्तु।”[३१६] इति ।

अतोऽस्माभिरत्र दृश्यते यत् मन्त्रद्वयस्य संहितापाठे समप्रकारस्य पदस्य विद्यमानत्वेऽपि पदपाठत एव तयोः विषमविभक्तित्वम् अवगम्यते । प्रस्तुतस्य मन्त्रद्वयस्य केवलं संहितापाठं दृष्ट्वा ‘निर्ऋत्या’ इत्यस्य एकत्र चतुर्थीविभक्तिरन्यत्र षष्ठीविभक्तिरिति केनाप्युपायेन ज्ञातुं न शक्यते । पदपाठत एव तयोः पृथक्स्वरूपत्वं ज्ञायते । तस्मात् पदपाठकृता शाकल्येनात्र प्रकृतपदविभागं प्रदर्श्य मन्त्रार्थव्याख्यानकर्मणि भाष्यकृद्भ्यः साहाय्यं विहितम् ।

एवंप्रकारेण ऋग्वेदसंहिताया येषु स्थलेषु मन्त्रे पदविभागमादाय विद्वत्सु मतभेदो दृश्यते उत पदविभागविषये संहितापाठे संशयो दृश्यते तेषु सर्वत्रैव महर्षिशाकल्यविरचितः पदपाठः प्रमाणत्वेनाङ्गीक्रियते । कुत्रचित् एकस्मिन् संहितांशे एकं पदमस्ति उत पदद्वयमिति विषये संशयः, कुत्रचित् सन्धियुक्ते पदे द्विधा त्रिधा वा व्याकरणनियमेन पदविभागः कर्तुं शक्यते तत्र प्रत्येकस्मिन् पदविभागपक्षे पदानां पृथगन्वयः प्राप्यते, पृथगन्वये स्वीकृते तदा पृथक् मन्त्रार्थः समागच्छति । तदा कः पदविभागः समीचीनः, कथंप्रकारकः अन्वयो यथार्थः, प्रकृतमन्त्रार्थश्च कः इत्यादिविषयमादाय वेदव्याख्यातृषु व्याख्यारचनाकाले संशयाः समागच्छन्ति पदपाठाद् विना । ऋग्वेदसंहितायाः एवंविधेषु सर्वेषु स्थलेषु संहितापाठस्य पदानि दण्डेन पृथग् विभज्य उपर्युक्तानां सर्वेषां संशयानां समाधानं विहितम् । अतः यद्यपि परवर्तिनि काले स्कन्दस्वाम्यादिभाष्यकाराः वेदमन्त्राणां यथार्थतया व्याख्यानं कृतवन्तः साधारणान् निकषा

[३१६] ऋ. सं. १०/१६५/१. सायणभाष्यम्

वेदार्थावगमनाय परन्तु तेषां व्याख्यारचनाकार्ये आदावेव महर्षिणा शाकल्येन पदपाठकरणेन साहाय्यं विहितम् । अतोऽस्माभिः पदपाठकारः शाकल्यः वेदस्य व्याख्यातृत्वेनापि प्रतिपादयितुं शक्यते।

## ३.४ छान्दसदीर्घत्वम् आकारप्रश्लेषश्च

'उपसर्गाः क्रियायोगे'[३१७] इति सूत्रानुसारेण प्रादिगणे विद्यमाना निपातसंज्ञकाः शब्दाः धातोः योगे यदा प्रयुज्यन्ते तदा तेषामुपसर्गः इति संज्ञापि भवति।[३१८] उपसर्गा यथायथं वाक्ये प्रयुक्ताः सन्तः वाक्यार्थज्ञापने बहूपकुर्वन्ति । सम्यक्प्रयुक्ताश्चोपसर्गाः यथोपस्कुर्वते वाक्यविन्यासस्य न तथेतरत् किञ्चित् । साधारणतया उपसर्गाः धातोः प्राक् प्रयुज्यन्ते । पाणिनिना सूत्रं प्रणीतम् -'ते प्राग् धातोः'[३१९] इति। वैदिकसंहितासु ते कदाचित् धातोः प्राक् न प्रयुज्य परमपि परिलक्ष्यन्ते, कदाचिच्च व्यवधानेनापि व्यवह्रियन्ते। तदर्थं भगवता पाणिनिना सूत्रं विरचितम् 'छन्दसि परेऽपि', इति 'व्यवहिताश्च'[३२०] इति च । पुरातनैः विद्वद्भिः यथा उपसर्गाणां व्यवहारः प्रदर्शितः वाक्यसौष्ठववर्धनाय तदद्यत्वे न दृश्यते। कुर्ममहापुराणे वायोः सप्तानां नेमीनां नामानि एकस्मादेव धातोः विविधोपसर्गयोगेन प्रदर्शितानि - 'आवहः प्रवहश्चैव तत्रैवानुवहः पुनः। संवहो विवहश्चैव तदूर्द्धं स्यात् परावहः॥'[३२१] इति। तत्रैव हिरण्यकशिपोः चतुर्णां पुत्राणां नामान्युल्लिखितानि - 'हिरण्यकशिपोः पुत्राश्चत्वारः प्रथितौजसः...प्रह्लादश्चानुह्लादश्च संह्लादो ह्लाद एव च ।' इति। एतान्येव नामधेयानि पुराणान्तरेष्वपि दृश्यन्ते । ब्राह्मणग्रन्थेष्वप्येवमुपसर्गप्रयोगप्रवृत्तिः प्रचलितासीत् ।

---

[३१७] पा. सू. १/४/५९

[३१८] प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप। इति प्रादयः।(पा.ग.पा. १/४)

[३१९] पा. सू. १/४/४०

[३२०] तदेव. १/४/८१-८२

[३२१] कु. पु. पूर्वा. ४१/६

शतपथब्राह्मणे अग्नेर्विषये आम्नायते - 'चत्वारो ह वा अग्नयः। आहित उद्धृतः प्रहृतो विहृतः।'[३२२] इति। वैदिकसंहितास्वपि एवंप्रकारेणोपसर्गानामधिकः प्रयोगः प्राप्यतेतराम्।

एतेषामुपसर्गाणां संख्या विंशतिर्वा द्वाविंशिर्वा । उपसर्गाणामर्थवत्वविषये विद्वांसो विवदमाना दृश्यन्ते । केचिदाचार्या उपसर्गाणां वाचकत्वं स्वीकुर्वन्ति, केचिच्च द्योतकत्वम् । "न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः। नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति ।"[३२३] इति निरुक्तवचनाज्ज्ञायते यत् शाकटायनमतानुसारेण उपसर्गाः वाक्ये पृथक् प्रयुक्ताः सन्तः कमप्यर्थं न निर्वदन्ति । ते तु नाम्नः आख्यातस्य वा अर्थविशेषं प्रकटयन्ति । अस्यैव सूत्रस्य व्याख्या स्कन्दस्वामिनोच्यते – 'नामाख्यातयोरेव कर्मणोऽर्थस्य उपसंयुज्यते इति उपसंयोगो विशेषः प्रकर्षादिस्तस्य द्योतका भवन्ति।' इति। अस्यैव सूत्रस्य व्याख्यानावसरे दुर्गाचार्येण उपमया निरुक्तवृत्तौ स्पष्टीकृतमिदम् – 'स एष नामाख्यातयोरर्थविशेष उपसर्गसंयोगे सति व्यज्यते, यथा प्रदीपसंयोगे द्रव्यस्य गुणविशेषोऽभिव्यज्यमानो द्रव्याश्रय एव भवति, न प्रदीपाश्रयः'। इति। गार्ग्यमतानुसारम् उपसर्गाणां पृथगर्थवत्वमस्ति। निरुक्तग्रन्थे यास्काचार्येणोच्यते – "उच्चावचाः पदार्था भवन्तीति गार्ग्यः"[३२४] इति। उच्चाश्च अवचाश्च उच्चावचा नाम बहुप्रकाराः। उपसर्गाणां स्वकीयाः विविधाः अर्थाः वर्तन्ते इति गार्ग्यराद्धान्तः। निरुक्तकृद् यास्काचार्यः उपसर्गाणां वाचकत्वमेव स्वीकरोति, न द्योतकत्वम् । तस्मात्तेनोच्यते – "तद् य एषु पदार्थः प्राहुरिमे तं नामाख्यातयोरर्थविकरणम्"[३२५] इति। न केवलं तेनोपसर्गाणां वाचकत्वमङ्गीकृतमपि च तेन उपसर्गानामर्था अपि प्रदर्शिताः 'आ इत्यर्वागर्थे', 'प्रपरेत्यस्य

---

[३२२] शत. ब्रा. ११/८/२/१

[३२३] नि. १/४/४

[३२४] तदेव.

[३२५] तदेव.

प्रातिलोम्यम्' इत्येवंप्रकारेण। वैयाकरणानां निकाये उपसर्गा द्योतकाः उपसर्गा वाचका इति द्वौ वादावुपलभ्यते। भर्तृहरिणा वाक्यपदीयग्रन्थ उच्यते –

"स वाचको विशेषाणां सम्भवाद् द्योतकोऽपि वा।

शक्त्याधानाय धातोर्वा सहकारी प्रयुज्यते ॥"[३२६] इति।

उपसर्गाणां वाचकत्वं द्योतकत्वं वा भवतु परन्त्वेते उपसर्गा वाक्ये प्रयुक्ताः सन्तो भावप्रकाशे वाक्यविन्यासे च बहूपकुर्वन्तीति विद्वांसो न विवदन्ते। धातुना सह उपसर्गाणां प्रयोगे वाक्यार्थे अवस्थान्तरं परिलक्ष्यते। कश्चिदुपसर्गो धात्वर्थं बाधते, कश्चित्तमेव धात्वर्थमनुवर्तते, कश्चित्तमेव धात्वर्थं विशेषेण वदति च। तस्मादुच्यते –

'धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते।

तमेव विशिनष्ट्यन्योऽनर्थकोऽन्यः प्रयुज्यते'॥ इति।

धात्वर्थबाधे – इण्-धातोरर्थो हि गतिः। यथा बालको विद्यालयमेति नाम गच्छति। परन्तु अव-पूर्वकाद् इण्-धातोरर्थो हि ज्ञानम्। यथा – अवैति स पाठम्, अवैति नाम जानाति। धात्वर्थानुवर्तने – जि-धातोरर्थो हि जयः, वि-पूर्वकाद् जिधातोरर्थोऽपि जय एव। धात्वर्थविशेषे यथा – नम्-धातोरर्थो नमनम्, प्र-पूर्वकाद् नम्-धातोरर्थः प्रकृष्टरूपेण नमनम्। गम्-धातोरर्थो गमनम्, वि-पूर्वकाद् गम्-धातोरर्थो विशेषेण गमनम्। एवंप्रकारेण उपसर्गयोगेन धात्वर्थस्य बहुधावस्थान्तरं परिलक्ष्यते। उच्यते च –

"उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।

प्रहाराहारविहारसंहारपरिहारवत् ॥" इति।

---

[३२६] वा. प. २/१८८

किञ्च केचनोपसर्गाः कृति प्रत्यये परतः यमर्थमाहुः तिङि परतो न तथा। यथा प्रशितः इति आदृतो विनीतो वा भवति, प्रश्रयते इति तु प्रश्रयणपूर्वकं निषदनमाचष्टे प्रायेण। कुड्यं प्रश्रयते नाम कुड्यं संश्रित्य निषीदति इति। कदाचित् परस्मैपदी धातुः उपसर्गयोगेन आत्मनेपदी भवति, आत्मनेपदी धातुः परस्मैपदी भवति। जि-धातुः परस्मैपदे प्रयुज्यते यथा राजा परराज्यं जयति, परन्तु विपूर्काद् जि-धातुः आत्मनेपदे प्रयुज्यते यथा – 'विजयतां शूद्रको महाराजः'। रम्-धातुः आत्मनेपदी परन्तुः व्याङ्भ्यां योगेन स परस्मैपदी भवति।

'विद्यार्थी विद्यालयं गच्छति', 'विद्यार्थी विद्यालयाद् आगच्छति' इत्यनयोर्वाक्ययोर्मध्ये धातुः एक एव परन्तु वाक्यार्थे क्रियार्थः विपरीतः, एवमेव वर्तते उपसर्गमाहात्म्यम्। अद्यत्वे यद्यपि वाक्यवैचित्र्यवर्धनाय उपसर्गाणां तादृशः प्रयोगो न दृश्यते परन्तु पुरा लौकिकसाहित्ये तथा वैदिकसाहित्ये विविधार्थेषु उपसर्गाणामाधिक्येन प्रयोगः अप्राप्यन्त, वैदिकसंहितापि नास्य व्यत्ययः। संहितागते मन्त्रे उपसर्गस्य विद्यमानताविषये यदि सम्यग् ज्ञातुं न शक्यते तदा प्रकृतमन्त्रार्थोऽपि अज्ञात एव भवेत्। यतो हि उपसर्गयोगेन मन्त्रार्थः अवस्थान्तरं प्राप्नोति। ऋषिभिर्दृष्टे संहितागतमन्त्रे बहुत्र पदेषु दीर्घस्वराः दृश्यन्ते। तेषु कुत्रचित् ह्रस्वस्वरस्य छान्दसदीर्घत्वं वर्तते कुत्रचिच्च तन्मध्ये दीर्घस्वरस्य प्रश्लेषो वर्तते। संहिताया नामान्तरं वर्तते छन्दः इति। छन्दसि नाम संहितायां प्रकृतिभूतानि ह्रस्वान्तानि यानि पदानि दीर्घरूपेण परिलक्ष्यन्ते तान्येव छान्दसदीर्घाभिधयाभिधीयन्ते। वैदिकमन्त्राणां संहितापाठे यानि छान्दसदीर्घत्वेनोच्यन्ते तानि तु प्रकृत्या ह्रस्वान्तान्येव। संहितागतं मन्त्रं दृष्ट्वा कुत्र छान्दसदीर्घत्वं कुत्र च दीर्घस्वरस्यावस्थानं तन्न ज्ञातुं शक्यते। तज्ज्ञानेन विनापि प्रकृतमन्त्रार्थः न ज्ञायते। केवलं पदपाठमेव दृष्ट्वा तदवगम्यते। एवं कुत्रचित् छान्दसदीर्घत्वमुत दीर्घस्वरावस्थानमिति विषये व्याख्यातृषु मतभेदोऽपि दृश्यते। तत्र बहुभिः व्याख्यातृभिः

शाकल्यकृतपदपाठमेव मान्यतां प्रदाय भाष्याणि रचितानि । ऋग्वेदस्य प्रथममण्डलान्तर्गते एकस्मिन् सूक्ते एवं मतभेदो दृश्यते। तद्यथा –

''अबो॑ध्य॒ग्निर्ज्म उदे॑ति॒ सूर्यो॒ व्यु॒१॑षाश्च॒न्द्रा म॒ह्या॑वो अ॒र्चिषा॑।

आयु॑क्षाताम॒श्विना॒ यात॑वे॒ रथं॒ प्रासा॑वीद्दे॒वः स॑वि॒ता जग॒त्पृथ॑क्॥'' इति।[३२७]

अस्याः संहितायाः पदपाठो यथा –

''अबो॑धि । अ॒ग्निः । ज्मः । उत् । ए॒ति॒ । सूर्यः॑ । वि । ऊ॒षाः । च॒न्द्रा । म॒ही । आ॒व॒ः । अ॒र्चिषा॑।

अयु॑क्षाताम् । अ॒श्विना॑ । यात॑वे । रथ॑म् । प्र । अ॒सा॒वी॒त् । दे॒वः । स॒वि॒ता । जग॑त् । पृथ॑क् ॥'' इति।[३२८]

अत्र दृश्यते संहितापाठतः पदपाठे पदविभागकाले शाकल्यः 'आयुक्षाताम्' इति पदम् एकमेव स्वीकृतवान् । पुनश्च तत्र आकारः ह्रस्वत्वेन अकाररूपेण पठितः 'अयुक्षाताम्' इति। अतः अनेन ज्ञाप्यते संहितापाठे आकारस्तु छान्दसदीर्घः। वस्तुतस्तु तत्र अकार एव वर्तते इति शाकल्याभिमतम्। परन्तु केचित् भाष्यकाराः 'आयुक्षातामि'त्यत्र पदद्वयं स्वीकुर्वन्ति। तेषान्नये आयुक्षातामित्यत्र 'आ' 'अयुक्षाताम्' च इति पदद्वयम्। संहितायान्तु 'अकः सवर्णे दीर्घः'[३२९] इति नियमेन सन्धिवशात् 'आयुक्षातामि'ति जातम् । प्रसिद्धः भाष्यकारः सायणाचार्यः शाकल्याभिमतं पदविभागमुपेक्षापूर्वकं पदद्वयपक्षमादाय भाष्यं चकार। सायणाचार्यमतेन अत्र 'आ' इति उपसर्गस्य प्रश्लेषः अस्ति यः आभिमुख्यार्थः। अतः तेन मन्त्रार्थः क्रियते – '...हे अश्विनौ युस्मत्सम्बन्धिनं रथं यातवे देवयजनगमनाय रासभाभ्याम् आयुक्षाताम् आभिमुख्येन

---

[३२७] ऋ. सं १/१५७/१

[३२८] तदेव. पदपाठः

[३२९] पा. सू. ६/१/१०१

युञ्जाथाम्।'[३३०] इति। अस्यैव मन्त्रस्य व्याख्यानसमये व्याख्याकारः वेङ्कटमाधवः अत्र एकमेव पदं स्वीकृत्य भाष्यं चकार – '...अश्विनौ च गमनाय आत्मीयं रथं युक्तवन्तौ'[३३१] इति। युक्तवन्तौ इत्यत्र वेङ्कटमाधवेन आभिमुख्यार्थः न प्रदर्शितः। मन्त्रेऽस्मिन् शाकल्यकृतः पदविभाग एव यथार्थः, अत्र आकारस्य प्रश्लेषो नास्ति छान्दसदीर्घमिदं पदमिति ऋग्वेदप्रातिशाख्यकृता शौनकेनापि उक्तम् । शौनकेन शाकल्यमतमादाय छान्दसदीर्घमिदं निपातनरूपेणोल्लिखितम्। उक्तञ्च शौनकेन –

''अहिन्नारिण्कपथ आयुक्षातामुदावता ।

रिक्थमारैग् य आयुक्त कुरु श्रवणमावृणि ॥''[३३२] इति।

अत्र भाष्यकृतोवटेनाप्युच्यते – 'योनिम् आरैग् इत्यादीनि यानि पदानि तेषु दीर्घत्वम् आदिस्वरस्य निपात्यते ।'[३३३] इति।

शाकल्येन अस्मिन् मन्त्रे यथा छान्दसदीर्घत्वं सूचितं तथैवान्यत्र संहितामध्ये आकारप्रश्लेषं दर्शयित्वा प्रकृतमन्त्रार्थो ज्ञापितः। ऋक्संहितायाः प्रथममण्डलस्य एको मन्त्रो यथा –

''उप नो देवा अवसा गमयन्त्वङ्गिरसां सामभिः स्तूयमानाः।

इन्द्र इन्द्रियैर्मरुतो मरुद्भिरादित्यैर्नो अदितिः शर्म यंसत्॥''[३३४] इति।

---

[३३०] ऋ. सं. १/१५७/१ सायणभाष्यम्

[३३१] तदेव. वेङ्कटमाधवभाष्यम्

[३३२] ऋ. प्रा. २/७७

[३३३] तदेव. उवटभाष्यम्

[३३४] ऋ. सं. १/१०७/२

संहितागतमिदं मन्त्रं दृष्ट्वा 'उप नो देवा अवसा' इत्यत्र 'अवसा' इत्येकं पदं मन्यते, यस्यार्थो रक्षणेनेति। संहितावस्थायां केनाप्युपायेन अवसापदे 'आ' इत्युपसर्गस्य प्रश्लेषः ज्ञातुं न शक्यते। केवलं पदपाठं दृष्ट्वा 'अवसा' इत्यत्र 'अवसा' 'आ' इति पदद्वयमस्तीति ज्ञायते। अस्य मन्त्रस्य पदपाठः एवं प्रदर्शितः शाकल्येन –

''उप । नः । देवाः । अवसा । आ । गमन्तु । अङ्गिरसाम् । सामऽभिः । स्तूयमानाः ।

इन्द्रः । इन्द्रियैः । मरुतः । मरुत्ऽभिः । आदित्यैः । नः । अदितिः । शर्म । यंसत् ॥''[३३५] इति

पदपाठं दृष्ट्वा 'अवसा' इत्यत्र 'आ' इत्युपसर्गस्य प्रश्लेषं स्वीकृत्य भाष्यकारैः मन्त्रार्थः प्रदर्शितः। सायणाचार्येणोक्तम् - 'देवाः दानादिगुणयुक्ताः सर्वे देवा अवसा रक्षणेनास्मभ्यम् दातव्येनान्नेन वा युक्ताः नः अस्मान् स्तोतृन् उप आ गमन्तु उपागच्छन्तु प्राप्नुवन्तु'[३३६] इति। प्राचीनभाष्यकृता स्कन्दस्वामिनाप्युच्यते - 'न अस्मान् देवा इन्द्रादय अवसा पालनेन तर्पणेन वा । तर्पणार्थे पालनार्थे वेत्यर्थः। उप आ गमन्तु उपागच्छन्तु।'[३३७] इति। यद्यत्र पदपाठकृता आकारप्रश्लेषो न प्रदर्शितस्तदा मन्त्रार्थो विपरीतो जातः। तदा आगच्छन्तु प्राप्नुवन्तु इत्यस्यार्थो गच्छन्तु इति भवेत् । अतोऽत्र पदपाठकृता शाकल्येन छान्दसदीर्घत्वज्ञापनेन प्रकृतमन्त्रार्थकरणे साहाय्यं विहितम् । पुनश्च द्वितीयमण्डलस्य एकस्मिन् सूक्ते एवंप्रकारेणैव आकारप्रश्लेषं सूचयित्वा प्रकृतमन्त्रार्थो ज्ञापितः । तद्यथा –

''वातेवाजुर्या नद्येव रीतिरक्षीइव चक्षुषा यातमर्वाक्।

---

[३३५] ऋ. सं. १/१०७/२ पदपाठः

[३३६] तदेव. सायणभाष्यम्

[३३७] तदेव.स्कन्दस्वामिभाष्यम्

हस्ताविव तन्वे३ शंभविष्ठा पादेव नो नयतं वस्यो अच्छ॥''[338]

इति संहितापाठे 'चक्षुषा यातमर्वाक्' इत्यंशे 'चक्षुषा' इति पदमापातदृष्ट्या 'चक्षुष्' इति प्रातिपदिकस्य तृतीयैकवचनस्य रूपं मन्यते। पदपाठत एव ज्ञायते यदत्र चक्षुषेति पदे आकारस्य प्रश्लेषो वर्तते। यतो हि पदपाठे शाकल्येन दण्डेन पदविभागकाले आकारप्रश्लेषः प्रदर्शितः। अस्य मन्त्रस्य पदपाठो यथा –

''वाताऽइव । अजुर्या । नद्याऽइव । रीतिः । अक्षी इवेत्यक्षी इव । चक्षुषा । आ । यातम् । अर्वाक् ।

हस्तौऽइव । तन्वे । शम्ऽभविष्ठा । पादाऽइव । नः । नयतम् । वस्यः । अच्छ ॥''[339] इति

पदपाठं दृष्ट्वैवावगम्यते यच्चक्षुषेति पदे 'आ' इत्युपसर्गो विद्यते। 'चक्षुषा आ' इत्यवस्थायाम् "अकः सवर्णे दीर्घः"[340] इति सूत्रेण सवर्णदीर्घे चक्षुषा इति पदं निष्पन्नम्। परवर्तिनि काले वेदव्याख्याकृतः मन्त्रस्यास्य व्याख्यानकाले पदपाठकारप्रदर्शितमाकारप्रश्लेषमादायैव मन्त्रार्थः व्याख्यातः। मन्त्रस्यास्य व्याख्यानरूपेण भाष्यकृता सायणाचार्येणोक्तं यत् – 'हे अश्विनौ वातेव वाताविव अजुर्या जरितुमशक्यौ नद्येव नद्याविव रीतिः॥ व्यत्ययेनैकवचनम्॥ शीघ्रं गन्तारौ युवाम्। अक्षी इव अक्षिणी इव चक्षुषा दर्शनेन अर्वाक् अस्मदभिमुखम् आ यातम् आगच्छतम्। किञ्च हस्तेव हस्ताविव पादेव पादाविव तन्वे शरीराय शंभविष्ठा सुखस्य भावयितृतमौ युवां नः अस्मान् वस्यः वसीयः श्रेष्ठं धनं अच्छ प्रति नयतं प्रापयतम्'।[341] इति। अस्य मन्त्रस्य व्याख्यानप्रसङ्गे वेङ्कटमाधवेनोच्यते – "हे अश्वनौ! वाताविव अजरौ अस्मान् आगच्छतम्। नदीभवा जलरीतिः इव तथा अक्षी इव मध्यस्थेन तेजसा सह अस्मान् आगच्छतम्। हस्ताविव

[338] ऋ. सं २/३९/५

[339] तदेव. पदपाठः

[340] पा. सू. ६/१/१०१

[341] ऋ. सं. २/३९/५ सायणभाष्यम्

शरीरस्य सुखस्य भावयितारौ पादौ इव अस्मान् नयतम् अभ्युदयं प्रति" इति। अत्रापि आकारावस्थानं न दर्शितं चेत्तदा विपरीतो मन्त्रार्थोऽभवत्। अतः पदपाठकृता शाकल्येन पदपाठे य आकारप्रश्लेषः प्रदर्शितः स प्रकृतमन्त्रार्थज्ञापकः।

ऋक्संहितायाः प्रथममण्डले एवमपर एको मन्त्रो यथा –

''मध्वः सोमस्याश्विना मदाय प्रत्नो होता विवासते वाम्।

बर्हिष्मती रातिर्विश्रिता गीरिषा यातं नासत्योप वाजैः''॥[342] इति

अस्य मन्त्रस्यार्थकरणकाले 'होता विवासते वाम्' इत्यंशे पदत्रयमेव वर्तते इति मन्यते। होतेति होतृशब्दस्य प्रथमैकवचनस्य रूपमेकमेव पदम्, विवासते इति प्रथमपुरुषैकवचनान्तं तिङन्तपदम्, वामिति युस्मच्छब्दस्य द्वितीयाया द्विवचनान्तं रूपञ्च। आपातदृष्ट्या होतेत्यत्र 'होता + आ' इत्याकारस्य प्रश्लेषो ज्ञातुं न शक्यते। पदपाठत एव तदवगम्यते। मन्त्रस्यास्य पदपाठो यथा –

'मध्वः । सोमस्य । अश्विना । मदाय । प्रत्नः । होता । आ । विवासते । वाम्।

बर्हिष्मती । रातिः । विऽश्रिता । गीः । इषा । यातम् । नासत्या । उप । वाजैः ॥' इति

अत्र दृश्यते यत् पदपाठकरणसमये शाकल्येन 'होता' इति पदे 'आ' इत्युपसर्गस्य प्रश्लेषः प्रदर्शितः।[343] पदपाठे 'आ' इत्युपसर्गस्य विद्यमानत्वात् भाष्यकारेण सायणाचार्येण मन्त्रार्थः प्रदर्शितः - 'हे अश्विनौ मध्वः मधुना माधुर्योपेतेन सोमस्य सोमेन मदाय युवयोर्मदार्थं प्रत्नः चिरन्तनः होता होमनिष्पादको यजमानः वाम् युवाम् आ विवासते। विवासतिः परिचरणकर्मा।

[342] ऋ. सं. १/११७/१

[343] । मध्वः । सोमस्य । अश्विना । मदाय । प्रत्नः । होता । आ । विवासते । वाम्। ऋ. सं १/११७/१ पदपाठः

आङ् मर्यादायाम्। यथाशास्त्रं परिचरति...'[३४४] इति। स्कन्दस्वाम्यादिभिरन्यैः भाष्यकारैरपि एवमेव मन्त्रार्थः प्रदर्शितः। अत्र पदपाठे यदि आ-इत्युपसर्गस्य प्रश्लेषो न प्रदर्शितस्तदा मर्यादार्थकस्य आङित्युपसर्गस्याविद्यमानत्वात् यथाशास्त्रं परिचरति इत्यर्थो नोपलभ्येत। अतः अत्र पदपाठकृता मन्त्रार्थस्य अनिष्टापत्तिनिवारणपूर्वकं यथार्थतया व्याख्यानं प्रदर्शितम्। अन्यत्र च क्रियापदे दीर्घस्वरप्रश्लेषं दर्शयित्वा मन्त्रार्थं ज्ञापितवान् । द्वितीयमण्डलस्य एकः संहितागतमन्त्रोऽस्ति –

"ऋतुर्जनित्री तस्या अपस्परि मक्षु जात आविशद्यासु वर्धते।

तदाहना अभवत्पिप्युषी पयोंऽशोः पीयुषं प्रथमं तदुक्थ्यम्" ॥[३४५] इति।

अस्याः संहितायाः पदपाठो यथा –

"ऋतुः । जनित्री । तस्याः । अपः । परि । मक्षु । जातः । आ । अविशत् । यासु । वर्धते ।

तत् । आहना । अभवत् । पिप्युषी । पयः । अंशोः । पीयुषम् । प्रथमम् । तत् । उक्थ्यम्"॥ इति।

अस्मिन् मन्त्रे पदपाठे 'आविशत्' इति पदे 'आ, अविशत्' इति पदद्वयं दर्शयित्वा ज्ञापितवान् यत् अत्र 'आ' इति न छान्दसदीर्घत्वं परन्तु अत्र 'आ' इत्युपसर्गो धातोः प्राग् वर्तते, तयोश्च 'अकः सवर्णे दीर्घः'[३४६] इति नियमेन सवर्णदीर्घे आविशदिति जातम्। तस्माद् भाष्याकाराः अत्र आकारप्रश्लेषं गृहीत्वा भाष्याणि चक्रुः। अत्र स्कन्दस्वामिनोच्यते – 'ऋतुः चन्द्रमसो जनयित्री।

---

[३४४] ऋ. सं १/११७/१ सायणभाष्यम्

[३४५] ऋ. सं २/१३/१

[३४६] पा. सू. ६/१/१०१

तस्याः जनयित्र्या वेगात् पक्षादौ शीघ्रं जातः आ विशत्योषधीः। यासु ओषधिषु वर्धते ।'[३४७] इति।

एवं प्रथममण्डले अपरो मन्त्रो यथा –

"त्रिवन्धुरेण त्रिवृता रथेन त्रिचक्रेण सुवृता यातमर्वाक्

पिण्वतं गा जिन्वतमर्वतो नो वर्धयतमश्विना वीरमस्मे॥"[३४८] इति।

मन्त्रस्यास्य कक्षीवानृषिः, अश्विद्वयं देवता च । मन्त्रेऽस्मिन् 'सुवृता यातमर्वाक्' इत्यत्रापातदृष्ट्या पदत्रयं मन्यते । सुवृता नाम शोभनं गच्छता इति तृतीयान्तं पदम्, यातमिति याधातोर्लोटि मध्यमपुरुषद्विवचनान्तं क्रियापदम्, अर्वागिति आभिमुख्यार्थकं क्रियाविशेषणञ्च। एवंप्रकारेण पदत्रयमादाय मन्त्रार्थः क्रियते चेत्तदा हे अश्विनौ! युवाम् अस्मदभिमुखाद् गच्छतम् इति मन्त्रार्थः प्राप्यते । परन्तु तथा कृते मन्त्रार्थस्य अनिष्टापत्तिर्भवति। अत्र पदपाठो दृश्यते चेत्तदा अनिष्टापत्तेर्निरसनं भवति । अस्य मन्त्रस्य पदपाठे शाकल्येन 'सुवृता' इत्यत्र आकारप्रश्लेषः प्रदर्शितः। आकारप्रश्लेषमादायैव प्रकृतमन्त्रार्थः कर्तुं शक्यते । ऋचोऽस्याः पदपाठो यथा –

"त्रिऽवन्धुरेण । त्रिऽवृता । रथेन । त्रिऽचक्रेण । सुऽवृता । आ । यातम् । अर्वाक् ।

पिन्वतम् । गाः । जिन्वतम् । अर्वतः । नः । वर्धयतम् । अश्विना । वीरम् । अस्मे इति॥"[३४९] इति।

---

[३४७] ऋ.सं २/१३/१ स्कन्दस्वामिभाष्यम्

[३४८] ऋ. सं. १/११८/२

[३४९] तदेव. पदपाठः

अत्र दृश्यते यत् पदापाठे शाकल्येन 'सुवृता' इत्यस्य 'सुऽवृता आ' इति पदद्वयं दर्शितम्। सुवृता इति तृतीयान्तं पदम्, आ-इत्युपसर्गश्च। तयोः 'अकः सवर्णे दीर्घः'[350] इति सूत्रेण सवर्णदीर्घे सुवृता इति पदं निष्पन्नम्। मन्त्रेऽस्मिन् पदपाठप्रदर्शिते आकारप्रश्लेषे स्वीकृते सति पदानां सम्यगन्वयोपपत्तिर्भवति। तेन च प्रकृतमन्त्रार्थोऽवगम्यते। 'सुवृता' इत्यत्र आ-इत्युपसर्गस्य विद्यमाने हे अश्विनौ! युवाम् अस्मदभिमुखम् आयातम् नाम आगच्छतमिति मन्त्रस्य सम्यगर्थोपपत्तिर्दृश्यते। अन्यथा आ-इत्युपसर्गस्याभावे मन्त्रार्थः पूर्णतया विपरीतो जातः। एवंप्रकारेणात्र शाकल्येन पदपाठे आकारप्रश्लेषं दर्शयित्वा वेदस्यार्थव्याख्याने तथा प्रकृतमन्त्रार्थप्रकाशने साहाय्यं विहितम्। तदुत्तरकालीनैः वेदव्याख्यातृभिरपि आकारप्रश्लेषमादाय मन्त्रोऽयं व्याख्यातः। मन्त्रस्यास्य व्याख्यानप्रसङ्गे सायणाचार्येणोक्तम् – "त्रिबन्धुरेण। वन्धुरं सारथिस्थानम्। त्रिप्रकारबन्धुरोपेतेन त्रिवृता त्रिधा वर्तमानेन त्रिचक्रेण चक्रत्रयोपेतेन सुवृता शोभनं गच्छता रथेन अर्वाक् अस्मदभिमुखम् आ यातम् आगच्छतम्। आगत्य च अस्मदीयाः गाः पिन्वतं पयसा पूरयतम्। नः अस्माकम् अर्वतः अश्वान् जिन्वतं प्रीणयतम्। अपि च हे अश्विनौ अस्मे अस्माकं वीरं पुत्रादिकं वर्धयतं प्रवृद्धं कुरुतम्..." इति। मन्त्रस्यास्य व्याख्यानप्रसङ्गे स्कन्दस्वामिनोच्यते – "त्रिवन्धुरेण त्रिसारथिस्थानेन। त्रिभिश्चक्रैर्वर्तते गच्छतीति त्रिवृत्, तेन त्रिवृता स्वेन रथेन। त्रिचक्रेण अवयवभूतान्यपि त्रिण्येव चक्राणि यस्य सः त्रिचक्रः, तेन। सुवृता सुगमनेन। आ यातम् आगच्छतम् अर्वाक् अस्मदभिमुखमागत्य च पिन्वतम् सेचयतम्। धेनुकाः कुरुतमित्यर्थः। गाः। जिन्वतम् प्रीणयतम् अर्वतः अश्वान् नः अस्माकम्। वर्धयतम् हे अश्विनौ! वीरम् पुत्रपौत्रादिकम् अस्मे अस्माकम्" इति। अस्यैव मन्त्रस्य व्याख्यानप्रसङ्गे भाष्यकृता वेङ्कटमाधवेनोच्यते – "त्रिवन्धुरेण

[350] पा. सू. ६/१/१०१

त्रिसन्धानेन प्रउगाकारेण त्रिचक्रेण शोभनवर्तनेन आगच्छतम् अभिमुखम् । निर्गमयतम् अस्मभ्यम् पशून् । प्रयच्छतम् अश्वान् । वर्धयतम् च अश्विनौ! पुत्रमस्माकम्" इति।

अतोऽत्र सर्वेष्वेव भाष्येषु दृश्यते यत् 'सुवृता' इत्यत्र 'सुवृता आ' इति पदविच्छेदमादाय मन्त्रार्थः कृतः । शाकल्येनात्र आकारप्रश्लेषे न प्रदर्शिते तदा मन्त्रार्थो विपरीतो जातः। तेन च विपरीतमन्त्रार्थेन यथार्थतया देवतास्मरणाभावे 'इन्द्रशत्रुर्वर्धस्व' इत्यादौ स्वरप्रमादे यथा विपरीतं फलं संघटितं तद्वत् विपरीतं फलं समापतेत् ।

संहितागते मन्त्रे दीर्घस्वरं दृष्ट्वा तत्र छान्दसदीर्घत्वमुत दीर्घस्वरस्यावस्थानं तन्न निर्णेतुं शक्यते । छान्दसदीर्घत्वे यो मन्त्रार्थः प्राप्यते दीर्घस्वरावस्थाने तद्विपरीतोऽर्थ आयाति । पदपाठं दृष्ट्वा एव तन्निश्चीयते छान्दसदीर्घत्वविषये । प्रथममण्डलान्तर्गतमेकमुदाहरणं प्रस्तूयते –

"य इ॑न्द्राग्नी चि॒त्रत॑मो रथो॑ वाम॒भि विश्वा॑नि॒ भुव॑नानि॒ चष्टे॑।

तेना या॑तं स॒रथं॑ तस्थि॒वांसाथा॒ सोम॑स्य पिबतं सु॒तस्य॑।।" इति।[351]

मन्त्रस्यास्य अन्त्ये चरणे 'तेना' इत्येकं पदं, 'अथा' इत्येकं पदञ्च दीर्घस्वरान्तं वर्तते । अत्र मन्त्रार्थकरणसमये उभयत्र दीर्घस्वरस्यावस्थानं स्वीकर्तुं शक्यते, उभयत्र छान्दसदीर्घत्वमपि स्वीकर्तुं शक्यते, अपि चैकत्र छान्दसदीर्घत्वमपरत्र दीर्घस्वरावस्थानं स्वीकर्तुं शक्यते । एवमवस्थायामत्र कः पक्षः समाश्रयणीयः इति पदपाठेन विना न ज्ञायते । पदपाठेन विना मन्त्रार्थो व्याख्यायते चेत्तदा यथार्थपक्षसमाश्रयणाभावे प्रकृतमन्त्रार्थप्रकाशने वैपरीत्याशङ्का उदेति । अस्य मन्त्रस्य पदपाठो यथा –

"यः । इ॒न्द्रा॒ग्नी॒ इति॑ । चि॒त्रऽत॑मः । रथः॑ । वा॒म् । अ॒भि । विश्वा॑नि । भुव॑नानि । चष्टे॑ ।

[351] ऋ. सं. १/१०८/१

तेन॑ । आ । या॒त॒म् । स॒ऽरथ॑म् । त॒स्थि॒ऽवांसा॑ । अथ॑ । सोम॑स्य । पि॒ब॒त॒म् । सु॒तस्य॑ ॥"
इति।

अत्र पदपाठतः ज्ञायते यत् 'तेना' इत्यत्र दीर्घस्वरावस्थानं वर्तते। 'अथा' इत्यत्र च छान्दसदीर्घत्वं वर्तते । यतो हि पदपाठे 'तेना' इत्यस्य 'तेन आ' इति पदविभागः प्रदर्शितः। 'तेन आ' इति संहितावस्थायाम् 'अकः सवर्णे दीर्घः'[३५२] इत्यनेन सूत्रेण सवर्णदीर्घे जाते 'तेना' इति सिद्धम् । परन्तु 'अथा' इत्यस्य 'अथ' इत्येवंप्रकारेण प्रदर्शितत्वादत्र आकारप्रश्लेषो नास्तीति निश्चीयते। अतः 'अथा' इति छान्दसदीर्घं पदम् । 'तेना' इत्यत्र छान्दसदीर्घत्वं स्वीक्रियते चेत्तदा हे इन्द्राग्नी युवां गच्छतमित्यन्वयो भवेत् । तथा कृते मन्त्रार्थस्य वैपरीत्यं जायते । पुनः 'अथा' इत्यत्र आकारप्रश्लेषो स्वीक्रियते चेत् तदापि मन्त्रार्थस्यानिष्टापत्तिः। अतः अत्र पदपाठत एव छान्दसदीर्घत्वविषये निश्चित्करणेन पदानां सम्यक्तया अन्वयः कर्तुं शक्यते । तेन च प्रकृतमन्त्रार्थज्ञानमपि सम्भवति। परवर्तिनः वेदभाष्यकृतः शाकल्यप्रदर्शितमाकारप्रश्लेषं तथा छान्दसदीर्घत्वमादायैव मन्त्रस्यास्य भाष्याणि चक्रुः। मन्त्रस्यास्य व्याख्यानरूपेण सायणाचार्येणोच्यते – "हे इन्द्राग्नी चित्रतमः अतिशयेन चायनीयः वां युवयोः सम्बन्धी यः रथः विश्वानि भुवनानि भूतजातानि अभि चष्टे आभिमुख्येन पश्यति । सुवर्णमयत्वात् रत्नखचितत्वाच्च स्वप्रभाभिः कृत्स्नं जगद् भासयतीत्यर्थः। तेन रथेन आ यातम् अस्मद्यज्ञमागच्छतम् ।..."[३५३] इति। अत्र स्पष्टतया दृश्यते यत् पदपाठे आकारप्रश्लेषे न प्रदर्शिते अस्मद्यज्ञमागच्छतमित्यस्य स्थाने अस्मद्यज्ञाद् गच्छतमिति विपरीतो मन्त्रार्थः स्यात्। अस्य मन्त्रस्य स्कन्दस्वामिप्रदर्शितं भाष्यं यथा "हे इन्द्राग्ने! द्वे एते सूक्ते इन्द्राग्नीदेवत्ये । यः हे इन्द्राग्नी! चित्रतमः अतिशयेन पूज्यः विचित्ररूपो वा रथः वाम् युवयोः विश्वानि भुवनानि भुवनशब्दोऽत्र

[३५२] पा. सू. ६/१/१०१

[३५३] ऋ. सं १/१०८/१ सायणभाष्यम्

लोकवचनः सर्वान् लोकान् अभि चष्टे अभिपश्यति । अगतस्य दर्शनासम्भवात् दर्शनेनात्र तद्धेतुभूते गमने लक्ष्यते। सर्वान् लोकान् गच्छति । न क्वचिदस्य गतिः प्रतिहन्यत इत्यर्थः। अथवा भुवनशब्दोऽपि भूतवचनः एव सामर्थ्याच्च यष्टृभूतेषु वर्तते नान्येषु । यागकारीणि यानि भूतानि तानि सर्वाणि अभिपश्यते । सर्वेषां यज्ञेषु गच्छतीत्यर्थः। तेन आ यातम् अस्मान् प्रत्यागच्छतम् । सरथम् तस्थिवांसा समानं रथमधितिष्ठवन्तौ । एकस्मिन्नेव युगपदारुढावित्यर्थः। अथ अनन्तरं च सोमस्य पिबतम् सूतस्य द्वितीयार्थे वा षष्ठी ...।" इति। न केवलमुपर्युक्तभाष्यद्वयेऽपि तु इतरेषु भाष्येष्वपि शाकल्यमनुसृत्य एकत्र आकारप्रश्लेषमादाय अन्यत्र च छान्दसदीर्घत्वमादाय भाष्याणि विरचितानि।

ननु 'य इन्द्राग्नी चित्रतमो रथः...' इत्यादिमन्त्रे अथेति संहितागते पदे आकारप्रश्लेषो न शङ्क्यः संहितायां प्रायेण अथशब्दस्य छान्दसदीर्घत्वादित्युच्यते चेन्न, संहितायामेव अन्यत्र 'अथा' इत्यंशे आ-इत्युपसर्गस्य प्रश्लेषत्वात् । एतदर्थमस्माभिः ऋग्वेदसंहितायाः तृतीयमण्डलस्थः एको मन्त्रो द्रष्टुं शक्यते । तद्यथा –

"ऋतस्य॑ वा के॒शिना॑ यो॒ग्याभि॑र्घृ॒त॒स्नुवा॒ रोहि॑ता धु॒रि धि॑ष्व।

अथा व॑ह दे॒वान्दे॑व॒ विश्वा॑न्त्स्वध्व॒रा कृ॑णुहि जातवेदः॥"[३५४] इति।

मन्त्रस्यास्य तृतीये पादे 'अथा' इति दीर्घस्वरान्तं पदं वर्तते । 'अथा' इति छान्दसदीर्घं पदं भवितुमर्हति, आ-इत्युपसर्गयुक्तं पदमपि भवितुमर्हति । छान्दसदीर्घत्वे स्वीकृते योऽर्थः प्राप्यते, आकारप्रश्लेषे स्वीकृते न तथा । छान्दसदीर्घत्वे स्वीकृते 'अथा' इत्यस्य केवलम् अनन्तरमित्यर्थो लभ्यते । परन्तु आ-इत्युपसर्गस्य प्रश्लेषे स्वीकारे मन्त्रार्थः पृथग् भविता । यतो हि उपसर्गयोगेन धातोरर्थः परिवर्त्यते । 'अथा' इत्यत्र छान्दसदीर्घत्वे स्वीकृते परवर्तिनः वह्-

---

[३५४] ऋ. सं. ३/६/६

धातोरर्थः वहनम्, परन्तु 'अथा' इत्यत्र आकारप्रश्लेषे स्वीकृते परवर्तिनः वह्-धातोरर्थो भवति आवाहनं नामाह्वानम् । द्विविधे अन्वये स्वीकृते द्विविधः मन्त्रार्थः प्राप्यते। अतः प्रकृतमन्त्रार्थज्ञानाय कः पक्षः समाश्रयणीयः इति संशयो दृश्यते। अतः अत्र तृतीये चरणे पदानामन्वयपरिज्ञानाय पदपाठः द्रष्टव्यः। मन्त्रस्यास्य पदपाठो यथा –

"ऋ॒तस्य॑ । वा॒ । के॒शिना॑ । यो॒ग्याभिः॑ । घृ॒त॒ऽस्नुवा॑ । रोहि॑ता । धु॒रि । धि॒ष्व॒ ।

अथ॑ । आ । व॒ह॒ । दे॒वान् । दे॒व॒ । विश्वा॑न् । सु॒ऽध्व॒रा॒ । कृ॒णु॒हि॒। जा॒त॒ऽवे॒दः॒ ।।"[३५५] इति।

मन्त्रेऽस्मिन् पदपाठतो ज्ञायते यदत्र 'अथा' इति संहितांशे छान्दसदीर्घत्वं नास्ति परन्तु आ-इत्युपसर्गो वर्तते । यतो हि पदपाठे अथा इत्यस्य 'अथ । आ' इत्येवंप्रकारेण पदविभागः प्रदर्शितः। यद्यत्र 'य इन्द्राग्नी..' इत्यादिपूर्वमन्त्रवत् 'अथा' इत्यंशे छान्दसदीर्घत्वमादाय मन्त्रार्थः क्रियते तदा प्रकृतमन्त्रार्थज्ञानं न सम्भवति । यतो हि पदपाठे 'अथ आ' इत्येवंप्रकारेण पदविभागः प्रदर्शितस्तस्मादत्र आ-इत्युपसर्गस्य विद्यमानत्वं स्वीकृत्य आ-पूर्वकाद् वह्-धातोः प्रयोग एव स्वीकर्तव्यः। आ-पूर्वकाद् वह्-धातोः अन्वयेनैव मन्त्रार्थः करणीयः। वस्तुतस्तु 'अथ आ' इत्यवस्थायां 'अकः सवर्णे दीर्घः'[३५६] इति सूत्रेण सवर्णदीर्घे संहितावस्थायाम् 'अथा' इति जातम् । परवर्तिनि काले वेदव्याख्यातारोऽपि पदपाठप्रदर्शितमाकारप्रश्लेषममादाय आपूर्वकाद् वह्-धातोरर्थेनैव मन्त्रार्थः कृतः। अत्र सायणाचार्येणोच्यते – "हे देव केशिना प्रशस्तकेशवन्तौ योग्याभिः योजनसाधनभूताभी रज्जुभिर्युक्तौ घृतस्नुवा घृतं क्षरन्तौ रोहिता रोहितावश्वौ ऋतस्य यज्ञस्य । वाशब्दः चार्थे। धुरि च धिष्व धेहि । योजयेत्यर्थः। अथ अनन्तरं विश्वान् देवान् रथे समारोप्य आ वह । हे जातवेदः तान् स्वध्वरा स्वध्वरान् शोभनाध्वरान् कृणुहि कुरु" इति । वेङ्कटमाधवेन अस्य व्याख्यानरूपेणोच्यते – "समुच्चयार्थीयो वाशब्दः। यज्ञं प्रत्यागमनार्थम्

---

[३५५] ऋ. सं. ३/६/६ पदपाठः

[३५६] पा. सू. ६/१/१०१

प्रशस्तकेशौ रोहितवर्णौ घृतस्राविनावश्वौ योक्त्ररज्जुभिः स्वरथस्य धुरि नियोजय च । अथ आवह च देवान् देव! सर्वान् सुयज्ञांश्च कुरु जातवेद!” इति।

अत्र भाष्याणि दृष्ट्वापि प्रतीयते यद् ‘अथा’ इत्यत्र आकारप्रश्लेष एव इष्टः, न तु छान्दसदीर्घत्वम् । पदपाठकारः शाकल्यश्चात्र आकारप्रश्लेषं दर्शयित्वा प्रकृतमन्त्रार्थव्याख्याने साहाय्यं कृवान्। मन्त्रस्यास्य पदपाठाभावे ‘अथा’ इत्यत्र यदि छान्दसदीर्घत्वं स्वीक्रियते तदा ‘हे देव! सर्वान् देवान् वह नाम यज्ञादन्यत्र नयतु’ इति विपरीतः मन्त्रार्थः समापतेत् । तेन च मन्त्रेण देवतास्मरणेन यत् फलमिष्टं तस्य लाभो न भवति, परन्त्वनिष्टं भवत्येव । अतः वैदिकसंहितायाः प्रकृतमन्त्रार्थज्ञाने आदौ पदपाठ एव शरणम् ।

एवमन्यत्र संहितायाम् ‘अथा’ छान्दसदीर्घरूपेण प्रयोगस्योदाहरणं यथा –

“स य॒न्ता विप्र॑ एषां॑ स य॒ज्ञाना॒मथा॒ हि षः।

अ॒ग्निं तं वो॑ दुवस्यत॒ दाता॒ यो वनि॑ता मघम्॥”[३५७] इति।

मन्त्रस्यास्य द्वितीये पादे ‘अथा’ इति पदं दृश्यते, यत् दीर्घस्वरान्तम् । अत्र दीर्घत्वं छान्दसदीर्घत्वमुत ‘आ’ इत्युपसर्गस्य प्रश्लेषो वर्तते पदपाठाभावे तन्न ज्ञायते । छान्दसदीर्घश्चेत् यो मन्त्रार्थः प्राप्यते आकारप्रश्लेषे तथा न भवति । पूर्वप्रतिपादिते ‘ऋतस्य...’ इत्यादिमन्त्रे ‘अथा’ इत्यत्र आकारप्रश्लेषं दृष्ट्वा अत्रापि आकारस्यावस्थानं स्वीक्रियते चेत्तदा मन्त्रार्थस्यानिष्टापत्तिर्भवति । अत्र पदपाठत एव निश्चीयते यत् ‘अथा’ इति छान्दसदीर्घं पदम् । अतः ‘अथा’ इत्यस्यार्थः केवलम् अनन्तरम्, तदुत्तरं कोऽपि उपसर्गो नास्ति । अस्य मन्त्रस्य पदपाठो यथा –

[३५७] ऋ. सं ३/१३/३

"सः । यन्ता । विप्रः । एषाम् । सः । यज्ञानाम् । अथ । हि । सः।

अग्निम् । तम् । वः । दुवस्यत । दाता । यः । वनिता । मघम् ।।"[३५८] इति।

अतः पदपाठे दृश्यते यत् 'अथा' इति संहितांशः 'अथ' इति ह्रस्वत्वेन प्रदर्शितः। तस्मादत्र मन्त्रार्थज्ञानाय अथ-शब्दस्य केवलमानन्तर्यार्थं स्वीकृत्य मन्त्रार्थः करणीयः, न कोऽपि उपसर्गोऽत्र योजनीयः। भाष्यकारा अपि मन्त्रस्यास्य भाष्यरचनाकाले केवलम् अथशब्दमादायैव मन्त्रार्थः प्रदर्शितः। सायणाचार्येण मन्त्रस्यास्य व्याख्यानरूपेणोच्यते – "विप्रः मेधावी कर्माभिज्ञः सः अग्निः एषां कालापराधेन हविर्निर्वापं कृतवतां यजमानानां यथोक्तकर्मप्रदर्शनेन तत्र प्रवर्तकः। अथ किञ्च यज्ञानां ज्योतिष्टोमादीनां सः अग्निः नियन्ता फलप्रदानेन नियामकः। हि प्रसिद्धौ । अत एव सर्वस्य नियन्ता खलु । किञ्च सः अग्निः दाता ज्योतिष्टोमादिकर्मफलदाता मघम् महनीयं धनम्...तद्धनं वनिता प्रयच्छंश्च भवति। वः युस्मत्सम्बन्धिं तं तादृशम् अग्निं हे ऋत्विजः यूयं दुवस्यत आहुतिप्रदानेन परिचरत ।" इति। अत्र पदपाठे छान्दसदीर्घत्वप्रदर्शनाभावे पूर्वमन्त्रवत् अथा इत्यत्र आकारप्रश्लेषं स्वीकृत्य 'दुवस्यत' इति क्रियया सह 'आ' इत्युपसर्गयोगेन मन्त्रार्थः क्रियते चेत्तदा अनिष्टापत्तिर्भवति । अतः पदपाठेनात्र मन्त्रार्थकरणे साहाय्यं विहितम् । एवंप्रकारेण च ऋग्वेदसंहितायाः बहुत्र पदपाठकृता शाकल्येन 'अथा' इत्यस्य छान्दसदीर्घत्वं सूचितम् ।

एवंप्रकारेण अस्यैव सूक्तस्य अपरत्र एकस्मिन् मन्त्रे दीर्घान्तपदद्वये कुत्र छान्दसदीर्घत्वं कुत्र दीर्घस्वरस्य प्रश्लेषः इति विषये संशयो वर्तते। तत्रापि च पदपाठ एव प्रामाणिकत्वेन स्वीक्रियते। स मन्त्रो यथा –

"चक्राथे हि सध्र्य१ङ्नाम भद्रं सध्रीचीना वृत्रहना उत स्थः।

---

[३५८] ऋ. सं ३/१३/३ पदपाठः

तावि॑न्द्राग्नी स॒ध्र्य॑ञ्चा नि॒षद्या॒ वृष्ण॑ः सोम॑स्य वृ॒ष॒णा वृ॑षेथाम्॥”[३५९] इति।

मन्त्रस्यास्य तुरीये पादे ‘निषद्या’ इत्येकं पदं ‘वृषणा’ इत्यपरं पदञ्च दीर्घस्वरान्तं वर्तते। मन्त्रार्थप्रकाशनायात्र अन्वयकाले उभयत्र छान्दसदीर्घत्वं स्वीकर्तुं शक्यते, उभयत्र आकारप्रश्लेषो नाम ‘आ’ इत्युपसर्गस्यावस्थानमपि स्वीकर्तुं शक्यते । ‘आ’ इत्युपसर्गस्य अवस्थाने स्वीकृते यो मन्त्रार्थः भवति छान्दसदीर्घत्वस्वीकृते न तथा, उपसर्गयोगेन धात्वर्थस्य पृथग्भूतत्वात् । अतः अत्र कः पक्षः समाश्रयणीयः इति विषये विद्वत्सु संशयो दृश्यते पदपाठाभावात् । पदपाठाद् विना मन्त्रार्थो व्याख्यायते चेत्तदा यथार्थान्वयपक्षसमाश्रयणाभावे प्रकृतमन्त्रार्थप्रकाशने अनिष्टापत्तेराशङ्का उदेति । अत अत्र प्रकृतमन्त्रार्थावगमाय पदपाठ एव शरणम् । ऋचोऽस्याः पदपाठो हि –

“च॒क्राथे॒ इति॑ । हि । स॒ध्र्य॑क् । नाम॑ । भ॒द्रम् । स॒ध्री॒ची॒ना । वृ॒त्र॒ऽह॒नौ । उ॒त । स्थ॒ः।

तौ । इ॒न्द्रा॒ग्नी॒ इति॑ । स॒ध्र्य॑ञ्चा । नि॒ऽसद्य॑ । वृष्ण॑ः । सोम॑स्य । वृ॒ष॒णा॒ । आ । वृ॒षे॒था॒म् ॥”[३६०] इति।

संहितापाठे यद्यपि ‘निषद्या’ इति आकारान्तं पदं, ‘वृषणा’ इति च आकारान्तं पदं समानेव दृश्यते परन्तु पदपाठत एव ज्ञायते यत् पदद्वयं न समानम् । एकत्र छान्दसदीर्घत्वमस्ति अपरत्र च ‘आ’ इत्युपसर्गो वर्तते । यतो हि पदपाठे ‘निषद्या’ इत्यस्य ‘निऽसद्य’ इति ह्रस्वत्वेन पाठः दर्शितः। ‘वृषणा’ इत्यस्य ‘वृषणा । आ’ इत्याकारस्य अवस्थानं प्रदर्शितम् । संहितापाठे ‘वृषणा आ’ इत्यवस्थायाम् ‘अकः सवर्णे दीर्घः’[३६१] इति सूत्रेण सवर्णदीर्घे वृषणा इति सिद्धम् । पदपाठस्थं पदविभागं दृष्ट्वा ‘निषद्या’ इत्यत्र छान्दसदीर्घत्वम्, ‘वृषणा’ इत्यत्र ‘आ’

[३५९] ऋ. सं. १/१०८/३

[३६०] तदेव. पदपाठः

[३६१] पा. सू. ६/१/१०१

इत्युपसर्गस्य प्रश्लेषमादाय पदानामन्वये कृते पूर्वं प्रकृतमन्त्रार्थप्रकाशने या अनिष्टापत्तेराशङ्का समुदिता तस्या अपि निरसनं जायते। सम्यक्तया मन्त्रार्थे ज्ञाते यथार्थे देवतास्मरणे इष्टं फलमपि प्राप्यते । अतः परवर्तिनि काले मन्त्रस्यास्य भाष्यरचनायां भाष्यकृद्भिः निषद्या इत्यत्र छान्दसदीर्घत्वं वृषणा इत्यत्र च आकारप्रश्लेषमादाय भाष्याणि विरचितानि । मन्त्रस्यास्य सायणाचार्यकृतं व्याख्यानं यथा – "हे इन्द्राग्नी भद्रं कल्याणं नाम स्वकीयं नामधेयं सध्र्यक् सहगतमिन्द्राग्नी इत्येवं संयुक्ते चक्राथे युवां कृतवन्तौ। उत अपि च हे वृत्रहनौ वृत्रस्य असुरस्य हन्ताराविन्द्राग्नी सध्रीचीना सहाञ्चन्तौ वृत्रबधार्थं संगतौ स्थः भवथः। हि यस्मादेवं तस्माद् हे वृषणा कामानां वर्षिताराविन्द्राग्नी तौ युवां सध्र्यञ्चौ सहितावेव सन्तौ निषद्य वेद्यामुपविश्य वृष्णः सेक्तुः सोमस्य आत्मीयं भागम् आ वृषेथामं स्वकीये उदरे आसिञ्चेथाम् ।"[३६२] इति। अस्य मन्त्रस्य स्कन्दस्वामिकृतं व्याख्यानं यथा – "हि शब्दोऽत्र पदपूरणः। तच्छब्दश्रुतेश्च यच्छब्दोऽध्याहार्य्यः। यौ चक्राथे वृत्रहननहविर्नयनादिना स्वेन व्यापारेण कुरुथः कृतवन्तौ वा। सध्र्यक् सहगामि । सर्वत्र युगपत् यातीत्यर्थः। नाम उदकनामैतत् (तु. निघ. १/१२)। वृष्टिलक्षणमुदकम्। भद्रम् कल्याणम्। सध्रीचीना वृत्रहनौ! वृत्रस्य हन्तारौ! स्थः भवथः। तौ हे इन्द्राग्नौ । सध्र्यञ्चा सहगामिनौ । सहागतेत्यर्थः। निषद्य अस्मदीये बर्हिष्युपविश्य । वृष्णः सोमस्य वृष्टिहेतुत्वात् सोमो बृषोच्यते। द्वितीयार्थे वा षष्ठी। षष्ठीश्रुतेर्वैकदेशमिति शेषः। वर्षितारं सोमं वर्षितुर्वा सोमस्यैकदेशं स्वांशलक्षणम्। हे वृषणा! आ वृषेथाम् आसिञ्चते स्वे उदरे। पिबतमित्यर्थः"[३६३]। इति। अस्यैव मन्त्रस्य व्याख्यानप्रसङ्गे मुद्गलीयायां वृत्तावुच्यते – "हे इन्द्राग्नी! भद्रं कल्याणं नाम स्वकीयं नामधेयम् सध्र्यक् सहगतम् इन्द्राग्नीत्येवं संयुक्तं चक्राथे युवां कृतवन्तौ। उत अपि च हे वृत्रहनौ! वृत्रस्यासुरस्य हन्तारौ इन्द्राग्नी! सध्रीचीना सहाञ्चन्तौ

---

[३६२] ऋ. सं. १/१०८/३ सायणभाष्यम्

[३६३] तदेव. स्कन्दस्वामिभाष्यम्

वृत्रवधार्थं सङ्गतौ स्थः भवथः। हि यस्मादेवं तस्माद् हे वृषणा! कामानां वर्षितारौ! इन्द्राग्नी! तौ युवाम् सध्र्यञ्चा सहितावेव सन्तौ निषद्य वेद्यामुपविश्य वृष्णः सेक्तुः सोमस्य आत्मीयं भागम् आ वृषेथाम् स्वकीये उदरे आसिञ्चेथाम् ।"[३६४] इति।

अतः भाष्येभ्य इदं प्रतीयते यत् महर्षिः शाकल्यः स्वकीये पदपाठे छान्दसदीर्गत्वसूचनेन आकारप्रश्लेषज्ञापनेन चात्र मन्त्रव्याख्यानकर्मणि भाष्यकारान् साहाय्यं व्यदधत् । अत्रोल्लेख्यं यदत्र 'निषद्या' इत्यस्य पदपाठकाले न केवलं छान्दसदीर्घत्वं सूचितमपि तु महर्षिणा 'निऽसद्य' इत्येवंप्रकारेणात्र सद्-धातोरवस्थानं तस्य षत्वञ्च प्रदर्शितम्।

### ३.५ तिङन्तपददीर्घत्वम्

वैदिकमन्त्राणां संहितापाठे एवंविधाः केचिन्मन्त्राः वर्तन्ते यत्र तिङन्तपदानि छान्दसदीर्घरूपेण सन्ति । तानि च पदानि छान्दसदीर्घवशात् आपातदृष्ट्या सुबन्तपदवत् प्रतीयन्ते । तानि पदानि सुबन्तरूपेण स्वीकृत्य अन्वयः क्रियते चेत्तदा यथार्थतया मन्त्रार्थोपपत्तिरपि न भवति । एवंविधेषु पदेषु संहितापाठमादाय मन्त्रार्थकरणसमये कानि तिङन्तानि कानि च सुबन्तानि इति पदपाठाभावे ज्ञातुं न शक्यते, तज्ज्ञानाय पदपाठ एव शरणम्। ऋग्वेदसंहितायाः तृतीयमण्डले एवंप्रकारकः एकः मन्त्रो यथा-

"ईळे॑ च त्वा॒ यज॑मानो ह॒विर्भि॒रीळे॑ सखि॒त्वं सु॑म॒तिं निका॑मः।

दे॒वैरवो॑ मिमीहि॒ सं ज॑रि॒त्रे रक्षा॑ च नो॒ दम्ये॑भि॒रनी॑कैः॥"[३६५] इति।

मन्त्रस्यास्य विश्वामित्र ऋषिः, अग्निश्च देवता । मन्त्रस्यास्य तुरीये पादे 'रक्षा च नो दम्येभिरनीकैः' इत्यत्र 'रक्षा' इति पदमादाय संशयो वर्तते। अस्या ऋचः अर्थव्याख्यानकाले

[३६४] ऋ. सं. १/१०८/३. मुद्गलीया वृत्तिः
[३६५] ऋ. सं. ३/१/१५

पदानामन्वये संशयो दृश्यते। रक्षा इति पदं सुबन्तत्वेनादाय अन्वयः क्रियते चेत्तदा मन्त्रस्थेन अन्येन केनापि पदेन तस्य सम्बन्धो न प्राप्यते। सुबन्ते स्वीकृते रक्षेति स्त्रियां प्रथमैकवचनान्तं पदं परन्तु प्रथमाविभक्तिकत्वात् तस्य कर्तृत्वं स्वीक्रियते चेत्तदा 'यजमानः' इति मन्त्रस्थकर्तृपदस्य अन्वयानुपपत्तिर्दृश्यते। अपि च मन्त्रे स्त्रीलिङ्गकपदाभावात् तस्य सुबन्तरूपेण भिन्नेन केनापि पदेन अन्वयः कर्तुं न शक्यते। पुनश्च 'रक्षा' इति पदं तिङन्तत्वेन आदाय अन्यैः पदैः सह अन्वयः क्रियते चेत्तदपि न सम्भवति रक्ष्-धातोः कस्मिन्नपि लकारे रक्षेति पदनिष्पत्तेरभावात्। तर्हि 'रक्षा' इति पदस्य केन प्रकारेणान्वयः इति संशयः समुपस्थितः। यतो हि एकस्यैव पदस्य यथार्थरूपेण अन्वयाभावे समग्रस्य मन्त्रस्य अर्थः अज्ञातो भवति तस्मादत्र अस्य संशयस्य निरसनाय पदपाठ एव शरणम्। ऋचोऽस्याः पदपाठो यथा –

"ईळें । च । त्वा । यजमानः । हविःऽभिः । ईळें । सखिऽत्वम् । सुऽमतिम् । निऽकामः ।

देवैः । अवः । मिमीहि । सम् । जरित्रे । रक्ष । च । नः । दम्येभिः । अनीकैः ॥"[३६६] इति।

मन्त्रस्यास्य पदपाठकाले महर्षिणा शाकल्येन 'रक्षा' इति संहितागतं दीर्घान्तं पदं 'रक्ष' इत्येवंप्रकारेण ह्रस्वत्वेन प्रदर्शितः। पदपाठे 'रक्ष' इति ह्रस्वान्तं पदमादाय अन्वय क्रियते चेत्तदा मन्त्रार्थस्य सम्यगुपपत्तिर्भवति । 'रक्ष' इति पदपाठप्रदर्शितं ह्रस्वं पदं दृष्ट्वा निश्चीयते यदिदं तिङन्तपदमिति। यतो हि रक्ष-धातोः लोटि मध्यमपुरुषैकवचने 'रक्ष' इति पदं लभ्यते। 'रक्ष' इत्यस्य तिङन्तरूपेण अन्वयेन मन्त्रार्थस्यापि सम्यग् बोधो भवति। पदपाठप्रदर्शितं छान्दसदीर्घस्य 'रक्षा' इत्यस्य 'रक्ष' इति ह्रस्वं पदमादायैव भाष्यकारैरपि भाष्यं विरचितम्। अत्र सायणाचार्येणोच्यते – "यजमानः अहं हविर्भिः साधनैः त्वा त्वाम् ईळे च पश्वादिलक्षं धनं च याचे । सुमतिं शोभनां मतिं धर्मविषयां बुद्धिं निकामः नितरां कामयमानस्त्वया सह सखित्वम्

[३६६] ऋ. सं. ३/१/१५ पदपाठः

ईळे याचे । त्वं देवैः सह जरित्रे स्तोत्रे स्तोत्रं कुर्वते मह्यम् अस्मदर्थम् अवः पश्वादिविषयां रक्षां मिमीहि कुरु । दम्येभिः दमनीयैरनियन्तध्यैः। प्रयत्ननियन्तव्यत्यययोच्छृङ्खलतोक्ता । अनीकैः तेजोभिः नः अस्मान् रक्ष च।"[३६७] इति । अस्य मन्त्रस्य वेङ्कटमाधवकृतं व्याख्यानं यथा – "याचे च त्वाम् हविर्भिः यजमानः अहम्। तथा त्वया सख्यम् याचे शोभनमतिं त्वाम् निकामयमानः। स्तोत्रे देवैः सह रक्षणं कुरु। रक्ष च अस्मान् दमनकुशलैः तव तेजोभिः।" इति।

भाष्येषु च दृश्यते यत् मन्त्रेऽस्मिन् प्रथमतः यजमानः कर्ता । 'रक्ष' इति च क्रियापदं, यस्यान्वयः युस्मत्पदेन – 'हे देव त्वं रक्ष' इत्यन्वयः । यच्च संहितापाठे छान्दसदीर्घरूपेण वर्तते। पदपाठे चास्य छान्दसदीर्घत्वमादौ प्रदर्शितम्, तच्च भाष्यकारैरनुसृतम् । अतः अत्र पदपाठकृता शाकल्येन छान्दसदीर्घत्वज्ञापनेन मन्त्रार्थव्याख्याने साहाय्यं विहितम् ।

अस्यैव सूक्तस्य अपरत्रापि तिङन्तपदस्य छान्दसदीर्घत्वं परिलक्ष्यते यत् पदपाठे ह्रस्वत्वेन प्रदर्शितम् । तत्रापि पदपाठाभावे दीर्घस्वरं दृष्ट्वा 'आ' इत्युपसर्गस्य अवस्थानं स्वीकृत्य मन्त्रार्थः क्रियते चेन्मन्त्रार्थस्यानिष्टापत्तिर्भवति । स मन्त्रो यथा –

"व॒ब्राजा॑ सी॒मन॑दती॒रद॑ब्धा दि॒वो य॒ह्वीरव॑साना॒ अन॑ग्ना ।

सना॒ः अत्र॑ यु॒व॒तय॒ः सयो॑नी॒रेकं॒ गर्भं॑ दधिरे स॒प्त वाणीः॑ ।।"[३६८] इति।

अस्य संहितागतमन्त्रस्य पदपाठकाले शाकल्येन 'वब्राजा' इति दीर्घान्तं पदं ह्रस्वत्वेन प्रदर्शितम्। तेन चास्य तिङन्तपदरूपेण अन्वयं स्वीकृत्य वेदव्याख्यातृभिः मन्त्रस्यास्य व्याख्यानं प्रदत्तम् । अस्य पदपाठो हि-

'व॒ब्राज॑ । सी॒म् । अन॑दतीः । अद॑ब्धाः । दि॒वः । य॒ह्वीः । अव॑सानाः । अनग्नाः ।

---

[३६७] ऋ. सं. ३/१/१५ सायणभाष्यम्

[३६८] ऋ. सं. ३/१/६

सनाः॑ । अत्र॑ । यु॒व॒तयः॑ । सऽयो॑नीः । एक॑म् । गर्भ॑म् । द॒धि॒रे॑ । स॒प्त । वाणीः॑ ॥'[369] इति।

मन्त्रस्यास्यार्थावगमाय पदपाठाभावे 'वब्राजा' इति संहितांशे दीर्घस्वरान्तं पदमिदं तिङन्तमुत सुबन्तमिति संशयो दृश्यते। अपि तिङन्तमुत सुबन्तं यद्वा भवतु 'वब्राजा' इति प्रकृत्या वर्तते उत अत्र आकारप्रश्लेषो वर्तते उत छान्ददीर्घपदमिदमिति न सम्यगवबोद्धुं शक्यते। मन्त्रार्थकरणकाले पदपाठेनैव एते संशयाः निरस्यन्ते। पदपाठत एव ज्ञायते यदिदं तिङन्तपदमपिचात्र छान्दसदीर्घत्वं संहितायां वर्तते। तथैव छान्दसदीर्घत्वं स्वीकृत्य भाष्यकारैरपि मन्त्रोऽयं व्याख्यातः।

एवमेव तृतीयमण्डलस्य सूक्तान्तरेऽपि तिङन्तस्य छान्दसदीर्घत्वं परिलक्ष्यते –

"आ जु॑होता स्वध्व॒रं शी॒रं पा॑व॒कशो॑चिषम्।

आ॒शुं दू॒तम॑जि॒रं प्र॒त्नमीड्यं॑ श्रु॒ष्टी देवं सपर्यत॥"[370] इति।

मन्त्रस्यास्यादिमे पादे 'जुहोता' इत्यंशे पदस्वरूपविषये संशयो दृश्यते। 'जुहोता' इति तिङन्ते स्वीकृते हु-धातोः कस्मिन्नपि लकारे अस्य रूपस्य निष्पत्तिर्न सम्भवति। 'जुहोता' इति सुबन्तमपि भवितुं नार्हति। सुबन्तत्वाभावात् अत्र जुहोत[371] इति लोट्लकारनिष्पन्नस्य तिङन्तस्य सद्भाव इति ज्ञायते पदपाठतः। परन्तु 'जुहोत' इति तिङन्ते स्वीकृते दीर्घस्वरः कथमिति जिज्ञासा उदेति। तदा 'आ' इत्युपसर्गस्य विद्यमानेन दीर्घत्वमुत सांहितिकं छान्दसदीर्घत्वमिति संशयो वर्तते। तादृशस्य संशयस्य निरसनं केवलं पदपाठत एव सम्भवति।

---

[369] ऋ. सं. ३/१/६ पदपाठः

[370] ऋ. सं. ३/९/८

[371] आपातरूपेण हु-धातोः लोटि मध्यमपुरुषबहुवचने जुहुत इति रूपं दृश्यते। परन्त्वत्र वैदिकप्रक्रियायां 'हु दानादनयोः' इति धातोर्लटि मध्यमपुरुषबहुवचने थ-विभक्तौ 'जुहोत्यादिभ्यः श्लुः' इत्यनेन सूत्रेण शपः श्लुत्वे 'श्लौ' इति सूत्रेण धातोः त्वित्वे पूर्वस्य अभ्यासस्य हकारस्य 'कुहोश्चुः' इत्यनेन झकारे, 'अभ्यासे चर्चः' इत्यनेन सूत्रेण तस्य जकारे कृते 'जु ह थ' इत्यवस्थायां 'लोटो लङ्वद्' इत्यनेन लङ्वद्भावे 'तस्थस्थमिपां तान्तान्तमः' इत्यनेन थस्य तकारादेशः। 'छन्दसि' इत्यनुवृत्तौ 'तप्तनप्तनथनाश्च' इत्यनेन सूत्रेण तस्य तबादेशः। तपः पित्वात् गुणे 'जुहोत' इति रूपं प्राप्यते।

यतो हि पदपाठे आ इत्युपसर्गस्य विद्यमाने तस्य पृथक् प्रदर्शनं तथा संहितायां छान्दसदीर्घत्वे तस्य ह्रस्वत्वेन प्रदर्शनं परिलक्ष्यते । मन्त्रस्यास्य पदपाठे शाकल्येन 'जुहोता' इति दीर्घान्तं तिङन्तं ह्रस्वत्वेन प्रदर्शितम् । तस्मादेव एतन्निश्चीयते यदत्र जुहोता इत्येकं तिङन्तपदम्, तत्र 'आ' इत्युपसर्गस्य प्रश्लेषो नास्ति, परन्तु संहितायां छान्दसदीर्घत्वं वर्तते । अस्य मन्त्रस्य पदपाठो यथा –

'आ । जुहोत । सुऽअध्वरम् । शीरम् । पावकऽशोचिषम् ।

आशुम् । दूतम् । अजिरम् । प्रत्नम् । ईड्यम् । श्रुष्टी । देवम् । सर्पयत ।'[३७२]

पदपाठेऽत्र 'जुहोत' इति ह्रस्वत्वेन यदि न प्रदर्शितं तदा दीर्घस्वरावस्थानं परिलक्ष्य 'आ' इत्युपसर्गमादाय 'सर्गयत' इति तिङन्तात् प्राक् उपसर्गयोगेन मन्त्रार्थः करणीयः। तेन च मन्त्रार्थज्ञाने तथा मन्त्रार्थव्याख्याने अनिष्टापत्तिर्भवति, अतः पदपाठकृतात्र तिङन्तपददीर्घत्वं विज्ञाप्य मन्त्रार्थज्ञाने साहाय्यं विहितम् ।

तृतीयमण्डले एवमपर एको मन्त्रो दृश्यते यत्र तिङन्तस्य संहितायां छान्दसदीर्घत्वं परिलक्ष्यते, शाकल्येन च पदपाठे तत् प्रकृत्या प्रदर्शितम् । सा ऋक् –

"विद्मा हि त्वा धनंजयं वाजेषु दधृषं कवे।

अधा ते सुम्नमीमहे।।"[३७३] इति।

ऋचोऽस्याः प्रथमे पादादौ तृतीये पादादौ च दीर्घस्वरान्तं पदद्वयं वर्तते । तयोः द्वयोः दीर्घस्वरान्तरूपेणैव स्वीकृत्य अर्थः क्रियते चेत् तयोः सम्यगर्थोपपत्तिर्न भवति, तादृशस्य दीर्घस्वरान्तपदस्य अभावात् । किञ्च प्रथमपादस्थितस्य 'विद्मा' इत्यस्य सुबन्तत्वेन उत

[३७२] ऋ. सं. ३/९/८ पदपाठः

[३७३] ऋ. सं. ३/४२/६

तिङन्तत्वेन अन्वयः इति निर्णेतुं न शक्यते पदपाठाभावे। यतो हि विद्मा इति सूबन्तं पदं न लभ्यते, न च विद्-धातोः कस्मिन्नपि लकारे विद्मा इति रूपं सिद्ध्यति । विद्-धातोः उत्तमपुरुषबहुवचने 'विद्म'[३७४] इति रूपं प्राप्यते। 'विद्मा' इति तिङन्तं स्वीक्रियते चेत् तर्हि 'विद्मा' इत्यत्र 'विद्म आ' इत्येवंप्रकारेण 'आ' इत्युपसर्गस्य विद्यमानत्वं स्वीकर्तव्यम्। 'छन्दसि परेऽपि'[३७५]इति सूत्रेण वेदे उपसर्गाणां धातोरुत्तरमपि प्रयोगार्हत्वात्, अन्यथा 'विद्मा' इत्यत्र संहितायां छान्दसदीर्घत्वं स्वीकर्तुं शक्यते। मन्त्रस्यास्य तुरीये पादे 'अधा' इत्यत्रापि 'आ' इत्युपसर्गो वर्तते उतात्र संहितायां छान्दसदीर्घत्वमिति संशयः। आकारप्रश्लेषछान्दसदीर्घयोः द्विविधयोः पक्षयोर्मध्ये कः पक्षः समाश्रयणीयः इति पदपाठाभावे निर्णेतुं न शक्यते। पदपाठत एवास्य निरसनं सम्भवति, तत्रैव 'आ' इत्युपसर्गस्य पृथक् प्रदर्शनात्तथा छान्दसदीर्घपदानां ह्रस्वत्वेन पाठात्। मन्त्रस्यास्य पदपाठो यथा –

'विद्म। हि। त्वा। धनम्ऽजयम्। वाजेषु। दधृषम्। कवे।

अध। ते। सुम्नम्। ईमहे॥'[३७६] इति।

पदपाठे दृश्यते यत् 'विद्मा' इति 'अधा' इति पदद्वयं 'विद्म', 'अध' इत्यवं ह्रस्वत्वेन प्रदर्शितम्। अतः पदपाठेनैवावगम्यते यदत्र द्वयोः पदयोः एव संहितायां छान्दसदीर्घत्वं वर्तते। वस्तुतस्तु एते ह्रस्वान्ते पदे इति । अतः पदपाठत एवात्र संशयो निरस्यति । अतः पदपाठप्रदर्शितपदविभागमादायैव व्याख्याकृद्भिरत्र मन्त्रव्याख्यानं विहितम् । प्रख्यातभाष्यकृता सायणाचार्येण उभयत्र एव छान्दसदीर्घत्वं स्वीकृत्य व्याख्यानं कृतम् – "हे कवे क्रान्तदर्शिन्निन्द्र वाजेषु युद्धेषु दधृषं शत्रूणामभिभवितारम् अत एव धनञ्जयम्। धनं

[३७४] यद्यपि विद्-धातोः लटि उत्तमपुरुषबहुवचने विद्मः इति रूपं भवति परन्तु 'विदो लटो वा' इति सूत्रेण मसो मादेशे 'विद्म' इति रूपं लभ्यते।

[३७५] पा. सू. १/४/८१

[३७६] ऋ. सं. ३/४२/६ पदपाठः

जयतीति धनञ्जयः। तादृशं त्वा त्वां विद्म हि जानीमः खलु। अध अनन्तरं ते एव सुम्नं धनम् ईमहे याचामहे..."। इति[३७७] अपरेषु भाष्येष्वपि उभयत्र शाकल्यप्रदर्शितछान्दसदीर्घत्वं स्वीकृत्य मन्त्रस्यास्य व्याख्यानं विहितम् । अत अत्र तिङन्तस्य छान्दसदीर्घत्वज्ञापनेन शाकल्येन मन्त्रार्थव्याख्याने अनिष्टापत्तिर्निवारिता।

एवंप्रकारेण प्रथममण्डलस्य त्रयोदशसूक्तस्य एकस्मिन् मन्त्रे तृतीये पादे '...अ॒द्या कृणुहि वीतये।'[३७८] इति संहितायाम् 'अद्या' इति पदं पदपाठे शाकल्येन ह्रस्वत्वेन प्रदर्शितम्। अत्रापि पदपाठाभावे 'अद्य आ' इति पदविभागः प्राप्यते । अनेन पदविभागेन 'कृणुहि' इत्यस्यार्थो 'आकृणुहि' इति भविष्यति । तेन च मन्त्रार्थस्यानिष्टापत्तिर्जायते । अस्यैव सूक्तस्य मन्त्रान्तरे तिङन्तपदस्य छान्दसदीर्घत्वं पदपाठेन ज्ञायते।

'अव॑ सृजा वनस्पते॒ देव॑ दे॒वेभ्यो॑ ह॒विः।

प्र दा॒तुर॑स्य चेत॑नम्॥'[३७९] इति।

अस्य मन्त्रस्य प्रथमे पादे 'सृजा' इति पदपाठे 'सृज' इत्येवंप्रकारेण ह्रस्वत्वेन प्रदर्शितम् । पदपाठाभावे अत्र 'सृजा' इति सुबन्तमुत तिङन्तमिति संशयो वर्तते। तिङन्ते सति आपातदृष्ट्या अत्र 'आ' इत्युपसर्गस्य अवस्थितिर्मन्यते। आ इत्युपसर्गस्य स्थितौ च तदा धात्वर्तपरिवर्तनेन मन्त्रस्यापि अर्थान्तरं दृश्यते । तेन च यथार्थतया मन्त्रार्थोपपत्तिर्न भवति। तस्मादत्र शाकल्येन पदपाठे यथा छान्दसदीर्घत्वं सूचितं तथैव 'सृजा' इति संहितांशे छान्दसदीर्घत्वमादाय भाष्यकृद्भिः भाष्यं विरचितम्। अष्टममण्डलस्य सप्तत्रिंशत्तमस्य सूक्तस्य षट्सु मन्त्रेषु तिङन्तस्य संहितायां छान्दसदीर्घत्वं सूचितम्। तत्रापि संहितापाठे छान्दसदीर्घत्वज्ञापनाभावे षट्सु मन्त्रेषु

[३७७] ऋ. सं. ३/४२/६ सायणभाष्यम्

[३७८] ऋ. सं. १/१३/२

[३७९] ऋ. सं. १/१३/११

अर्थान्तरं भवेत्, तेन च मन्त्रार्थप्रमादेन अनिष्टापत्त्या देवतास्मरणेन अनिष्टं फलं समापतेत् । एवंप्रकारेण ऋग्वेदसंहितायाः बहुत्र सुबन्तानां तथा तिङन्तानां पदानां छान्दसदीर्घत्वज्ञापनेन पदपाठकृता शाकल्येन मन्त्रार्थज्ञाने अनिष्टापत्तिर्निवारिता।

## ३.६ अभ्यासदीर्घत्वम्

पाणिनीयधातुपाठे ये धातवः सन्ति ते दशसु गणेषु विभक्ताः। एतेषां धातूनां मध्ये केषाञ्चन प्रक्रियाकाले द्वित्वं भवति। यदा धातोः द्वित्वं भवति द्वित्वस्य पूर्वस्य अभ्याससंज्ञा भवति । महर्षिणा पाणिनिना *अष्टाध्याय्यां* सूत्रं विरचितं 'पूर्वोऽभ्यासः'[३८०] इति। यथा भू-धातोर्लिटि णल्-विभक्तौ वुगागमे 'लिटि धातोरनभ्यासस्य'[३८१] इति सूत्रेण द्वित्वे 'भूव् भूव् अ ति' इति स्थिते 'पूर्वोऽभ्यासः' इति सूत्रेण द्वित्वस्य पूर्वः अभ्याससंज्ञको भवति। ततश्च प्रक्रियया बभूव इति रूपं प्राप्यते। एवंप्रकारेण येषां धातूनां द्वित्वं भवति तेषां पूर्वस्थितस्य अभ्यासस्य वैदिकमन्त्राणां संहितापाठे दीर्घत्वं परिलक्ष्यते। प्रकृत्या तु ते ह्रस्वा एव। पदपाठकृता शाकल्येन एतानि अभ्यासदीर्घानि पदानि पदविभागकाले ह्रस्वत्वेन प्रदर्शितानि। एतेषामभ्यासदीर्घाणां पदानां ह्रस्वत्वेन पाठः नोपलभ्येत चेत्तदा मन्त्रार्थकरणकाले वैयाकरणदिशा पदानां साधुत्वनिर्णयावसरे च असौविध्यं स्यात्। एवमभ्यासदीर्घत्वस्यैकमुदाहरणं यथा –

"नव्यं᳚ तदु॒क्थ्यं᳚ हि॒तं देवा॑सः सुप्रवा॒चनम्।

ऋ॒तम॑र्षन्ति॒ सिन्ध॑वः स॒त्यं ता॑तान॒ सूर्यो॑ वि॒त्तं मे॑ अ॒स्य रो॑दसी॥"[३८२] इति।

अस्य मन्त्रस्य पदपाठो यथा –

---

[३८०] पा. सू. ६/१/४

[३८१] तदेव. ६/१/८

[३८२] ऋ. सं १/१०५/१२

'नव्यम् । तत् । उक्थ्यम् । हितम् । देवासः । सुऽप्रवाचनम् ।

ऋतम् । अर्षन्ति । सिन्धवः । सत्यम् । ततान । सूर्यः । वित्तम् । मे । अस्य । रोदसी इति ॥'[383] इति।

संहितापाठं दृष्ट्वा मन्त्रस्यास्य अर्थनिर्णयसमये 'तातान' इति पदमाश्रित्य संशयो दृश्यते । संहितापाठे 'तातान' इति शब्दस्य स्वरूपं सम्यक् न ज्ञायते पदपाठाभावे । यतो हि 'तातान' इति किमपि सुबन्तं पदं न दृश्यते, तन्-धातोः कस्मिन्नपि लकारे 'तातान' इति रूपं न प्राप्यते । पदपाठे 'तातान' इति अभ्यासह्रस्वरूपेण 'ततान' इति दर्शितम्। पदपाठत एव निश्चीयते यत् संहितायां 'तातान' इति शब्दस्वरूपं अभ्यासछान्दसदीर्घरूपेण वर्तते । पदपाठत एव ज्ञायते यदिदं तन्-धातोः लिडन्तं पदम् । तेन ततान इति तिङन्तमादाय मन्त्रार्थः अवगम्यते । यद्यपि संहितायां 'तातान' इति शब्दस्वरूपे स्वरमादाय तस्य तिङन्तत्वं ज्ञातुं शक्यते परन्तु तथा ज्ञातेऽपि तन्-धातोः कस्मिन्नपि लकारे एतादृशस्य रूपस्याभावात् तस्य प्रकृतस्वरूपं न ज्ञायते। संहितायामिदम् अभ्यासदीर्घत्वं सायणाचार्येणापि स्वकीयभाष्ये स्पष्टीकृतम् । उक्तञ्च तेन – "हे देवासः देवाः नव्यं नवतरम् उक्थ्यं प्रशस्यं स्तुत्यर्हं सुप्रवाचनं सुष्ठु ऋत्विग्भिर्वाचयितुं शक्यम् एवंभूतं तत् भवदीयं बलं हितं युस्मासु निहितम् । अतो युस्मदीयेन बलेन सिन्धवः स्यन्दनशीलाः नद्यः ऋतम् उदकम् अर्षन्ति आलस्यराहित्येन सर्वदा प्रेरयन्ति । अशोष्याः सत्यः प्रवहन्तीत्यर्थः। तथा सूर्यं सत्यं सर्वदा विद्यमानं स्वकीयं तेजः ततान आतनोति विस्तारयति । अन्यत् समानम्। ...ततान । अन्येषामपि दृश्यते इति संहितायाम् अभ्यासस्य दीर्घत्वम्।"[384] इति। ऋग्वेदसंहिताया बहुत्र एवमभ्यासदीर्घपदानि परिलक्ष्यन्ते।[385]

[383] ऋ. सं. १/१०५/१२. पदपाठः

[384] तदेव. सायणभाष्यम्

[385] ऋग्वेदसंहितायाः १/१०४/६ – मन्त्रे रीरिषः इति तिङन्तं रिरिषः इत्येवं ह्रस्वत्वेन पदपाठे प्रदर्शितम्।

अत्रेदमवधेयं यत् यद्यपि सायणाचार्येण 'अन्येषामपि दृश्यते'[३८६] इति पाणिनीयसूत्रेण इदं समर्थितं परन्तु पदपाठे सर्वत्रैव एतादृशां पदानां ह्रस्वत्वेन दर्शनाभावे एषां पदानां वैयाकरणदिशा साधुत्वनिर्णयः असम्भवः स्यात्। किञ्च सायणाचार्येण अस्य समर्थनाय यद्यपि पाणिनीयं सूत्रमुल्लिखितं तथापि अत्रेदं वक्तव्यं यत् शाकल्यस्तु पाणिनेः पूर्ववर्ती। पाणिनिनापि सूत्ररचनायां महर्षिः शाकल्यः अनुसृतः, तच्च परवर्तिन्यध्याये वक्ष्यते।

### ३.७ छान्दसह्रस्वत्वम्

संहिताया अपरं नाम छन्द इति तु प्रागेवोक्तम्। छन्दसि नाम संहितायां प्रकृतिभूतानि ह्रस्वान्तानि पदानि बहुत्र दीर्घरूपेण परिलक्ष्यन्ते। पदपाठकृता शाकल्येन पदपाठकाले तानि छान्दसदीर्घपदानि ह्रस्वरूपेण प्रदर्शितानि। तेन च मन्त्रार्थज्ञाने तथा पदानां वैयाकरणदिशा साधुत्वनिर्णये महती सहायता विहिता। तेषां छान्दसदीर्घाणां पदपाठाभावे कथं मन्त्रार्थकरणे संशयो जायते इति पूर्वमेव विचारितम्। वैदिकसंहितायां छान्दसदीर्घवत् कानिचन पदानि सन्ति यानि संहितापाठे ह्रस्वत्वेन वर्तन्ते परन्तु प्रकृत्या तानि दीर्घान्तानि। एवं प्रकृतिभूतानि दीर्घान्तानि यानि पदानि संहितापाठे ह्रस्वरूपेण परिलक्ष्यन्ते, तानि छान्दसह्रस्वत्वेनाभिधीयन्ते। महर्षिणा शाकल्येन पदपाठे न केवलं छान्दसदीर्घाणि पदानि ह्रस्वत्वेन पठितानि, अपि तु तेन पदपाठे छान्दसह्रस्वानि पदानि दीर्घरूपेण प्रदर्शितानि। तेन तेषां पदानां स्वरूपावगमः, मन्त्रार्थज्ञानं, वैयाकरणदिशा साधुत्वनिर्णयश्च अनायासेन कर्तुं शक्यते। तत्र तत्र पदपाठाभावे तेषां प्रकृतिभूतानां दीर्घान्तानां सांहितिकह्रस्वान्तानां पदानामर्थनिरूपणं यथार्थतया कर्तुं शक्यते। एवंप्रकारकः ऋग्वेदसंहितायाः एको मन्त्रो यथा –

"यु॒वं दक्षं॑ धृतव्रत॒ मित्रा॑वरुण दू॒ळभ॑म्।

---

[३८६] पा. सू. ६/३/१३७

ऋतुना यज्ञमासाथे॥"[३८७] इति।

मन्त्रस्यास्य काण्वो मेधातिथिः ऋषिः। मित्रावरुणौ च देवता । मन्त्रेऽस्मिन् 'घृतव्रत', 'मित्रावरुण' इति पदद्वयस्य अर्थव्याख्यानसमये पदपाठाभावे संशयो दृश्यते। मित्रश्च वरुणश्च इति विग्रहे द्वन्द्वसमासे 'देवताद्वन्द्वे च'[३८८] इत्यनेन सूत्रेण मित्रावरुणौ इति पदं सिध्यति। मित्रावरुणयोः युगलदेवतारूपेण वैदिकसम्प्रदाये प्रसिद्धिः। संहितापाठे 'घृतव्रत' 'मित्रावरुण' उभयत्रैव आपातदृष्ट्या एकवचनरूपेण प्रतीयमानत्वात् मन्त्रार्थकरणसमये तेषामन्वयः केन पदेन भवतीति न ज्ञायते । अपि च तत्रापातदृष्ट्या विभक्तेर्विद्यमानाभावात् तयोः शब्दयोः स्वरूपमपि सम्यग् न ज्ञातुं शक्यते । एवमवस्थायामत्र पदपाठेनैव संशयोऽयं निराकर्तुं शक्यते । अस्य मन्त्रस्य पदपाठो यथा –

'युवम् । दक्षम् । घृतऽव्रता । मित्रावरुणा । दुःदभम्।

ऋतुना । यज्ञम् । आसाथे इति ।।' इति।[३८९]

अत्र पदपाठे 'घृतव्रत' इति 'मित्रावरुण' इति च ह्रस्वान्तं पदद्वयं दीर्घरूपेण प्रदर्शितम्। पदपाठत एव ज्ञायते यत् संहितापाठे 'मित्रावरुण' इति सांहितिकं ह्रस्वं पदं यत्तु प्रकृत्या दीर्घान्तमेव । 'घृतव्रत' इत्यपि सांहितिकं ह्रस्वं पदं यत्तु प्रकृत्या दीर्घमेव। पदपाठे 'मित्रावरुणा' इति दीर्घान्तं पदमादाय मित्रावरुणयोः बोधो जायते। 'घृतव्रता' इति दीर्घान्तञ्च दृष्ट्वा 'मित्रावरुणा' इति पदेन सह तस्य विशेषणत्वेनान्वयः क्रियते। तेन च मन्त्रस्थानां सर्वेषां पदानां सम्यगन्वयेन यथार्थतया मन्त्रार्थावबोधो भवति । पदपाठकृता शाकल्येन पदविभागकाले यत् सांहितिकं छान्दसह्रस्वत्वं ज्ञापितं तत्तु परवर्तिनि काले भाष्यकारैरपि स्पष्टतया अङ्गीकृतम्। अस्य

---

[३८७] ऋ. सं. १/१५/६

[३८८] पा. सू. ६/३/२६

[३८९] ऋ. सं. १/१५/६ पदपाठः

मन्त्रस्यार्थव्याख्यानकाले स्कन्दस्वामिनोच्यते – “षष्ठी ऋङ्मित्रावरुणदेवता । युवम् इति षष्ठ्यर्थे प्रथमा । युवयोः दक्षम् बलम् घृतव्रत! मित्रावरुण! उभयत्र द्विवचनादेशाकारस्य छान्दसं सांहितं ह्रस्वत्वम् । व्रतम् (निघ. १.१७) इति कर्मनाम । घृतानि सर्वकर्माणि स्वकर्माणि वा याभ्यां तौ घृतव्रतौ सर्वकर्मणां हेतुभूतौ स्वकर्मणां वा नित्यमनुप्रदातारौ इत्यर्थः। मित्रावरुणौ दूलभम् दभ्नोतेर्वधकर्मण एतद्रूपम् । दुर्हणम् युवयोर्बलम् न कश्चिदपि जेतुं शक्नोतीत्यर्थः। याविदृशौ स्थः तावृतुना सह यज्ञम् आशाथे लोडर्थेऽयं लिट् । अश्नुवाथां व्याप्नुतम्। यज्ञे सोमं पिबतमित्यर्थः।”[३९०] इति। भाष्यकृता सायणाचार्येणापि सांहितिकं छान्दसह्रस्वत्वं स्वीकृतम् । तेन मन्त्रस्यास्य व्याख्यानप्रसङ्गे उच्यते – “हे घृतव्रता स्वीकृतकर्माणौ मित्रावरुणा हे मित्रनामकवरुणनामकदेवौ युवम् उभौ युवाम् ऋतुना सहास्मदीयं यज्ञमाशाथे व्याप्नुथः। कीदृशं यज्ञम्। दक्षं प्रवृद्धं दूळभं दुर्दहं शत्रुभिर्दग्धुं विनाशयितुमशक्यमित्यर्थः।...घृतव्रता मित्रावरुणा। घृतानि व्रतानि याभ्यां तौ घृतव्रतौ। मित्रश्च वरुणश्च मित्रावरुणौ। उभयत्र सुपां सुलुक् इत्यादिना विभक्तेः आकारः। मित्रशब्दस्य देवताद्वन्द्वे च इति आनङादेशः। प्रथमस्य आमन्त्रितनिघातः। द्वितीयस्य पादादित्वादाद्युदात्तत्वम्। संहितायां छान्दसं ह्रस्वत्वम् ।”[३९१] इति। अतः अत्र भाष्येषु स्पष्टतया दृश्यते यत् उक्तपदद्वयस्य संहितायां छान्दसह्रस्वत्वमासीत् यत् पदपाठकृता एव आदौ स्पष्टीकृतम्। पदपाठे एते पदे दीर्घरूपेण न प्रदर्शिते अनयोः पदयोः प्रकृतस्वरूपज्ञानमायाससाध्यं भवेत् । किञ्च पदपाठकृता दीर्घरूपेण न प्रदर्शिते सति वैयाकरणदिशा अनयोः पदयोः साधुत्वनिर्णयोऽपि असम्भवः स्यात् । तेन च प्रकृतमन्त्रार्थस्यापि अनिष्टापत्तिर्जायेत । अत एवंप्रकारेण छान्दसह्रस्वत्वज्ञापनेनात्र महर्षिणा शाकल्येन वेदार्थावगमे साहाय्यं विहितम् ।

[३९०] ऋ. सं. १/१५/६ स्कन्दस्वामिभाष्यम्

[३९१] तदेव. सायणभाष्यम्

एवमृग्वेदसंहितायाः अपरत्रापि सांहितिकं छान्दसह्रस्वत्वं प्रदर्शितं पदपाठकृता शाकल्येन –

“इन्द्रा॑वरुण वा॒मह॑ हु॒वे चि॒त्राय॒ राध॑से ।

अस्मान्त्सु जि॒ग्युष॑स्कृतम् ।।”[३९२] इति।

मन्त्रेऽस्मिन्नपि संहितापाठे दृश्यते यत् ‘इन्द्रावरुण’ इति ह्रस्वान्तं पदम् । पदमिदं ह्रस्वत्वेन स्वीक्रियते चेत् तदा तस्यान्वयः सम्यग् भवितुं नार्हति । अपि चास्य शब्दस्वरूपस्य साधुत्वनिर्णयः अपि न सम्भवति । अस्य मन्त्रस्यापि पदपाठे ह्रस्वं पदमिदं शाकल्येन ‘इन्द्रावरुणा’ इति दीर्घान्तरूपेण प्रदर्शितम् । तेन ज्ञायते यदिदं प्रकृत्या दीर्घान्तं पदं यत् संहितापाठे ह्रस्वान्तरूपेण वर्तते । पदपाठस्थं ‘इन्द्रावरुणा’ इति पदं दृष्ट्वा इन्द्रश्च वरुणश्च इति विग्रहे द्वन्द्वसमासनिष्पन्नम् इन्द्रावरुणौ पदं, तस्य “सुपां सुलुक्...” इत्यादिसूत्रेण विभक्तेः आकारादेशे इन्द्रावरुणा इति पदं सिध्यतीति निश्चीयते । तेन च भाष्यकृद्भिः इन्द्रावरुणा इति दीर्घान्तरूपेण स्वीकृत्य भाष्याणि विरचितानि ।

एवंप्रकारेण ऋग्वेदसंहितायाः प्रथममण्डलान्तर्गत एको मन्त्रो यथा -

“प्र सा क्षि॒तिर॑सु॒र या महि॑ प्रि॒य ऋता॑वानावृ॒तमा घोष॑थो बृ॒हत् ।

यु॒वं दि॒वो बृ॑ह॒तो दक्ष॑मा॒भुवं॒ गां न धु॒र्युप॑ युञ्जाथे अ॒पः ।।”[३९३] इति।

ऋचोऽस्या ऋषिः दीर्घतमा, मित्रावरुणौ देवता च । मन्त्रस्यास्य प्रथमे चरणे ‘असुर’ इति ह्रस्वान्तं पदं दृष्ट्वा आपातदृष्ट्यास्य प्रकृतस्वरूपं नावबुध्यते । ह्रस्वान्तं दृष्ट्वा एकवचनान्तत्वेनादाय मन्त्रार्थः क्रियते चेत्तदा ‘घोषथः’ इति द्विवचनान्तक्रियया सह तस्यान्वयो

[३९२] ऋ. सं. १/१७/७

[३९३] तदेव. १/१५१/४

न सम्भवति। किञ्च 'ऋतावानौ' इति पदेन सह विशेष्यविशेषणभावसम्बन्धेन अन्वयः कर्तुं न शक्यते। अपि च 'असुर' इत्यत्र पदपाठाभावे सम्बोधनप्रथमायाः एकवचनरूपेणापि स्वीकर्तुं शक्यते। एवमवस्थायां संशयस्यास्य निरसनाय पदस्यास्य प्रकृतस्वरूपज्ञानाय पदपाठ एव शरणम्। मन्त्रस्यास्य पदपाठो यथा -

'प्र। सा। क्षितिः। असुरा। या। महिं। प्रिया। ऋतंऽवानौ। ऋतम्। आ। घोषथः। बृहत्।

युवम्। दिवः। बृहतः। दक्षंम्। आऽभुवंम्। गाम्। न। धुरि। उपं। युञ्जाथे इतिं। अपः॥'[३९४]इति।

पदपाठे दृश्यते यत् 'असुर' इति संहितागतं पदम् 'असुरा' इति प्रदर्शितम्। अतः पदपाठतः अस्य प्रथमैकवचनपक्षः सम्बोधनैकवचनपक्षश्च निराक्रियते। पदपाठतः एकवचनत्वपक्षे निरस्ते भाष्यकारैः द्विवचनान्ततिङन्तमादाय 'सुपां सुलुक्पूर्वसवर्णाच्छेयाड्याडायाजालः' इति विधिना सुपः स्थाने आकारादेशे 'असुरौ' इत्यस्य स्थाने 'असुरा' इति जातम् इति ज्ञायते। ततश्च 'असुरौ' इति द्विवचनान्तं पदमादाय मन्त्रार्थः क्रियत। मन्त्रस्यास्य सायणाचार्यकृता व्याख्या यथा – "हे असुरा असुरौ बलवन्तौ मित्रावरुणौ युवयोः या क्षितिः देवयजनरूपा महि महदत्यधिकं प्रिया प्रियतरा प्रीणयित्री वा सा क्षितिः प्र प्रकर्षेण सम्पादिता। उपसर्गश्रुतेः योग्यक्रियाध्याहारः। नामासीदतमिति शेषः। यागभूमिर्देवानां प्रियेति प्रसिद्धम्। आसाद्य च हे ऋतावानौ ऋतवन्तौ युवां बृहत् प्रबृद्धम् ऋतम् अस्मदीयं यज्ञम् आ घोषथः अवैकल्येन सम्पादितः इति स्तुतमित्यर्थः..."[३९५] इति।

[३९४] ऋ. सं. १/१५१/४ पदपाठः

[३९५] तदेव. सायणभाष्यम्

महर्षिणा शाकल्येन पदपाठे पदविभागकाले न केवलं छान्दसदीर्घाण्येव पदानि ह्रस्वत्वेन प्रदर्शितानि, अपि तु तेन ऋग्वेदसंहितायाः यत्र यत्र संहितापाठे छान्दसह्रस्वानि पदानि वर्तन्ते तानि पदविभागकाले दीर्घान्तरूपेणोल्लिखितानि । यथा तेन छान्दसदीर्घत्वज्ञापनेन मन्त्रेषु पदानां स्वरूपज्ञाने, पदार्थनिर्णये, मन्त्रार्थावबोधे, वैयाकरणदिशा तेषां साधुत्वनिर्णये, सर्वोपरि प्रकृतमन्त्रार्थज्ञाने साहाय्यं विहितं तथैव तेन सांहितिकछान्दसह्रस्वान्तपदानां दीर्घान्तत्वेन प्रदर्शनेन संशयं निराकृत्य संहितायाः प्रकृतमन्त्रार्थो ज्ञापितः।

## ३.८ अनानुपूर्विकसंहिता

कस्मिन्नपि समासे साधारणतया पदद्वयं वर्तते – पूर्वपदमुत्तरपदञ्चेति। द्वयोः पदयोर्मध्ये समासे सति योऽर्थः प्राप्यते समासे न कृते तथा नापि भवितुमर्हति। 'वीणा' 'पाणि' इति पदद्वयं पृथग् वर्तते चेत् यमर्थं व्यक्ति 'वीणापाणिः' इत्युक्ते न तथा। द्वयोः पदयोर्मध्ये समासे सति तयोः एकपदत्वमेव उररीक्रियते । अपि चैकपदत्वमादाय एव तस्मिन् स्वरविन्यासः क्रियते । पदपाठकृता शाकल्येन संहितागतानां मन्त्राणां पदपाठप्रदर्शनकाले समासबद्धपदस्य पूर्वोत्तरयोः पदयोर्मध्ये अवग्रहेण समासः सूचितः, अपि च पदद्वयं पृथक् कृतवा प्रदर्शितम्। तेन च समासे पूर्वपदं किम्, किञ्चोत्तरपदमिति सम्यगवबोद्धुं शक्यते। ऋग्वेदसंहितायाः मन्त्राणां संहितापाठे केषाञ्चित् एतादृशां समासबद्धपदानामुल्लेखः प्राप्यते येषां पूर्वोत्तरपदे एकीभूय न वर्तते । कुत्रचित् दृश्यते एकस्यैव समस्तपदस्य पूर्वपदं प्रथमे पादे वर्तते उत्तरपदञ्च तृतीये पादे। कुत्रचिच्च एकस्मिन्नेनव पादे पूर्वोत्तरपदे वर्तेते परन्तु तयोर्मध्ये अन्यत् पदमवस्थितम्। एवमवस्थायां तयोः पदयोः मध्ये समासोऽस्ति उत ते पृथक्पदे स्तः इति नावबोद्धुं शक्यते। अतः एकस्यैव पदस्य स्वरूपज्ञानाभावे समग्रस्य मन्त्रस्य अर्थः अज्ञातो वर्तते। किञ्च आपातदृष्ट्या पृथगवस्थानत्वात् पृथक् पदद्वयं स्वीकृत्य मन्त्रार्थः व्याख्यायते चेत्तदा मन्त्रस्य प्रकृतार्थहानेरपि

सम्भावना दृश्यते । एकस्यैव समासबद्धपदस्य पूर्वपदस्य उत्तरपदस्य च संहितापाठे पृथग्रूपेणावस्थानम् अनानुपूर्विकसंहिता इत्युच्यते ।

ऋग्वेदपदपाठकृता महर्षिणा शाकल्येन मन्त्राणां संहितापाठतः पदपाठप्रदर्शनकाले एतादृशीनाम् अनानुपूर्विकसंहितानां प्रकृतस्वरूपं समुद्घाटितम् । तेन पदविभागकाले अनानुपूर्विकसंहितायाः पृथक् वर्तमानं पदद्वयम् एकीकृत्य तयोर्मध्ये अवग्रहयोगेन समासः सूचितः। तस्मात् तत्र तत्र समासं दृष्ट्वा पदानां प्रकृतस्वरूपं ज्ञायते । पदस्य स्वरूपज्ञानेन च पदानां सम्यक्तया अन्वयः कर्तुं शक्यते । सम्यगन्वयेन च मन्त्रस्य प्रकृतार्थः प्रकाशतामायाति । ऋग्वेदसंहितायाः एवमेकमुदाहरणं यथा –

"शुन॑श्चि॒च्छेपं॒ निदि॑तं स॒हस्रा॒द्यूपा॑दमुञ्चो॒ अश॑मिष्ट॒ हि षः।

ए॒वास्मद॑ग्ने॒ वि मु॑मुग्धि॒ पाशा॒न्होत॑श्चिकित्व इ॒ह तू नि॒षद्य॑॥"[396] इति।

मन्त्रस्यास्य ऋषिः अत्रेः पुत्रः कुमारः , जननाम्नः पुत्रो वृशो वा। उभौ वात्र ऋषिः, अग्निश्चात्र देवता । मन्त्रस्यास्य प्रथमे पादे 'शुनश्चिच्छेपम्' इत्यंशे आपातदृष्ट्या मन्त्रार्थकरणे संशयो वर्तते। आपातदृष्ट्यात्र पदत्रयमस्तीति मन्यते 'शुनः' इति षष्ठ्यन्तं पदं, 'चित्' इति निपातः, 'शेपम्' इति द्वितीयान्तं पदञ्च । एवंप्रकारेण पदत्रयमादाय मन्त्रार्थः क्रियते चेत्तदा पदानां सम्यगन्वयाभावे मन्त्रार्थस्यानिष्टापत्तिर्जायते । शुनः इति षष्ठ्यन्तरूपेण शेपमिति द्वितीयान्तरूपेण स्वीकृते सति तदा शेपमित्यस्य अर्थप्राधान्यं भवति तत्पुरुषस्योत्तरपदप्राधान्यात् । किञ्चानयो- पृथक्पदत्वे स्वीकृते योऽर्थ आयाति स तु नेष्टः। पृथक्पदत्वे स्वीकृते सारमेयस्य शेपमित्यर्थ आयाति । एवंभूतेऽर्थे स्वीकृते प्रकृतमन्त्रार्थबोधो न जायते । अत्र 'शुनश्शेपम्' इति एकपदत्वेन स्वीक्रियते चेत्तदा सम्यगन्वयोपपत्तिर्भवति ।

[396] ऋ. सं. ५/२/७

एकपदत्वे स्वीकृते तदा शुनःशेपमिति पदेन ऋषिविशेषस्य नाम प्राप्यते, तेन च प्रकृतमन्त्रार्थोऽपि ज्ञायते। परन्तु संहितापाठे शुनः शेपमित्यनयोः पदयोर्मध्ये चिदिति निपातस्य विद्यमानत्वात् आपातदृष्ट्या पदद्वयं पृथगेव मन्यते। मन्त्रस्यास्य पदपाठं दृश्यते चेत्तदा संशयोऽयं निरस्यते। अस्य मन्त्रस्य पदपाठो यथा –

'शुनःऽशेपम्। चित्। निऽदितम्। सहस्रात्। यूपात्। अमुञ्चः। अशमिष्ट। हि। सः।

एव। अस्मत्। अग्ने। वि। मुमुग्धि। पाशान्। होतरिति। चिकित्वः। इह। तु। निऽसद्य॥'[३९७]

इति।

अतो दृश्यते यत् 'शुनश्चिच्छेपम्' इति संहितांशः 'शुनःऽशेपम्। चित्।' इत्येवंप्रकारेण प्रदर्शितम्। पदपाठत एव प्रतीयते यत् शुनःशेपमित्येकमेव पदम्। शुनः शेपमित्यनयोः पदयोर्मध्ये समासः सञ्जातः। यतो हि पदपाठे अवग्रहेणात्र समासः सूचितः। अपि च एकपदत्वेनादाय स्वरोऽपि तत्र प्रदत्तः। पदपाठत एवावगम्यते यदत्र शुनःशेपमिति एकमेव समस्तं पदं यत् संहितापाठे अनानुपूर्विकसंहितारूपेण वर्तते। अतः पदपाठतः एवं निश्चित्करणेन प्रकृतमन्त्रार्थस्यावबोधो भवति। भाष्यकृतः अप्यत्र शाकल्यप्रदर्शितम् एकपदत्वमादाय अनानुपूर्विकसंहितां स्वीकृत्य मन्त्रार्थो व्याख्यातः। अत्र सायणाचार्येणोच्यते – "हे अग्ने निदितं नितरां बद्धं शुनःशेपम् ऋषिं सहस्रात् अनेकरूपात् यूपात् अमुञ्चः अमोचयः। चिदिति पूरणः। शुनःशेपमिति पदस्य मध्ये पदान्तरस्य व्यत्ययेनावस्थितिः। सः ऋषिः अशमिष्ट हि शान्तवान् खलु। यद्वा। स हि यस्मादशमिष्ट। स्तुतिकर्मैतत्। अस्तावीत्। तस्मादमुञ्चः इति सम्बन्धः। एव एवम् अस्मत् अस्मत्तः पाशान् वि मुमुग्धि विमोचय। हे होतः हे चिकित्वः चेतनावन् अग्ने इह तु वेद्यां निषद्य अवस्थाय।"[३९८] इति। अत्र भाष्ये सायणाचार्येण "शुनःशेपम् इति पदस्य मध्ये

---

[३९७] ऋ. सं. ५/२/७ पदपाठः

[३९८] तदेव. सायणभाष्यम्

पदान्तरस्य व्यत्ययेन अवस्तितिः” इति यदुक्तं तत्तु पदपाठप्रदर्शनादेव। मन्त्रस्यास्य पदपाठाभावे व्यत्ययेन चिदिति निपातस्य स्थितिः उत शुनः शेपम् इति पृथक्पदद्वयमिति ज्ञानं भाष्यकारैरपि आयाससाध्यमेव भवेत् । अतः पदपाठकृता शाकल्येनात्र अनानुपूर्विकसंहिताबोधनेन मन्त्रार्थव्याख्याने महत् साहाय्यं विहितम् । मन्त्रस्यास्य व्याख्यानप्रसङ्गे भाष्यकृता वेङ्कमाधवेनापि अनानुपूर्विकसंहितामादायैव भाष्यं विरचितम् । तेनोच्यते – “शुनःशेपम् ऋषिम् निबद्धं पाशसहस्रात् यूपात् अमुञ्चः। सः खलु त्वां प्रति शशाम । एवम् हे अग्ने! अस्मत्तोऽपि पाशान् विमोचय। हे होतः प्राज्ञः! इह निषद्य।”[३९९] इति।

एवंप्रकारेण ऋग्वेदसंहितायाः अपरेमेकमुदाहरणं यथा –

‘‘सो अग्ने अह्नां हरिर्हर्यतो मदः प्र चेतसा चेतयते अनु द्युभिः।

द्वा जना यातयन्नन्तरीयते नरा च शंसं दैव्यं च धर्तरि’’।।[४००] इति।

मन्त्रस्यास्य तुरीये पादे ‘नरा च शंसम्’ इति संहितांशे आपातदृष्ट्या पूर्वमन्त्रवत् त्रीणि पदानि सन्तीति मन्यते। ‘नरा’ इति प्रथमान्तं ‘च’ इति निपातः ‘शंसम्’ इति द्वितीयान्तं पदम्। एतेषां त्रयाणां पृथक् पदत्वे स्वीकृते पदानां यथान्वयो भवति तथा कृते मन्त्रस्य अर्थावबोधः सम्यक् न जायते । परन्तु ‘नराशंसम्’ इति एकपदत्वे स्वीकृते पदस्य सम्यगर्थः प्राप्यते, तेन प्रकृतमन्त्रार्थोऽपि ज्ञायते। नराशंसमित्यस्यैकपदत्वं केवलं पदपाठतो ज्ञातुं शक्यते। मन्त्रस्यास्य पदपाठो यथा –

‘‘सः। अग्ने। अह्नाम्। हरिः। हर्यतः। मदः। प्र। चेतसा। चेतयते। अनु। द्युऽभिः।

[३९९] ऋ. सं. ५/२/७ वेङ्कटमाधवभाष्यम्

[४००] ऋ. सं. ९/८६/४२

द्वा। जना॑। या॒तय॑न्। अ॒न्तः। ई॒य॒ते॒। न॒रा॒शंस॑म्। च॒। दैव्य॑म्। च॒। ध॒र्तरि॑''।।[४०१] इति।

नराशंसमित्यनयोः पदयोर्मध्ये चकारस्य विद्यमानत्वादापातदृष्ट्या नराशंसमित्यस्य एकपदत्वं संहितापाठतः कथमपि न ज्ञातुं शक्यते, तच्च केवलं पदपाठं दृष्ट्वैवावगम्यते । भाष्यकृद्भिरपि नराशंसमिति एकमेव पदमादाय भाष्याणि विरचितानि । सायणाचार्येणास्य मन्त्रस्य व्याख्यानरूपेमोच्यते – ''सः सोमः अग्रे सर्वेषां समुखे चतसा प्राणिनां चेतनेन सह अह्नां द्युभिः दीप्तिभिः अनु प्र चेतयते अनुप्रज्ञायते। यद्वा। अह्नामग्रे अग्रभागे। प्रातरित्यर्तः। स्तोतृणां चेतसा प्रज्नेन द्युभिर्दीप्ताभिः स्तुतिभिश्चानु प्र चेतयते । कीदृशः सः। हरिः हरितवर्णः ह र्यतः कान्तः मदः मदकरः। किञ्च द्वा जना द्वौ जनौ स्तोतारं यष्टारं च यातयन् प्रापयन् स्वविहितेन कर्मणा । लौकिकवैदिकौ द्वौ जनौ द्रष्टव्यौ । एवं कुर्वन् अन्तः द्यावापृथिव्योर्मध्ये ईयते गच्छति । किं कुर्वन्। नराशंसं नरैः शंसनीयम् । मानुषमित्यर्थः। दैव्यं च दिवि भवम् उभयविधं धनं धर्तरि धारके यजमाने प्रेरयन्निति शेषः।''[४०२] इति। भाष्यकृता वेङ्कटमाधवेनापि नरांशसमिति एकपदमेव स्वीकृत्य मन्त्रार्थो व्याख्यातः. तेनोच्यते – ''सः मुखे अह्नाम् हरिः कान्तः मदः अनु प्रज्ञायते मनुष्याणां चेतसा दीप्तिभिः। द्वौ जनौ दैव्यं मनुष्यं च कार्येषु प्रेरयन् द्यावापृथिव्योः अन्तः गच्छति। सोऽयं नरैः शंसनीयं दैव्यं च रयिं धारके यजमाने प्रयच्छति।''[४०३] इति। अत्रापि पदपाठकृता शाकल्येन पदपाठे अनानुपूर्विकसंहितायाः एकपदत्वे न प्रदर्शिते पृथक्पदत्वमादाय मन्त्रार्थस्यानिष्टापत्तेराशङ्का समुदेति। ऋग्वेदसंहिताया एवमन्यत्रापि अनानुपूर्विकसंहिताज्ञापनेन मन्त्रार्थव्याख्यानकर्मणि महर्षिणा शाकल्येन भाष्यकृद्भ्यो महत् साहाय्यं समासादितम्।

---

[४०१] ऋ. सं. ९/८६/४२ पदपाठः

[४०२] तदेव. सायणभाष्यम्

[४०३] तदेव वेङ्कटमाधवभाष्यम्

## ३. ९ अध्यायसारः

निगुढार्थानां वैदिकमन्त्राणां कालस्य करालग्रासेन यथा विनाशो न स्यात्तस्मादेव मन्त्राणाम् अक्षरशः, पदशः, स्वरशश्च यथार्थतया संरक्षणाय वैदिकसम्प्रदाये विविधाः पाठाः प्रचलिताः। त्रयः प्रकृतिपाठाः अष्टौ च विकृतिपाठाः। अष्टानां विकृतिपाठानां मूलभूतस्तु पदपाठ एव। अध्यायेऽस्मिन् पर्यालोचनेन दृश्यते यद् यद्यपि आदौ वैदिकमन्त्राणां संरक्षणाय पदपाठस्य समुद्भवः, परन्तु पदपाठकृता शाकल्येन न केवलं वैदिकमन्त्राणां संरक्षणं कृतं, किञ्च तेन पदपाठे पदविभागेन, छान्दसदीर्घत्वज्ञापनेन, छान्दसह्रस्वत्वज्ञापनेन, तिङन्तपददीर्घत्वज्ञापनेन, अभ्यासदीर्घत्वज्ञापनेन च सन्दिग्धार्थानां वैदिकमन्त्राणां व्याख्यानकर्मणि बहुधा साहाय्यं विहितम्। अत्रैव पर्यालोचितं यत् पदपाठे पदविभागाभावे कथमेकस्यैव मन्त्रस्य बहुधा पदविभागः कर्तुं शक्यते, तेन च मन्त्रार्थस्यानिष्टापत्तिरपि समापतति। तेषु तेषु सन्दिग्धस्थलेषु पदपाठकृता शाकल्येन पदविभागे न प्रदर्शिते अस्माकं सविधे मन्त्रार्थः अज्ञातः अस्पष्टार्थो वा स्यात्। ऋग्वेदसंहितायाम् एकस्मिन् सूक्ते 'अथा' इति छान्दसदीर्घं पदम् अन्यत्र च 'अथा' इत्यत्र 'अथ आ' इति आकारप्रश्लेषो दृश्यते। एकस्मिन्नेव मन्त्रे द्वयोः दीर्घान्तयोः पदयोः एकत्र छान्दसदीर्घत्वमेकत्र च आकारप्रश्लेषो दृश्यते। ऋग्वेदसंहितायाः 'निर्ऋत्या' इति एकं पदं द्वयोः मन्त्रयोः दृश्यते, संहितापाठे समानरूपेण दृष्टे अपि पदपाठतः एव अनयोः पृथक्विभक्तित्वं प्रतीयते। पदपाठे एव पदमिदमेकत्र चतुर्थ्यन्तत्वेन अन्यत्र षष्ठ्यन्तत्वेन प्रदर्शितं, तस्मादेव प्रकृतमन्त्रार्थज्ञानं सम्भवति अन्यथा मन्त्रार्थस्य अनिष्टापत्तिः समापतेत्। एवमृग्वेदसंहितायाः संहितापाठे बहूनि संशयापन्नानि स्थलानि परिलक्ष्यन्ते। एवंविधेषु स्थलेषु यथार्थतया मन्त्रार्थज्ञाने पदपाठ एव शरणम्। पदपाठे पदविभागाभावे एतेषां संशयापन्नानां पदानां प्रकृतस्वरूपमस्माभिः न ज्ञायते। पदानां प्रकृतस्वरूपज्ञानाभावे तेषामन्वयः सम्यग् न सम्भवति। अतः पदपाठाभावे प्रकृतमन्त्रार्थः

अज्ञात एव स्यात् मन्त्रार्थस्य अन्यथाभावो वा स्यात् । अपि च पदपाठे तिङन्तपदानां तथा अभ्यासदीर्घाणां पदानां छान्दसदीर्घत्वे न प्रदर्शिते तत्र तत्र तेषां पदानां वैयाकरणदिशा याथार्थ्यमपि न प्रदर्शयितुं शक्यते तादृशस्य व्याकरणविधेरभावात् । एवंप्रकारेण ऋग्वेदस्य पदपाठकृता महर्षिणा शाकल्येन पदपाठे पदविभागमाध्यमेन वेदव्याख्यानकर्मणि सहायता विहिता । किञ्च आदौ तेनैव पदपाठेन वैदिकमन्त्राणां व्याख्या विहिता । तेन ऋग्वेदसंहितायाः सर्वेषां मन्त्राणां पदपाठप्रदर्शनत्वात् तत्पूर्ववर्तिनि ब्राह्मणग्रन्थादिषु सर्वेषां मन्त्राणां व्याख्यानप्रदर्शनाभावाच्च स एव ऋग्वेदस्य प्रथमो व्याख्याकृदित्यपि न अत्युक्तिर्भवति ।

## ४.१ अवग्रहलक्षणविचारः

अव-पूर्वकाद् ग्रह्-धातोः घ-प्रत्ययेन अप्-प्रत्ययेन वा अवग्रहशब्दनिष्पत्तिः। अमरकोषे अवग्रहशब्दस्य द्विधा प्रयोगः परिलक्ष्यते। आदौ दिग्वर्गे वृष्टेर्विघातार्थे ततः क्षत्रियवर्गे करिणः ललाटनाम्नि शब्दस्यास्य प्रयोगः प्रदर्शितः। "तद्विघातेऽवग्राहावग्रहौ समौ"[४०४] इति, "अवग्रहो ललाटं स्यादिषीका त्वक्षिकूटकम्"[४०५] इति च। वैदिकसम्प्रदाये तथा वैयाकरणनिकाये अवग्रहस्य विशिष्टः पारिभाषिकोऽर्थो वर्तते। अवगृह्यते पृथक्क्रियते अनेनेति अवग्रहः। मनियेर-उइलियामसमहाभागेन स्वकीये *Sanskrit English Dictionary* इत्याख्ये ग्रन्थे अवग्रहस्य स्वरूपप्रसङ्गे उच्यते – "Avagraha, as, m. separation of the component parts of a compound, or of the stem and certain suffixes and terminations (occurring in the Pada-text of the Vedas)…"[४०६] इति। महामहोपाध्यायेन काशीनाथवासुदेवाभ्यङ्करशास्त्रिमहाभागेन *A Dictionary of Sanskrit Grammar* इत्याख्ये ग्रन्थे अवग्रहशब्दस्यार्थप्रसङ्गे उक्तम् – "अवग्रह separation of a compound word into its component elements as shown in the Padapātha of the Vedic Saṁhitās.[४०७]" इति। अर्थात् वैदिकसंहितापाठस्य पदपाठे यौगिकपदस्थितस्य पदद्वयस्य पृथक्करणमवग्रह इति। ऋग्वेदप्रातिशाख्यस्य 'तावदवग्रहान्तरम्'[४०८] इति सूत्रभाष्ये भाष्यकृता उवटेनोच्यते यत् समस्तपदस्य पदयोः पृथक्करणमेवावग्रहः। तेनोच्यते - 'अवग्रहः नानाग्रहः। समासवर्तिनोः पदयोः पृथक्करणं मात्राकालं भवतीत्यर्थः'[४०९] इति। वाजसनेयिप्रातिशाख्ये

---

[४०४] अ. को. १म काण्डम्/ दिग्वर्गः/ ९८

[४०५] तदेव. २य काण्डम्/ क्षत्रियवर्गः/९१

[४०६] M. William. *Sanskrit English Dictionary.p-91.*

[४०७] K.V. Abhyankar. *A Dictionary of Sanskrit Grammar.* p-40.

[४०८] ऋ. प्रा. १/२८

[४०९] तदेव. उवटभाष्यम्

‘समासेऽवग्रहः ह्रस्वसमकालः’[410] इति सूत्रभाष्येऽपि उवटेनोच्यते - ‘द्वयोः पदयोः पृथक्करणमवग्रहः। नानाग्रह इत्यर्थः।’[411] इति। *वाजसनेयिप्रातिशाख्यस्य* अपरेण भाष्यकृता अनन्तभट्टेनोच्यते - ‘समासश्चतुर्विधः – अव्ययीभावः तत्पुरुषः, द्वन्द्वः बहुव्रीहि इति।...एवमेतस्मिन् चतुष्प्रकारे समासेऽवग्रहः स्यात् । अवग्रहो नाम द्वयोः पदयोः पृथक्करणम्।’[412] इति । *तैत्तिरीयप्रातिशाख्ये* अवग्रहसंज्ञायाः सूत्रं कृतम् - ‘तस्य पूर्वमवग्रहः’[413] इति। तस्य नाम इङ्ग्यस्य यत् पूर्वं तत् अवग्रहसंज्ञकं भवति। तस्मादुक्तं पदक्रमसदनभाष्यकृता - ‘तस्येङ्ग्यपदस्य यत् पूर्वपदं तदवग्रहसंज्ञकं भवति।’[414] इति। त्रिभाष्यरत्नाख्ये भाष्येऽपि उच्यते- ‘तस्य इङ्ग्यपदस्य पूर्वपदमवग्रह इत्युच्यते । यथा देवायत इति देवाऽयते ।’[415] इति । ननु इङ्ग्यं नाम किमित्युच्यते चेत् इङ्ग्यमिति विभागविशिष्टस्य पदस्य संज्ञा । इङ्ग्यते विभागेन चाल्यते इतीङ्ग्यम्। पाणिनिविरचितस्य ‘छन्दस्यृदवग्रहात्’[416] इति सूत्रस्य व्याख्यानावसरे न्यासकृता जिनेन्द्रवुद्धिनोच्यते - ‘अवगृह्यते विच्छिद्य पठ्यत इत्यवग्रहः’[417] इति । अर्थात् विभागविशिष्टस्य पदस्य विच्छेदकरणमेवावग्रहः। पदमञ्जरीकृता हरदत्तेनापि इदमेवोक्तम् - ‘अवगृह्यते विच्छिद्य पठ्यत इत्यवग्रहः।’[418] इति। वासुदेवदीक्षितेन वालमनोरमाव्याख्यायामपि इदमेवावग्रहलक्षणं प्रतिपादितम् - ‘अवगृह्यते विच्छिद्य पठ्यत इत्यवग्रहः[419]’ इति। महाभाष्यकृता पतञ्जलिना पदमध्ये अवग्रहप्रदानविषये उच्यते यत्

---

[410] वा. प्रा. ५/१

[411] तदेव. उवटभाष्यम्

[412] वा. प्रा. अनन्तभट्टभाष्यम्

[413] तै. प्रा. १/४९

[414] तै. प्रा. १/४९ पदक्रमसदनभाष्यम्

[415] तदेव त्रिभाष्यरत्नम्

[416] पा. सू. ८/४/२६

[417] तदेव न्यासः

[418] तदेव पदमञ्जरी

[419] सि. कौ. ३६४८ वालमनोरमाव्याख्या

अवग्रहप्रदानाय न पदकाराः अनुसरणीयाः किञ्च पदपाठकारैरेव व्याकरणमादाय अवग्रहो व्यवहर्तव्यः। तेन 'एतिस्तुशास्वृदृजुषः क्यप्'[४२०] इति सूत्रभाष्ये उच्यते - '...यद्येवमवग्रहः प्राप्नोति। न लक्षणेन पदकारा अनुवर्त्याः। पदकारैर्नाम लक्षणमनुवर्त्यम्। यथालक्षणं पदं कर्तव्यम्।'[४२१] इति। *याज्ञवल्क्यशिक्षायाः* शिक्षावल्ल्याख्यायां विवृत्तौ अमरनाथदीक्षितेनोच्यते अवग्रहलक्षणप्रसङ्गे - 'अवग्रहो नाम पदपाठकाले समस्तासमस्तस्य पदस्य प्रकृतिप्रदर्शनार्थं यो विच्छेदः सः'[४२२] इति। आधुनिकविदुषा वशिष्ठनारायणझामहाभागेन स्वकीये *A Linguistic Analysis of the Ṛgveda Padapātha* इत्याख्ये ग्रन्थे अवग्रहविषय उक्तम् – "The symbols 'ऽ' and 'I' traditionally known as *avagraha* and *daṇḍa* respectively have different connotations in the *Pada-text* of the RV. Primarily, they represent pause or juncture while passing from one concatenated unit to be other on the Sentence-level.[४२३]" इति। वचनादस्मात् प्रतीयते यदनेन विदुषापि पृथक्करणमेवावग्रहत्वेनाङ्गीकृतम्। वैयाकरणैः प्रातिशाख्यकारैश्च संयुक्तपदस्य विभाग एव अवग्रहत्वेन स्वीकृतः। इदानीन्तने समये अवग्रहपदेन प्रायेण 'ऽ' इति चिह्नविशेषः उच्यते। अयञ्च चिह्नविशेषः प्रायेण अकारद्वयस्य संयोगे, अकारैकारयोः संयोगे, अकारौकारयोश्च संयोगे परिलक्ष्यते। अयञ्च चिह्नविशेषः 'लुप्तः अकारः' इत्यभिधयापि अभिधीयते।

ननु अवग्रह इति चिह्नविशेषः उत विच्छेदकार्यविशेषः इत्याशङ्कायाः समाधानरूपेण *ऋग्वेदप्रातिशाख्यस्य* सम्पादयित्रा वीरेन्द्रकुमारवर्ममहाभागैः उच्यते यत् यद्यपि शास्त्रानुसारि पृथक्करणमेवावग्रहपदेनोच्यते तथापि गौणरूपेण 'ऽ' इति चिह्नविशेषः

---

[४२०] पा. सू. ३/१/१०९

[४२१] तदेव. महाभाष्यम्

[४२२] या. शि. श्लोक-३०. शिक्षावल्ली विवृत्तिः

[४२३] V.N. Jha. *A Linguistic Analysis of the Ṛgveda Padapātha.* p-15.

अवग्रहपदेनेदानीमुच्यते। उक्तञ्च तेन – “पदपाठ मेँ समासो के घटक पदो को और प्रत्यय को इस प्रकार ऽ के चिह्नसे पृथक् किया जाता है। इस प्रकार पृथक् किए गए पूर्व-पद्य के उच्चारण और उत्तरपद्य के उच्चारण के मध्य मेँ एकमात्रा काल का व्यवधान होता है। इस पृथक्करण को ही ‘अवग्रह’ कहते है।”[४२४] इति।

तर्हि समस्तस्य असमस्तस्य वा संयुक्तपदस्य अंशद्वयस्यांशत्रयस्य वा पृथक्करणमेवावग्रह इति सिद्धम्। यदावग्रहेण पदानि पृथक्क्रियन्ते तदा पदात् पदान्तस्योच्चारणे विरामः प्रदीयते। अधुना तस्यावग्रहस्य विरामः कतिमात्रात्मकः इति प्रातिशाख्यकृतस्तथा शिक्षाकृतस्तथा वैयाकरणा नैकमत्यं भजन्ते। अवग्रहस्य मात्राकालप्रसङ्गे शौनकेन *ऋग्वेदप्रातिशाख्य*ग्रन्थे उच्यते - ‘तावदवग्रहान्तरम्’[४२५] इति। अस्य सूत्रस्य पूर्ववर्ति सूत्रं हि - ‘मात्रा ह्रस्वः’[४२६] इति। तेन प्रतीयते यत् अवग्रहो मात्रात्मको भवेदिति शौनकसिद्धान्तः। *वाजसनेयिप्रातिशाख्ये*ऽपि अवग्रहस्य एकमात्रा स्वीकृता। तत्रोच्यते - ‘समासेऽवग्रहो ह्रस्वसमकालः’[४२७] इति। अर्थात् ह्रस्वसमकालो नाम यथा ह्रस्ववर्णोच्चारणे एकमात्रा अपेक्षते तथैव अवग्रहे एकमात्रात्मकः विरामः स्यात्। *तैत्तिरीयप्रातिशाख्या*नुसारेणायं विरामो भवति द्विमात्रात्मकः। शिक्षाग्रन्थेषु अवग्रहस्य अर्धमात्रा स्वीकृता। *याज्ञवल्क्यशिक्षाया*मुच्यते –

‘अवग्रहे तु कालः स्यादर्धमात्रात्मको हि सः।

पदयोरन्तरे काल एकमात्रा विधीयते॥’[४२८] इति।

---

[४२४] Ṛgveda-Prātiśakhya. Ed. V.K.Verma. p-66.

[४२५] ऋ. प्रा. १/२८

[४२६] तदेव. १/२७

[४२७] वा. प्रा. ५/१

[४२८] या. शि. श्लोक-३०.

अर्थात् अवग्रहात् परमर्धमात्रात्मको विरामो विधेयः। पदयोरन्तरे च मात्रात्मको विरामः कर्तव्यः। अथर्ववेदीयायां *माण्डूकीशिक्षा*यामपि अवग्रहस्यार्धमात्रात्वं प्रोक्तम् –

'अवग्रहेऽर्धमात्रं स्यात् कालो मात्रा पदान्तरे ।

अर्द्धर्चे द्वे तथा पादे त्रिमात्रं स्यादृगन्तरम् ॥'[४२९] इति।

आधुनिकविदुषा वशिष्ठनारायणझामहाभागेन स्वकीये *A Linguistic Analysis of the Ṛgveda Padapātha* इत्याख्ये ग्रन्थे अवग्रहस्य अर्धमात्रत्वमेवाङ्गीकृतम्। तेनोच्यते - '...whereas an *avagraha* represents the intervention by the lenth of time required to pronounce a consonant (*ardhamātrā*) between two phonological units.'[४३०] इति। अवग्रहस्य मात्रामादाय यद्यपि विद्वत्सु मतभेदो वर्तते परन्तु आवैदिकवाङ्मयम् इदानीन्तनसाहित्यपर्यन्तं तथा लौकिकव्यवहारे अवग्रहस्य बाहुल्येन प्रयोगः परिलक्ष्यते। ऋग्वेदपदपाठकृता महर्षिणा शाकल्येन वैदिकमन्त्राणां संहितापाठतः पदपाठकरणकाले अवग्रहस्य कथंप्रकारकः प्रयोगः कृत इति अधः प्रस्तूयते।

## ४.२ पदपाठेऽवग्रहः

पदपाठकृता शाकल्येन वैदिकमन्त्राणां संहितापाठतः पदपाठकरणकाले याः पद्धतयः समाश्रिताः तास्ववग्रहप्रदानमन्यतमम्। पदपाठे अवग्रहप्रदानकाले केचन नियमाः अनुसृत्य शाकल्येन पदमध्ये अवग्रहः प्रदत्तः। पदपाठे पदविभागकाले शाकल्येन कुत्र कुत्र पदमध्ये अवग्रहस्य प्रयोगः कृतः अधः तत् प्रस्तूयते ।

---

[४२९] मा. शि. श्लोक-१३८.

[४३०] V.N. Jha. *A Linguistic Analysis of the Ṛgveda Padapātha.* p-15.

**१.**प्रातिपदिकाद् अनन्तरं भ्याम्, भिस्, भ्यस्, सुप् इत्येताः विभक्तयः अवग्रहेण पृथक् प्रदर्श्यन्ते एतासां पूर्वं दीर्घस्वराविद्यमाने सति। यथा – मुहद्भ्याम् > मुहत्ऽभ्याम् (ऋ. सं. ३.७.६), समुषद्भिः > सम् । उषत्ऽभिः (ऋ. सं. १.६.३), स्तोतृभ्यः > स्तोतृऽभ्यः (ऋ. सं. १.११.३) सुमत्सु > सुमत्ऽसु (ऋ.सं. १.५.४) ।

**२.** त्वत्वनौ प्रत्ययौ पदपाठे अवग्रहेण पृथक् प्रदर्श्येते। यथा - गर्भत्वम् गर्भऽत्वम् (ऋ. सं. १.६.४), महित्वा > महिऽत्वा (१०.१२१.३)।

**३.** अस्त्यर्थकौ मतुब्वतुपौ प्रत्ययौ पदपाठे अवग्रहेण पृथक्क्रियेते। यथा –मधुमन्तम् > मधुऽमन्तम् (१.१३.२) वीरवतीम् > वीरऽवतीम् (१.१२.११)।

**४.** नञ्समासं तथा देवताद्वन्द्वसमासं विहाय समस्तपदस्य पूर्वोत्तरपदे अवग्रहेण पृथक् क्रियेते। यथा- कण्वसखा > कण्वऽसखा (ऋ. सं. १०.११५.५), कुविक्रतुः > कुविऽक्रतुः (१.१.५)।

**५.** अवग्रहस्य पूर्वभागे सन्धिवशात् विकारे सति अवग्रहप्रदानादनन्तरं सन्धिरहितत्वेन प्रदर्श्यते। यथा - अब्जाः > अप्ऽजाः (४.४०.५), पुरोहितम् > पुरःऽहितम् (१.१.१)।

**६.** तरप्तमपौ प्रत्ययौ अवग्रहेण पृथक्क्रियेते। यथा – अस्थन्वन्तम् > अस्थन्ऽवन्तम् (१.१६४.४), मन्द्रतरः > मन्द्रऽतरः (ऋ. सं. ३.७.९), मदिन्तरः > मदिन्ऽतरः (ऋ.सं. ८.२४.१६)। अत्रोल्लेख्यं दीर्घान्तात् समासयुक्तात् कृदन्तात् तरप्तमपोः विद्यमाने प्रत्ययात् पूर्वमवग्रहो अप्रयुक्तः सन् धातोः प्राक् प्रयुज्यते। यथा- रत्नधातमम् > रत्नऽधातमम्। (ऋ. सं. १.१.१), देववीतमः > देवऽवीतमः (ऋ. सं १.३६.९)।

**७.** यत्र अवग्रहः इतिकरणञ्च उभावेव प्रयुज्येते तत्रेतिकरणादनन्तरं ततः अवग्रहः प्रयुज्यते। यथा - सुक्रतो > सुक्रतो इति सुऽक्रतो ( ऋ. सं. १.५.६)।

**८.** यत्र संहितापाठे पदस्य द्विरुक्तिः भवति तत्र तं द्विरुक्तमेकपदत्वेनादाय तयोरमध्ये अवग्रहः प्रयुज्यते। यथा - अ॒ग्निम॑ग्नि॒म् > अ॒ग्निम्ऽअ॑ग्निम् (ऋ. सं. १.१२.२), दि॒वेदि॑वे > दि॒वेऽदि॑वे (ऋ. सं. १.१.३)।

**९.** यत्र संहितापाठे तिङन्तमुदात्तं ततः प्राक् उपसर्गश्च अनुदात्त तत्र अवग्रहेण उपसर्गः पृथक् प्रदर्श्यते। यथा – अ॒भि॒शास॑ति > अ॒भि॒ऽशास॑ति (ऋ. सं. ६.५४.२), प्र॒वोच॑ति > प्र॒ऽवोच॑ति (ऋ. सं. ५.२७.४)।

**१०.** संहितापाठे यत्र उपसर्गद्वयात्मकं तिङन्तमनुदात्तम् चेत्, प्रथमः उपसर्गः अनुदात्तः द्वितीयश्च उदात्तश्चेत् तदा प्रथमोपसर्गादनन्तरम् अवग्रहः प्रयुज्यते। यथा- प्र॒त्याव॑र्तय > प्र॒ति॒ऽआव॑र्तय (ऋ. सं. ६.४७.३१)।

**११.** क्यच् क्यङ् क्यष् इत्येतैः प्रत्ययैः ये नामधातवः प्रयुज्यन्ते तत्र प्रातिपदिकतः प्रत्ययांशः अवग्रहेण पृथक्क्रियते। यथा - वृ॒षा॒यन्ते॑ > वृ॒ष॒ऽयन्ते॑ (ऋ. सं. ३.७.९), देवयन्तः॑ > दे॒व॒ऽयन्तः॑ (ऋ. सं. १.११५.२)।

एवंप्रकारेण महर्षिणा शाकल्येन मन्त्राणां संहितापाठतः पदपाठकरणकाले बहुत्र अवग्रहः प्रदत्तः।

### ४.३ समासः

सम् पूर्वकाद् अस्-धातोः (दिवादिगणीयः)[४३१] घञि समासशब्दो निष्पन्नः। समसनं समासः, समसनं नामैकपदीकरणम् । समासस्त्वेको वृत्तिविशेषः।[४३२] वृत्तेर्लक्षणं हि – 'परार्थाभिधानं वृत्तिः'[४३३] इति। परो नाम अन्यः अर्थः अभिधीयते अनेन इति परार्थाभिधानं वृत्तिः। उपर्युक्तैः पञ्चभिः वृत्तिभिः नूतनः विशिष्टार्थः प्राप्यते। 'मनु' इत्यतः योऽर्थः प्राप्यते मनु+अण् > मानवः इत्यतः न सोऽर्थः प्राप्यते परन्तु तस्मात् पृथगर्थः प्राप्यते। इदमेव वृत्तेर्माहात्म्यम्। समासवृत्तावपि यदा एकपदीकरणं क्रियते तदा पृथक् कश्चित् नूतनः अर्थः प्राप्यते। कस्मिन्नपि समासे साधारणतया द्वे पदे वर्तेते – पूर्वपदमुत्तरपदञ्चेति। द्वयोः पूर्वोत्तरयोः पदयोर्मध्ये समासे सति योऽर्थः प्राप्यते समासे न कृते तथा न। 'वीणा' 'पाणिः' इति पदद्वयं पृथग् वर्तमाने योऽर्थः प्रतीयते वीणापाणिः इति समासे कृते न तथा। 'राजन् पुरुषः' इति पृथक् स्थिते यमर्थं व्यक्ति 'राजपुरुषः' इति समासे कृते न तथा। समासे कृते उभयत्रैव अन्यः कश्चन अर्थः प्राप्यते। तर्हि कुत्रचित् वाक्ये श्लोके मन्त्रे वा द्वयोः पदयोर्मध्ये समासः अस्ति उत न इति ज्ञानाभावे तु सम्यग् वाक्यार्थावबोधो न जायते। किञ्च द्वयोः पदयोर्मध्ये समासे सति तयोरेकपदत्वं स्वीक्रियते। अपि चैकपदत्वमादायैव तस्मिन् उदात्तादिस्वरविन्यासः क्रियते। तर्हि वाक्ये यथार्थतया समासज्ञानाभावे सुस्पष्टतया वाक्यार्थबोधो न जायते तथा स्वरोऽपि तत्र न प्रदातुं शक्यते। वैदिकमन्त्राणां संहितापाठे पदानि सन्धियुक्तानि सन्ति वर्तन्ते। संहितापाठे मन्त्रेषु द्वयोः पदयोर्मध्ये सन्धिकार्यं जातमुत समासवृत्तिर्जाता इति आपातदृष्ट्या न ज्ञातुं शक्यते। तत्तन्मन्त्रस्य पदपाठादेवायं संशयो निरस्यते। यतो हि पदपाठे एव संहितागतमन्त्राणां सन्धिं

---

[४३१] असु क्षेपणे इति धातुः पा. धा. १२८०

[४३२] समासा एकशेषाश्च तद्धिताश्च कृतस्तथा।
सनाद्यन्ता धातवश्च वृत्तयः पञ्चधा मताः।। इति कारिकानुसारं वृत्तिः पञ्चप्रकारका – समासः एकशेषः तद्धितः कृत् सनादिधातुश्चेति।

[४३३] लघु. कौ. ९०६

विभज्य दण्डेन पदानि पृथक् प्रदर्शितानि अपि च तत्र पदमध्ये समासे सति तत् पदं दण्डेन न विभज्य एकपदरूपेणैव प्रदर्शितम् । पदपाठकृता महर्षिणा शाकल्येन पदपाठे न केवलं समासबद्धानि पदानि एकपदत्वेन प्रदर्शितानि अपि च तत्र पूर्वोत्तरयोः पदयोर्मध्ये अवग्रहप्रदानेन तत्र समासः सूचितः । तत्र तत्र संशयापन्नेषु संहितागतमन्त्रेषु पदपाठं दृष्ट्वैव सन्धिर्जाता उत समासो जात इति स्थिरीकृत्य यथार्थतया पदानामन्वयेन मन्त्रार्थव्याख्यानं कर्तुं शक्यते । तेन च प्रकृतमन्त्रार्थावबोधोऽपि भवति ।

## ४.४ अवग्रहेण मन्त्रार्थविज्ञापनम्

ऋग्वेदपदपाठकृता शाकल्येन ऋग्वेदसंहितायाः बहुषु संशयापन्नेषु मन्त्रेषु अवग्रहप्रदानेन अवग्रहनियमेन वा मन्त्रार्थज्ञाने तथा मन्त्रार्थव्याख्याने भाष्यकृद्भ्यो महानुपकारो विहितः। संस्कृतवाङ्मयस्य शब्दभाण्डारे केचन शब्दाः एवंप्रकारका विद्यन्ते येषां व्याकरणदिशा विविधाः व्युत्पत्तयः कर्तुं शक्यन्ते इति प्रागेवोक्तम् । ऋग्वेदसंहितायामेकमेव पदं एकस्मिन् मन्त्रे सुबन्तत्वेन प्रयुक्तमन्यत्र च तिङन्तत्वेन तस्य प्रयोगः परिलक्ष्यते । आपातदृष्ट्या संहितापाठं परिलक्ष्य तादृशां पदानां सुबन्तत्वमुत तिङन्तत्वं ज्ञातुं न शक्यते। एवंविधस्थलेषु पदपाठकृता शाकल्येन अवग्रहप्रदानेन तेषां तिङन्तत्वमुत सुबन्तत्वं सूचितम्। तेन च तस्य पदस्य यथार्थतयार्थो ज्ञायते, ततश्च सम्यक् पदार्थज्ञानेन सम्यक् मन्त्रार्थज्ञानमपि सम्भवति। ऋग्वेदसंहितायाः एवंप्रकारक एको मन्त्रो यथा –

‘‘योनि॑ष्ट इन्द्र नि॒षदे॑ अका॒रि॒ तमा नि षी॑द स्वा॒नो नार्वा॑।

वि॒मुच्या॒ वयो॑ऽव॒सायाश्वा॑न्दो॒षा वस्तो॒र्वही॑यसः प्रपि॒त्वे॥’’[434] इति।

अस्य मन्त्रस्य पदपाठो यथा -

[434] ऋ. सं. १/१०४/१

“योनि॑ः । ते॒ । इ॒न्द्र॒ । नि॒ऽसदे॑ । अ॒का॒रि॒ । तम् । आ । नि । सी॒द॒ । स्वा॒नः । न । अर्वा॑

वि॒ऽमुच्य॑ । वय॑ः । अ॒व॒ऽसाय॑ । अश्वा॑न् । दो॒षा । वस्तो॑ः । वहीय॑सः । प्र॒ऽपि॒त्वे ॥”[435]

इति।

ऋषिणा कुत्सेन दृष्टेऽस्मिन् मन्त्रे स्तुतो देव इन्द्रः। मन्त्रस्यास्य तृतीये पादे ‘अवसाय’ इति संहितागतं पदम् पदपाठे ‘अवऽसाय’ इत्येवंप्रकारेण अवग्रहेण प्रदर्शितम्। पदेऽस्मिन् अवग्रहप्रदानत्वात् पदपाठतः अस्य तिङन्तत्वं ज्ञायते। पदपाठकृता शाकल्येन समस्तपदानां मध्ये समासज्ञापनाय अवग्रहः प्रदत्तः पदपाठकरणसमये इति प्रागेवोक्तम्। वस्तुतस्त्वत्र शाकल्येन अवग्रहेण गतिसमासः सूचितः। तेन ‘अवसाय’ इति संहितागतपदस्य व्युत्पत्तिः ‘अव-सू-ल्यप्’ इति ज्ञायते। अव-पूर्वकात् ‘षो अन्तकर्मणि’[436] इति धातोः ‘समासेऽनञ्पूर्वे क्त्वो ल्यप्’[437] इति सूत्रेण ल्यपि ‘अवसाय’ इति पदं निष्पन्नम्। यद्यपि पदस्यास्य ‘अवस’ इति प्रातिपदिकस्य चतुर्थ्यैकवचनान्ततया सुबन्तत्वेनापि व्युत्पत्तिः सम्भवः परन्तु पदपाठे अवग्रहप्रदर्शनात् पदपाठं दृष्ट्वैव भाष्यकारैः पदमिदं समस्तपदरूपेण स्वीकृत्य तिङन्तत्वेनादाय मन्त्रार्थो व्याख्यातः। अस्य मन्त्रस्य व्याख्यानप्रसङ्गे सायणाचार्येणोच्यते - ‘हे इन्द्र योनिः वेद्याख्यं स्थानं ते तव निषदे निषदनाय उपवेशनाय अकारि कृतमस्माभिः प्रकल्पितमभूत् । तं योनिं आ नि षीद शीघ्रमागत्य तत्रोपविश। शीघ्रागमने दृष्टान्तः। स्वानो नार्वा । अर्वा इति अश्वनाम । यथाश्वः स्वानो ह्रेषाशब्दं कुर्वन् स्वकीयं स्थानं शीघ्रमागच्छति तद्वत् । किं कृत्वा । वयः अश्वबन्धनार्थान् रश्मीन् विमुच्य रथाद्विश्लिष्य तथा अश्वान् रथे योजितांश्च तुरगान् अवसाय विमुच्य ।...कीदृशान् अश्वान् प्रपित्वे यागकाले प्राप्ते। ...दोषा रात्रौ वस्तोः अहनि च वहीयसः

[435] ऋ. सं. १/१०४/१. पदपाठः

[436] कौ. धा. ११४७ (पा.धा. ४/४२)

[437] पा. सू. ३/१/३७

आदरातिशयेन वोढ्रून्।' इति।[४३८] अतो दृश्यते सायणाचार्येण पदपाठप्रदर्शितं तिङन्तत्वमादायैव 'अवसाय' इत्यस्य अर्थः 'विमुच्य' इति प्रदर्शितः। किञ्च तेन भाष्यान्ते पदानां व्याकरणदिशा साधुत्वप्रदर्शनावसरे स्पष्टतया अव-पूर्वकात् सू-धातोः ल्यप्प्रत्यये पदमिदं निष्पन्नमित्युक्तम्।

प्राचीनभाष्यकृता स्कन्दस्वामिनापि 'अवसाय' इति पदस्य तिङन्तत्वमुल्लेखपूर्वकमस्य मन्त्रस्य व्याख्यानं विहितम्। उच्यते च तेन "योनिः योनिशब्दोऽत्र स्थानवचनः। उपवेशनस्थानं वेद्याख्यम्। ते तव हे इन्द्र! निषदे निषदनाय। उपवेशनार्थमित्यर्थः। अकारि कृतमस्माभिः। तम् आ तमिति कर्मश्रुतेः आ इति चोपसर्गाद्योग्यक्रियापदाध्याहारः। तं योनिमागत्य नि षीद उपविश। स्वानः न अर्वा आगमनस्येयमुपमा। स्वनतिः शब्दार्थः। स्वनति स्वान्यते वा असाविति स्वानः। 'अर्वा' (निघ १,१४) इति अश्वनाम। यथा ह्रेषन् अश्ववारेण वा शब्दायमानोऽश्वः शीघ्रमागच्छेत् तद्वच्छीघ्रमागत्येत्यर्थः। विमुच्य वयः मुञ्चतिर्गत्यर्थः। अस्वान् सारथिं च प्रति वान्तीति वयः अश्वप्रग्रहा इहाभिप्रेताः। द्वितीयार्थे प्रथमा। अश्वप्रग्रहांश्च विमुच्य। कुतः। सामर्थ्यादश्वेभ्यः। अवसाय अश्वान् अवपूर्वोऽयं स्यतिर्विमोचने। अश्वांश्च विमुच्य। कुतः। सामर्थ्याद्ययोक्त्रेभ्यः रथाद्वा। कीदृशान्। दोषाः वस्तोः वहीयसः रात्रावहनि चातिशयेन वोढ्रून्। क्व विमुच्य। प्रपित्वे आसन्ननामैतत्। वेद्या आसन्ने देशे। अथवा प्रपित्वे इति कालस्य प्रतिनिर्देशः। निषीदेत्येतेन चास्यः सम्बन्धः। आसन्ने यागकाले निषीदेति।"[४३९] इति। वेङ्कटमाधवेनाप्युच्यते - "आसनं तव इन्द्र! निषदनाय कृतम्। तम् योनिम् गृहे आगत्य उपविश शब्दं कुर्वन् इव अश्वः ब्रजम्। अश्वबन्धनानि विमुच्य अवसाय च अश्वान् रात्रौ अहनि च अतिशयेन वोढ्रून् तव अभिप्राप्तौ।"[४४०] इति। मुद्गलीयायां वृत्तावपि अवसाय इत्यस्य तिङन्तत्वेन अर्थः प्रदर्शितः। तत्रोच्यते – "हे इन्द्र! योनिः वेद्याख्यं स्थानम् ते तव निषदे

---

[४३८] ऋ. सं. १/१०४/१ सायणभाष्यम्।

[४३९] तदेव. स्कन्दस्वामिभाष्यम्

[४४०] तदेव. वेङ्कटमाधवभाष्यम्

निषदनाय उपवेशनाय अकारि कृतम् अस्माभिः प्रकल्पितमभूत्। तम् योनिम् आ नि षीद शीघ्रमागत्य तत्रोपविश। शीघ्रमागमने दृष्टान्तः। स्वानः न अर्वा अर्वेत्यश्वनाम। यथा अश्व स्वानः ह्रेषाशब्दं कुर्वन् स्वकीयं स्थानं शीघ्रमागच्छति तद्वत्। किं कृत्वा। वयः अश्वबन्धनार्थान् रश्मीन् विमुच्य रथाद् विश्लिष्य तथा अश्वान् रथे योजितांञ्च च तुरगान् अवसाय विमुच्य। कीदृशान् अश्वान्। प्रपित्वे यागकाले प्राप्ते दोषा रात्रौ वस्तोः अहनि च वहीयसः आदरातिशयेन वोढ्न्।।"[४४१] इति।

एवंप्रकारेण ऋग्वेदस्य दशममण्डले एकस्मिन् मन्त्रे 'अवसाय' इति पदस्य प्रयोगः परिलक्ष्यते। स मन्त्रो यथा –

"मयोभूर्वातो अभि वातूस्रा ऊर्जस्वतीरोषधीरा रिशन्ताम् ।

पीवस्वतीर्जीवधन्याः पिबन्त्ववसाय पद्वते रुद्र मृळ।।"[४४२] इति।

मन्त्रोऽयं शबरस्यार्षः गोदेवत्यश्च। मन्त्रस्यास्य तुरीये पादे 'अवसाय' इति पदं परिलक्षते। 'अवसाय' इति पदं द्विधा व्याख्यातुं शक्यते। प्रथमतः अव-पूर्वकात् सू-धातोः ल्यपि निष्पन्नं तिङन्तपदम्, द्वितीयतः अवस इति प्रातिपदिकस्य चतुर्थ्यैकवचननिष्पन्नं सुबन्तपदम्। द्विधा पदविभागे प्राप्ते द्विविधेन पदविभागेन द्विविधः अन्वयः प्राप्यते। तस्मात् पृथक् अन्वयेन मन्त्रार्थस्यापि पृथक् स्थितिर्दृश्यते। द्वयोः मन्त्रार्थयोर्मध्ये को मन्त्रार्थ इष्टः इति निर्णेतुमादौ 'अवसाय' इति संहितागतपदस्य प्रकृतस्वरूपं ज्ञातव्यम्। पदानां प्रकृतस्वरूपज्ञाने महर्षिणा शाकल्येन विरचितः पदपाठ एव प्रधानप्रमाणम्। अस्य मन्त्रस्य पदपाठो यथा - 'मयः ऽभूः । वातः । अभि । वातु । उस्राः । ऊर्जस्वतीः । ओषधीः । आ । रिशन्ताम् ।

[४४१] ऋ. सं. १/१०४/१. मुद्गलीया वृत्तिः

[४४२] ऋ. सं. १०/१६९/१

पीब॑स्वतीः । जी॒वऽध॑न्याः । पि॒ब॒न्तु॒ । अ॒व॒साय॑ । प॒त्ऽव॑ते । रु॒द्र॒ । मृ॒ळ ॥'[४४३] इति।

अत्र पदपाठे दृश्यते यत् पूर्वोक्ते मन्त्रे (१/१०४/१) 'अवसाय' इति संहितागतपदमध्ये यथा अवग्रहः प्रदर्शितस्तथात्र न कृतः। अतः पदपाठतः एव ज्ञायते यदत्र पूर्वोक्तमन्त्रवत् गतिसमासो न जातः। समासाभावादत्र पदपाठकृता अवग्रहो न प्रदत्तः। अतः पदपाठत एव निश्चीयते यदिदं न तिङन्तपदमपि तु सुबन्तपदमेव । सुबन्तपदरूपेण स्वीकृते अत्र 'अवस' इति प्रातिपदिकस्य चतुर्थ्याः एकवचनमस्तीति लभ्यते। सुबन्तरूपेण स्वीकृत्य 'पद्वते' इति चतुर्थ्यन्तस्य सामानाधिकरण्येन अन्वयेन मन्त्रार्थः क्रियते भाष्यकृद्भिः। तेन च पदानां यथार्थतया अन्वयेन प्रकृतमन्त्रार्थज्ञानमपि सम्भवति । पदपाठकृतात्र अवग्रहं न प्रदर्श्य समासाभावं सूचयित्वा मन्त्रार्थकरणे साहाय्यं विहितम् । परवर्तिनि काले भाष्यकृद्भिरपि पूर्वोक्तमन्त्रे यथा 'अवसाय' इति तिङन्तपदमादाय भाष्याणि विरचितानि अत्र तु न तथा कृत्वा पदपाठविज्ञापितमार्गेण 'अवसाय' इति सुबन्तत्वेन आदाय मन्त्रस्यास्य भाष्याणि विरचितानि । मन्त्रस्यास्य व्याख्यानरूपेण सायणाचार्येणोच्यते – "वातः वायुः मयोभूः सुखस्य भावयिता सन् उस्राः गाः अभि वातु अभिगच्छतु । ताश्च गावः ऊर्जस्वतीः रसवतीः ओषधीः बलवन्ति तृणानि आ रिशन्ताम् अभितः स्वादयन्तु । तथा पीवस्वतीः प्रवृद्धाः जीवधन्याः जीवानां प्रीणयित्रीरपश्च पिबन्तु । हे रुद्र ज्वरादिरोगस्य प्रेक्षणेन संहर्तर्देव पद्वते पादयुक्ताय अवसाय अन्नाय गोरूपाय मृळ उपदयां कुरु । मा बाधस्वेत्यर्थः।"[४४४] इति। मन्त्रस्यास्य व्याख्यानावसरे वेङ्कटमाधवेनोक्तम् – "सुखस्य भावयिता वातः अस्माकम् उस्राः अभि वातु। ताः च उस्राः रसवतीः ओषधीः दन्तैः आच्छिन्दन्तु भक्षयन्तु । अपि च पयस्वतीः अस्मान् जीवयन्तीः अपः पिबन्तु। हे रूद्र! पादवते अन्नाय त्वं सुखम् उत्पादय इति प्रस्थापयन् आह।"[४४५] इति।

---

[४४३] ऋ. सं. १०/१६९/१. पदपाठः

[४४४] तदेव. सायणभाष्यम्।

[४४५] तदेव. वेङ्कटमाधवभाष्यम्

अतो दृश्यते यत् भाष्येष्वत्र ‘अवसाय’ इति सुबन्तपदरूपेणादाय मन्त्रार्थो व्याख्यातो, यस्यार्थः ‘अन्नाय’ इति। यद्यत्र पदपाठो न स्यात्तदा पूर्वोक्तमन्त्रवत् अत्रापि ‘अव-सू-ल्यप्’ इति विग्रहमादाय मन्त्रार्थः व्याख्यातुं शक्यते व्याख्याकृद्भिः। तथा कृते प्रकृतमन्त्रार्थः अस्मान् निकषा अज्ञात एव स्यात् । किञ्च पदपाठाभावे उभयत्रैव गतिसमासमादाय उत उभयत्रैव सुबन्तपदरूपेणादाय मन्त्रार्थो व्याख्यातुं शक्येत भाष्यकृद्भिः। तदापि वेदस्य प्रकृतमन्त्रार्थज्ञानं न सम्भवति। अत अत्र पदपाठकृता शाकल्येन अवग्रहेण द्वयोरेव मन्त्रयोः प्रकृतः अर्थः ज्ञापितः। प्रसङ्गेऽस्मिन् निरुक्तकृता यास्काचार्येण पदपाठप्रदर्शितं मतं समर्थितम्। तेन निरुक्तस्य प्रयोजनकथनावसरे विषयमिमं समुत्थायोच्यते – “अवसाय पद्वते रुद्रं मृळेति पद्वदवसं गावः पथ्यदनमवतेर्गत्यर्थस्यासो नामकरणस्तस्मान्नावगृह्णन्ति, अवसायाश्वानिति स्यतिरुपसृष्टो विमोचने तस्मादवगृह्णन्ति।”[४४६] इति।

वस्तुतस्तु वैदिकसंहितायाम् एकस्यैव पदस्य अर्थभेदः प्राधान्येन स्वरभेदात् ज्ञायते । परन्तु ‘अवसाय’ इत्यत्र द्वयोर्मन्त्रयोः स्वरविन्यासः समान एव । तस्मात् स्वरपार्थ्यकेनापि इदमर्थपार्थक्यं ज्ञातुं न शक्यते। तस्मादत्र द्वयोः पदयोः अर्थज्ञाने, तयोर्यथार्थतया अन्वयज्ञाने तथा सम्पूर्णमन्त्रार्थज्ञाने पदपाठ एव शरणमस्माभिः तथा व्याख्याकृद्भिरपि । यद्यपि स्वरपार्थक्येन पदानामर्थपार्थक्यं ज्ञायते तथापि अत्र समानस्वरविन्यासत्वात् मन्यते तदानीन्तनकाले सम्प्रदायेषु अनयोः द्वयोः मन्त्रयोः उच्चारणसमये विशिष्टता प्रचलितासीत् । तच्च विशिष्टत्वं ज्ञापनाय तथा अर्थज्ञार्थक्यं बोधनाय पदपाठकृता शाकल्येन पदपाठकरणकाले एकत्रावग्रहः प्रदत्तोऽन्यत्र च अवग्रहेण विना पदविभागः कृतः। वशिष्ठनारायणझामहाभागेन स्वकीये *A Linguistic Analysis of the Ṛgveda Padapātha* इत्याख्ये ग्रन्थे पदपाठकारस्य विशिष्टत्वविषये प्रसङ्गोऽयमुत्थापितः। तेनोच्यते - ‘And I think it is only

[४४६] नि. १/६/१७

the suprasegmental phoneme i.e. the *plus juncture* which alone can differentiate these words in meaning. Normally, this difference in meaning is done by the accent in the Vedic language. But when a minimal pair, like the one mentioned above is found in the RV it is likely that some such suprasegmental phoneme in addition to the accent might have existed in the language of the RV. The pdk seems to be very alert on such occasions. He inserts a pause by means of *avagraha* or *ḍanḍa* wherever it is due.'[४४७]

ऋग्वेदस्य प्रख्यातभाष्यकृता सायणाचार्येण ऋग्वेदसंहितायाः एकस्य मन्त्रस्य व्याख्यानावसरे तन्मत्रस्य व्याकरणदिशा पदानां साधुत्वविचारप्रसङ्गे पदपाठकारस्य शाकल्यस्य अवग्रहप्रदानमाहात्म्यमुल्लिखितम्। तत्र तेन शाकल्यप्रदर्शितं मतमङ्गीकृत्य अपरं मतं निराकृतम् । स मन्त्रोऽस्ति –

'त्री रोचना दिव्या धारयन्त हिरण्ययाः शुचयो धारपूताः।

अस्वप्नजो अनिमिषा अदब्धा उरुशंसा ऋजवे मर्त्याय।।'[४४८] इति।

अस्या ऋच ऋषिः गृत्समदः तत्पुत्रः कूर्मो वा, आदित्यश्च देवता । मन्त्रस्यास्य तृतीये पादे 'अस्वप्नजः' इति पदस्य व्याकरणदिशा साधुत्वनिर्णयावसरे सायणाचार्येण सह कस्यचिदपरस्य भाष्यकारस्य मतानैक्यं दृश्यते । तत्र च प्रामाणिकतया सायणाचार्येण पदपाठप्रदर्शितः पदविभागः उल्लिखितः। मन्त्रस्यास्य पदपाठो यथा -

'त्री । रोचना । दिव्या । धारयन्त । हिरण्ययाः । शुचयः । धारऽपूताः ।

अस्वप्नऽजः । अनिऽमिषाः । अदब्धाः । उरुऽशंसाः । ऋजवे । मर्त्याय ।।'[४४९] इति।

---

[४४७] *A Linguistic Analysis of the Ṛgveda Padapātha.* Introduction. p-13.

[४४८] ऋ. सं. २/२७/९

[४४९] तदेव. पदपाठः

पदपाठे दृश्यते यत् 'अस्वप्नजः' इति संहितागते पदे अवग्रहप्रदानेन समासः सूचितः पदकारेण। पदपाठत एव ज्ञायते यदत्र 'स्वप्नजः' इत्येकं समस्तं पदं न तु प्रत्ययान्तरूपम्। यतो हि पदपाठे शाकल्येन सर्वत्र अवग्रहेण समासः सूचित इति प्रागेवोक्तम्। अपि च 'स्वप्नजः' इत्यत्र नजिञ्-प्रत्ययान्ते सति पदपाठे जकारात् प्राक् अवग्रहो न दृश्यते। साधारणतया 'स्वप्+नजिञ्' इति व्युत्पत्त्या धातुप्रत्यययोर्मध्ये अवग्रहो न प्रदीयते। अस्य मन्त्रस्य व्याख्यानप्रसङ्गे उच्यते सायणाचार्येण – "त्री रोचना त्रीणि रोचनानि अग्न्यादीनि तेजांसि दिव्या दिव्यानि दिवि भवानि धारयन्त आदित्या अवास्थापयन्। किमर्थम्। ऋजवे ऋजीकाय स्तोत्राणां मर्त्याय मनुष्याय भोगसिद्ध्यर्थमिति यावत्। कीदृशा आदित्याः। हिरण्ययाः हिरण्मयाः हिरण्यालङ्कृतसर्वाङ्गाः। यद्वा हितरमणीयवेषाः। शुचयो दीप्यमानाः धारपूताः उदकधारया क्षालिता इव निर्मलाः। अस्वप्नजः असञ्जातस्वप्नाः॥ 'सुपां सुलुक्' इति जसः सुः॥ अपर आह। अस्वप्नजः अस्वपन्तो विगतनिद्राः॥ 'स्वपितृषोर्नजिञ्' इति नजिञ्प्रत्यय इति। तदेतत् पदकारस्यानभिमतम्॥ अनिमिषाः निमेषरहिताः। अदब्धाः असुरादिभिरहिंसिता उरुशंसाः उरुभिर्बहुभिः शंसनीयाः स्तोतव्याः। एवंगुणविशिष्टा अधारयन्तेत्यन्वयः"[४५०] इति।

मन्त्रस्यास्य भाष्ये सायणाचार्येण 'अपर आह...' इत्यादिवाक्येन उच्यते यत् अपरः कश्चिद् भाष्यकारः 'अस्वप्नजः' इति पदं स्वप्-धातोः नजिञ्प्रत्यान्तरूपेण स्वीकृतवान्, न तु 'स्वप्न-ज' इत्यादिसमासरूपेण। सायणाचार्यमतानुसारेण तदसाधु, तथा स्वीकृते सति पदपाठे 'अस्वप्नजः' इति पदे स्वप्नशब्दादुत्तरमवग्रहो न वर्तेत। किञ्च 'अस्वप्नजः' इति पदे अवग्रहाभावपक्षे तस्य समस्तपदत्वं न ज्ञायते। समासज्ञानाभावे च तस्य पदस्य अर्थज्ञानं यथार्थतया न सम्भवति। एकस्यैव पदस्यार्थज्ञानाभावे सम्पूर्णस्य मन्त्रस्य अर्थज्ञाने अनिष्टापत्तिर्दृश्यते। अतः अस्य मन्त्रस्यार्थज्ञाने पदपाठप्रदर्शितः पदविभाग एव साधुरिति

[४५०] ऋ. सं. २/२७/९ सायणभाष्यम्

सायणाचार्येण स्वीकृतम् । किञ्चात्र अवग्रहप्रदानेनैव संशयोऽयं निरस्त इति तु स्पष्टमेव । अवग्रहप्रदानाभावे सायणाचार्येण 'तदेतत् पदकारस्यानभिमतम्' इत्यादिवचनेन परमतमपास्य यत् स्वमतं दृढीकृतं तन्न कर्तुं शक्येत। अवग्रहेणैव सायणाचार्येण प्रत्ययान्तनिष्पन्नपक्षो निराकृतः। भाष्यकृता सायणाचार्येण स्वकीये भाष्ये 'अपर आह...'इत्यादिवाक्ये अपरपदेन कः परामृष्ट इति न ज्ञायते। यद्यपि तेन तन्मतं समुपस्थापितं परन्तु तन्नामात्र नोल्लिखितः। मन्ये तत्पूर्ववर्तिनः स्कन्दस्वाम्यादेः कस्यचन भाष्यकारस्य मतमत्र सायणाचार्येण निराकृतम्।

ऋग्वेदसंहितायाः पवमानमण्डले एको मन्त्रोऽस्ति –

"तमी॒मण्वीः॑ सम॒र्य आ गृ॒भ्यन्ति॒ योष॑णो॒ दश॑।

स्वसा॑रः॒ पार्यें दि॒वि ।।"[451] इति।

अस्य मन्त्रस्य वैश्वामित्रो मधुच्छन्दा ऋषिः, सोमश्च देवता। मन्त्रस्यास्य प्रथमे पादे 'समर्य आ' इति संहितांशे प्रथमतः 'समर्ये आ' इति पदविभागः कर्तुं शक्यते। अपि च 'समर्य आ' इत्यपि पदविभागः कर्तुं शक्यते। उभयथापि वैयाकरणदिशा साधुत्वनिर्णयः सम्भवः। एवमवस्थायां पदपाठत एव निश्चीयते यदत्र 'समर्ये आ' इति स्थिते 'एचोऽयवायावः'[452], 'लोपः शाकल्यस्य'[453] इति सूत्रद्वयेन 'समर्य आ' इति जातम्। सन्धिविषये संशये निरस्तेऽपि 'समर्ये' इत्यत्र एकमेव समस्तपदमुत समित्युपसर्गः अर्ये इति पृथक्पदम् इति संहितापाठतः केनाप्युपायेन ज्ञातुं न शक्यते । प्रथमतः मर्येण सह विद्यमानः इति समर्यः इति विग्रहे समस्तपदरूपेण पदमिदं स्वीकर्तुं शक्यते । द्वितीयतः सम् इति उपसर्गः अर्ये इति पृथक् सुबन्तपदमित्यपि स्वीकर्तुं शक्यते। एकपदत्वे स्वीकृते समग्रस्य पदस्य अधिकरणत्वेन क्रिययान्वयः

[451] ऋ. सं. ९/१/७

[452] पा. सू. ६/१/७८

[453] तदेव. ८/३/१९

सप्तमीविभक्तिकत्वात्, सन्धिकार्ये स्वीकृते अर्थात् समिति उपसर्गस्य विद्यमाने मन्त्रस्थेन ‘आगृभ्णन्ति’ इति तिङन्तेन सह तस्यान्वयः सम्भवति। एवं स्थितौ संहितापाठमादाय प्रकृतमन्त्रार्थज्ञाने कः पक्षः समाश्रयणीय इति न ज्ञातुं शक्यते। अतोऽत्र ‘समर्ये’ इत्यकेमेव समस्तपदमुत नेति पदपाठत एव ज्ञातुं शक्यते। यतो हि पदपाठे समस्तपदानि अवग्रहेण विशिष्टतया प्रदर्शितानि परिलक्ष्यन्ते । अस्य मन्त्रस्य पदपाठो यथा –

“तम् । ई॒म् । अण्वीः॑ । स॒ऽम॒र्ये॑ । आ । गृ॒भ्यन्ति॑ । योष॑णः । दश॑ ।

स्वसा॑रः । पार्ये॑ । दि॒वि ।। ”[४५४] इति।

पदपाठे दृश्यते यत् महर्षिणा शाकल्येन ‘समर्य आ’ इति संहितांशः ‘सऽमर्ये । आ’ इत्येवंप्रकारेण प्रदर्शितः। पदपाठे ‘सऽमर्ये’ इत्यत्रावग्रहप्रदानेन निश्चीयते यत् ‘समर्ये’ इत्येकमेव समस्तपदम्। मर्यो नाम मनुष्यः। मर्येण सह विद्यमानः इति समर्यः, तस्मिन्निति समर्ये। पदपाठे ‘सऽमर्ये’ इति अवग्रहविशिष्टं पदं परिलक्ष्य ‘समर्ये’ इत्यस्यार्थो भाष्यकृद्भिः ‘समनुष्ये’ इति प्रदर्शितः। अन्यथा पदपाठे नावग्रहे प्रदर्शिते समासज्ञानाभावे ‘सम्’ इत्यस्य अन्वयः तिङन्तेन सह कर्तुं शक्येत, अर्ये इत्यस्य प्रभौ इत्यर्थोऽपि कर्तुं शक्येत अर्यशब्दस्य प्रभुवाचित्वात्। ‘समर्ये’ इत्यत्र सन्धिवशात्  ‘सम् अर्ये’ इत्येवंप्रकारस्य पदविभागस्य स्वीकारे युक्तिर्हि ऋग्वेदसंहितायां बहुत्र समिति उपसर्गः तिङन्तेन सह सम्बन्धे सत्यपि व्यवधानेन तस्य प्रयोगो दृश्यते। अपि च ‘समर्ये’ इत्यस्य ‘सम्यक् प्रभौ’ इत्यर्थोऽपि कर्तुं शक्यते पदपाठाभावे, यतो हि ऋग्वेदसंहितायां बहुत्र समिति उपसर्गयुक्तस्य सुबन्तपदस्य प्रयोगोऽपि परिलक्ष्यते। परन्तु तादृशेषु स्थलेषु पदपाठकृता शाकल्येन अवग्रहेण समिति उपसर्गः पृथक् प्रदर्शितः। यथा ३/२/१८ इत्यत्र ‘सं सीमकृण्वन् > सम् । सीम् । अकृण्वन्’, ३/१०/१ इत्यत्र ‘सम॑ध्वरे > सम् ।

[४५४] ऋ. सं. ९/१/७ पदपाठः

अध्वरे’, ३/१/१९ इत्यत्र ‘संतरुत्रम् > सम्ऽतरुत्रम्’, ३/९/७ इत्यत्र ‘समिद्धम् > सम्ऽइद्धम्’ इत्यादयः। प्रकृते मन्त्रे तु शाकल्येन ‘सऽमर्ये’ इत्येवंप्रकारेण सकारादुत्तरमवग्रहप्रदानेनात्र बहुव्रीहिसमासः सूचितः, न तु समः उपसर्गत्वम्। अवग्रहं प्रदाय समासविज्ञापनेन पदपाठकृतात्र प्रकृतमन्त्रार्थज्ञाने तथा प्रकृतमन्त्रार्थव्याख्याने भाष्यकृद्भ्यः साहाय्यं विहितम् । तस्मात् परवर्तिनि काले मन्त्रस्यास्य व्याख्यानरचनाकाले व्याख्याकृतः बहुव्रीहिसमासमादायैव मन्त्रोऽयं व्याख्यातः। अस्य मन्त्रस्य व्याख्यानावसरे सायणाचार्येणोच्यते – “समर्ये समनुष्ये यज्ञे पार्ये दिवि सौत्येऽहनि योषणः स्त्रियः स्वसारः स्वयं सरन्त्यो दशसंख्याकाः अण्वीः अण्व्योऽङ्गुलयः। अग्रुवः अण्व्यः इत्यङ्गुलिनामसु पाठात्। तमीं तमेनं सोमम् आ गृभ्णन्ति आगृह्णन्ति।”[४५५] इति। भाष्यकृता वेङ्कटमाधवेनाप्युच्यते - “तम् एनम् अङ्गुलयः समनुष्ये यज्ञे आ गृह्णन्ति दश स्त्रियः स्वयं सरन्त्यः सौत्ये अह्नि।”[४५६] इति।

अतो भाष्येष्वपि दृश्यते यत् समर्ये समनुष्ये इति समासमादाय मन्त्रार्थो व्याख्यातो व्याख्याकारैः। न तु समिति उपसर्गः अर्ये इति सुबन्तपदमिति पदविभागमादाय। अतोऽवग्रहप्रदानेनात्र महर्षिणा शाकल्येन प्रकृतो मन्त्रार्थो विज्ञापितः इति सुस्पष्टमेव।

ऋग्वेदसंहितायाः प्रथममण्डलान्तर्गत एको मन्त्रो यथा –

“बृहत्स्वश्चन्द्रममवद्यदुक्थ्य१मकृण्वत भियसा रोहणं दिवः।

यन्मानुषप्रधना इन्द्रमूतयः स्वर्नृषाचो मरुतोऽमदन्ननु ।।”[४५७] इति।

मन्त्रस्यास्य सव्यः ऋषिः, इन्द्रश्च देवता। अस्याः ऋचः प्रथमपादे ‘स्वश्चन्द्रम्’ इति संहितांशे पदविभागमादाय संशयो वर्तते। संहितागते मन्त्रे ‘स्वश्चन्द्रम्’ इति दृष्ट्वा आपातदृष्ट्या ‘स्वः

[४५५] ऋ. सं. ९/१/७. सायणभाष्यम्

[४५६] तदेव. वेङ्कटमाधवभाष्यम्

[४५७] ऋ. सं. १/५२/९

चन्द्रम्' इति पदद्वयमस्तीति मन्यते। अनयोः पदयोर्मध्ये 'विसर्जनीयस्य सः',[४५८] 'स्तोः श्चुना श्चुः'[४५९] इत्यनयोः सूत्रयोर्योगेन 'स्वश्चन्द्रम्' इति जातम्। एवं पदविभागे स्वीकृते स्वपदेन यस्यान्वयो भवति चन्द्रपदेन तस्यान्वयो न सम्भवति तयोरसमानविभक्तिकत्वात्। 'स्वश्चन्द्रम्' इत्यत्र द्विपदत्वे स्वीकृते योऽर्थ आयाति ऐकपदत्वे न तथा। किञ्च मन्त्रार्थपर्यालोचनया दृश्यते 'स्वश्चन्द्रम्' इत्यत्र एकपदत्वमेवापेक्षितम्। आपातदृष्ट्या यद्यप्यस्यैकपदत्वं नावगम्यते परन्तु पदपाठतोऽस्य एकपदत्वं ज्ञायते। अस्या ऋचः पदपाठो यथा –

"बृहत्। स्वऽचन्द्रम्। अमऽवत्। यत्। उक्थ्यम्। अकृण्वत। भियसा। रोहणम्। दिवः। यत्। मानुषऽप्रधनाः। इन्द्रम्। ऊतयः। स्वः। नृऽसाचः। मरुतः। अमदन्। अनु॥"[४६०] इति।

पदपाठे दृश्यते यत् महर्षिणा शाकल्येन 'स्वश्चन्द्रम्' इति संहितांशः 'स्वऽचन्द्रम्' इत्येवंप्रकारेण प्रदर्शितः। अस्य संहितांशस्य पदपाठकरणकाले न केवलमेकपदत्वं प्रदर्शितमपि तु तेन अवग्रहेण समासो विज्ञापितः। पदपाठे अवग्रहं दृष्ट्वा ज्ञायते यत् स्वश्चन्द्रमित्येकमेव समस्तपदम्। तेन च प्रतीयते यत् 'स्वः चन्द्रम्' इत्यनयोः समासादनन्तरं 'ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे'[४६१] इति पाणिनीयसूत्रेण सुडागमे स्वश्चन्द्रमिति निष्पन्नम्। वस्तुतस्त्वत्र लौकिकसाहित्ये समासे सति 'स्वचन्द्रम्' इति रूपं स्यात्। एवं सति संशयावकाशो न समापतेत्। अतः पदपाठे प्रदत्तात् अवग्रहादेवात्र समासो ज्ञायते, समासज्ञानेन पदस्यास्य अर्थः परिस्फुटो भवति, पदार्थज्ञानादनन्तरं यथार्थतया मन्त्रार्थोऽपि ज्ञायते । अतोऽत्र महर्षिणा शाकल्येन पदपाठे अवग्रहप्रदानेन प्रकृतो मन्त्रार्थो ज्ञापितः। परवर्तिनो भाष्यकारा अपि 'स्वश्चन्द्रम्' इत्यत्र समस्तपदरूपेणादाय मन्त्रोऽयं व्याख्यातः। अस्य मन्त्रस्य सायणाचार्यप्रदर्शितं व्याख्यानं यथा

---

[४५८] पा. सू. ८/३/३४

[४५९] तदेव. ८/४/४०

[४६०] ऋ. सं. १/५२/९ पदपाठः

[४६१] पा. सू. ६/१/१५१

– "बृहत् बृहत्साम स्तोतारो यजमानाः भियसा बृत्रभयेन यत् यदा उक्थ्यम् उक्थ्यार्हं स्तोत्रयोग्यम् अकृण्वत अकुर्वन्। कीदृशं बृहत्साम। स्वश्चन्द्रं स्वकीयेन चन्द्रेणाह्लादकेन तेजसा युक्तम् अमवत्। अमति शत्रून् रुजत्यनेनेति अमो बलम्। तद्युक्तम्। दिवः स्वर्गस्य रोहणम् आरोहणहेतुभूतम्। एवंविधेन स्तोत्रेण बृत्राद्भीता इन्द्रमस्तोषतेत्यर्थः। यत् यदा मनुषप्रधनाः।...मनुष्यहितसंग्रामाः ऊतयः स्वः द्युलोकस्य रक्षितारः मरुतः नृषाचः प्राणरूपेण नॄन् सेवमाना भूत्वा इन्द्रमपि तेनैव रूपेण अनु अमदन् आनुपूर्व्येण हर्षं प्रापयन्। तदानीं स इन्द्रो बृत्रबधं प्रति उद्युक्तो बभूवेति शेषः।"[४६२] इति। मन्त्रस्यास्य व्याख्यानप्रसङ्गे स्कन्दस्वामिना पदस्यास्य 'स्वयमेव कान्तम्' इत्यर्थः प्रदर्शितः। ऋचोऽस्याः स्कन्दस्वामिकृतं भाष्यं हि – "बृहत् महत् परिमाणतः सारतो वा स्तुतिरूपम् स्वश्चन्दम् चन्द्रं चन्दतेः कान्तिकर्मणः। स्वयमेव कान्तम्। अमवत् अमशब्दः आत्मपर्यायः। तेन चात्र प्रयत्नो लक्ष्यते। आत्मवत् प्रयत्नवत्। महता प्रयत्नेनेत्यर्थः। यत् उक्थ्यं प्रशस्यम्। यच्छब्दश्रुतेस्तच्छब्दोऽध्याहार्यः। तत् अकृण्वत कृतवन्तोऽस्मदीया ऋत्विजः पुत्रपौत्रादयो वा। भियसा परिचर्यावैगुण्यभयेन। कीदृशम्। रोहणं दिवः द्युलोकारोहणसमर्थम्। साद्गुण्याद्यज्ञविधअवंसकैरसुरैः रक्षोभिर्वाऽन्तराऽवलोप्तुमशक्यमत्यन्तसगुणमित्यर्थः। कदा। उच्यते—यत् यदा मानुषप्रधनाः मनुष्यार्थो मानुषः। 'प्रधन इति संग्रामनाम (या ९,१३)। असुरैर्मेघैर्वा सह मनुष्यार्थः संग्रामो येषां ते मानुषप्रधनाः। इन्द्रम् इत्येतत्तु अम्त्येन अनुशब्देन सह सम्बन्धयितव्यम्। कीदृशाः ऊतयः अवितारः। रक्षितारो गन्तैरो वेत्यर्थः। स्वः सर्वपर्यायोऽयम्। सर्वे नृषाचः नृभिर्ये सेव्यन्ते सेवन्ते वा नॄन् वृष्टिप्रदानादिना ते नृषाचः। के ते। उच्यते। मरुतः। किं कृतवन्तः। उच्यते। अमदन् इन्द्रम् अनु तृतीयार्थे इत्ययमनुः कर्मप्रवचनीयः। सहार्थश्चात्र तृतीयार्थः सोमेन मत्ता इन्द्रेण सहेत्यर्थः"[४६३] इति। भाष्यकृता वेङ्कटमाधवेनापि एकपदत्वमादायैव मन्त्रस्यास्य भाष्यं

---

[४६२] ऋ. सं. १/५२/९ सायणभाष्यम्

[४६३] तदेव. स्कन्दस्वामिभाष्यम्

विरचितम्। तेनोच्यते – "बृहत् साम स्वयमेव कान्तं बलवत् यदा प्रशस्यम् अकुर्वत ईयेन स्तोतारः दिवः रोहणनिमित्तम्। यदा वा मनुष्यहितसंग्रामाः इन्द्रम् मरुतः स्वः दिवि स्थितं देवाः सन्तः मनुष्यान् सेवमानाः अनु अमदन्। उत्तरत्र सम्बन्धः"[४६४] इति।

अत्रोल्लेख्यं यत् अस्यैव मन्त्रस्य चतुर्थपादे 'स्वर्नृषाचो' इति पदं वर्तते। पदमिदं पूर्वोक्तपदवत् एकमेव समस्तपदमुत अत्र 'स्वः' इति पृथक्पदम्, 'नृषाचः' इति पृथक्पदमपि संहितापाठतः न ज्ञायते । पदपाठे दृश्यते शाकल्येन 'स्वर्नृषाचो' इति संहितांशः 'स्वः । नृऽसाचः' इत्येवंप्रकारेण पृथक्पदत्वेन प्रदर्शितः। अतः पदपाठतः निश्चीयते 'स्वश्चन्द्रम्' इत्यत्र समासोऽस्ति परन्तु 'स्वर्नृषाचो' इत्यत्र न। 'स्वर्नृषाचः' इत्यत्र 'स्वः', 'नृसाचः' इत्यनयोः पदयोर्मध्ये समासो नास्ति । परन्तु 'नृसाचः' इत्यत्र समासोऽस्ति इत्यपि पदपाठे अवग्रहेण प्रदर्शितम् । वैदिकसंहितायाः एकस्मिन्नेव मन्त्रे समानदृष्टे पदद्वये एकत्र समासो वर्तते एकत्र नेति पदपाठत एव ज्ञायते । पदपाठाभावे केवलं संहितापाठमादाय द्विविधः अर्थः कर्तुं न शक्यते । पदपाठाभावे उभयत्र समासत्वात् एकपदत्वेन स्वीकर्तुं शक्यते, पुनश्चोभयत्र सन्धिं विभज्य द्विपदत्वेनापि स्वीकर्तुं शक्यते । अतः पदपाठे प्रदर्शितं पदविभागमादाय परवर्तिभिः भाष्यकारैः चतुर्थे पादे पृथक्पदत्वं स्वीकृत्य भाष्याणि विरचितानि । पदपाठे अवग्रहप्रदानाभावे भाष्यकृद्भिरपि कुत्र समासो जातः, कुत्र सन्धिरिति सम्यग्रूपेण ज्ञात्वा प्रकृतमन्त्रार्थप्रकाशः असम्भवः स्यात् । तैः पदपाठं विना मन्त्रार्थो व्याख्यातश्चेत्तत्र मतानैक्यं भवेत् । अतः पदपाठकृता महर्षिणा शाकल्येनात्र प्रकृतमन्त्रार्थव्याख्याने भाष्यकृद्भ्यः साहाय्यं विहितम् ।

एवंप्रकारकः अपर एको मन्त्रो ऋक्संहिताया नवममण्डले परिलक्ष्यते । स मन्त्रो यथा –

"नू नो॑ र॒यिमुप॑ मास्व नृ॒वन्तं॑ पुना॒नो वा॒ताप्यं॑ वि॒श्वश्च॑न्द्रम्।

---

[४६४] ऋ. सं. १/५२/९. वेङ्कटमाधवभाष्यम्

प्र व॑न्दि॒तुरि॑न्दो ता॒र्यायुः॑ प्रा॒तर्म॒क्षू धि॒याव॑सु॒र्जग॑म्यात्॥”[४६५] इति।

अस्य मन्त्रस्य नोधा ऋषिः, पवमानश्च देवता। मन्त्रस्यास्य द्वितीये पादे ‘विश्वश्चन्द्रम्’ इति संहितांशे मन्त्रार्थकरणकाले संशयो दृश्यते । अत्रैकमेव समस्तपदं भवितुमर्हति उत पदद्वयम्, एकपदत्वे यथा तस्यान्वयो द्विपदत्वे तथान्वयः कर्तुं न शक्यते । संहितागतं मन्त्रं परिलक्ष्य आपातदृष्ट्यात्र पदद्वयमस्तीति मन्यते – विश्वः चन्द्रम् च। तयोः ‘विसर्जनीयस्य सः’,[४६६] ‘स्तोः श्चुना श्चुः’[४६७] इति सूत्रद्वयेन विसर्गस्य सकारादेशे, सकारस्य शकारादेशे च विश्वश्चन्द्रम् इति निष्पन्नम् । एवंप्रकारेण द्विपदत्वे स्वीकृते विश्वपदेन सोमपदस्यान्वयो भवति तयोः समानविभक्तिकत्वात्, चन्द्रमिति पदस्य च कर्मत्वेनान्वयो भवति। परन्त्वेवं कृते मन्त्रार्थस्य याथार्थ्यं न प्राप्यते । वस्तुतस्त्वत्र ‘विश्वश्चन्द्रम्’ इति एकपदत्वेनापेक्षितम्। तच्चैकपदत्वं केवलं पदपाठतो ज्ञायते। मन्त्रस्यास्य पदपाठो यथा –

“नु । नः॒ । र॒यिम् । उप॑ । मा॒स्व । नृ॒ऽवन्त॑म् । पु॒ना॒नः । वा॒ताप्य॑म् । वि॒श्वऽच॑न्द्रम् ।

प्र । व॒न्दि॒तुः । इ॒न्दो॒ इति॑ । ता॒रि॒ । आयुः॑ । प्रा॒तः । म॒क्षु । धि॒याऽव॑सुः । ज॒ग॒म्या॒त् ॥”[४६८] इति।

पदपाठे दृश्यते यत् महर्षिणा शाकल्येन ‘विश्वः चन्द्रम्’ इति पदद्वयात्मकत्वेन न विभज्य एकपदरूपेणैव प्रदर्शितम्। पदपाठकृता न केवलमस्यैकपदत्वं प्रदर्शितमपि तु पदमध्ये अवग्रहप्रदानेन तेन समासोऽपि सूचितः। पदपाठादेव ज्ञायते यत् विश्वश्चन्द्रम् इत्येकमेव समस्तं पदम् । तस्मान्मन्त्रार्थकरणकाले समग्रस्यैव पदस्य कर्मत्वेनान्वयः क्रियते, न पृथक्तया अन्वयः क्रियते । पदपाठतोऽस्यैकपदत्वज्ञानेन प्रतीयते यदत्र ‘विश्वः चन्द्रम्’ इत्यनयोः पदयोः समासे

---

[४६५] ऋ. सं. ९/९३/५

[४६६] पा. सू. ८/३/३४

[४६७] तदेव. ८/४/४०

[४६८] ऋ. सं. ९/९३/५ पदपाठः

कृते 'ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे'[४६९] इति पाणिनीयसूत्रेण सुडागमे विश्वश्चन्द्रमिति निष्पन्नम् । वस्तुतस्तु लौकिकसंस्कृते एवं समासे सति 'विश्वचन्द्रम्' इति पदं प्राप्यते, परन्तु वैदिकसंस्कृते विशिष्टेनेदं रूपं प्राप्यते । अयञ्च नियमविशेषः परवर्तिनि काले भगवता पाणिनिना सूत्रत्वेन ग्रन्थीकृतः। यद्यपि नियमोऽयं व्याकरणे प्राप्यते परन्तु तत्पूर्ववर्तिनि काले व्याकरणग्रन्थविद्यमानात् पूर्वं शाकल्येन पदपाठे इदं विज्ञाप्य प्रकृतमन्त्रार्थो विज्ञापितः। अत्र पदपाठप्रदर्शितमेकपदत्वमादाय परवर्तिभिः भाष्यकारैः मन्त्रोऽयं व्याख्यातः। मन्त्रस्यास्य व्याख्यानप्रसङ्गे सायणाचार्येणोच्यते – "हे सोम पुनानः पूयमानस्त्वं नः अस्मभ्यं नु क्षिप्रं नृवन्तं मनुष्यैर्युक्तम्। छान्दसं मतुपो वत्वम् । तादृशं रयिं धनम् उप मास्व उपनिर्मिमीष्व। उपकुर्वित्यर्थः। किंच विश्वचन्द्रं सर्वेषामाह्लादकं वाताप्यम् । उदकनामैतत् । उदकं च कुरु । तथा हे इन्दो सोम वन्दितुः तव स्तोतुः आयुः जीवनं प्र तारि त्वया वर्धितमस्तु । सोऽयं सोमः धियावसुः बुद्ध्या कर्मणा वा प्राप्तधनः प्रातः काले सवने वा मक्षु शीघ्रमस्मदीयं यज्ञं प्रति जगम्यात् आगच्छेत्।"[४७०] इति। अस्यैव मन्त्रस्य भाष्यरचनावसरे वेङ्कटमाधवेनापि एकपदत्वं स्वीकृत्य समस्तपदरूपेण पदमिदं मन्यमानेन व्याख्या विहिता । तेनोच्यते – "क्षिप्रम् अस्मभ्यम् रयिम् उप कुरु मनुष्यैर्युक्तम् पूयमानः उदकम् च सर्वेषां ह्लादकम् । प्र तारि वर्धितम् अस्तु इन्दो! स्तोतुः आयुः। प्रातः इति गतम्।"[४७१] इति।

अतो भाष्येभ्योऽपि प्रतीयते यत् अवग्रहेण महर्षिणा शाकल्येन मन्त्रस्यास्य प्रकृतमन्त्रार्थज्ञाने तथा व्याख्याने महानुपकारः साधितः।

ऋग्वेदसंहितायाः तृतीयमण्डले एको मन्त्रो वर्तते –

[४६९] पा. सू. ६/१/१५१

[४७०] ऋ. सं. ९/९३/५ सायणभाष्यम्

[४७१] तदेव. वेङ्कटमाधवभाष्यम्

"बृहन्त इद्भानवो भाऋजीकमग्निं सचन्त विद्युतो न शुक्राः।

गुहेव वृद्धं सदसि स्वे अन्तरपार ऊर्वे अमृतं दुहानाः ॥" इति।

मन्त्रस्यास्य विश्वामित्रः ऋषिः, अग्निश्च देवता । संहितागते मन्त्रे प्रथमपादे 'भाऋजीकम्' इति पदं दृश्यते । आपातदृष्ट्यात्र पदद्वयमस्तीति मन्यते, 'भाः' इति प्रथमाया बहुवचनम्, 'ऋजीकम्' इति द्वितीयायाः एकवचनञ्च । तयोश्च सन्धिवशात् विसर्गस्य लोपो जात इति मन्यते। 'भाः ऋजीकम्' इति स्थितौ 'भौभगोअघोअपूर्वस्य योऽशि'[४७२] इति सूत्रेण रोर्यादेशे 'लोपः शाकल्यस्य'[४७३] इत्यनेन सूत्रेण यकारस्य लोपे 'भा ऋजीकम्' इति प्राप्यते । तदा तथा पदविभागे स्वीकृते 'भा' इति पदस्य कर्तृपदेन सहान्वयः कर्तव्यः प्रथमाविभक्तिकत्वात् । 'ऋजीकमि'ति पदस्य कर्मत्वेन अन्वयः कर्तव्यः तत्र द्वितीयायाः विद्यमानात् । एवंप्रकारेण पृथक्पदत्वमादाय मन्त्रार्थे कृते यथार्थतया मन्त्रार्थो न स्फुटो भवति, किञ्च मन्त्रार्थस्यानिष्टापत्तिर्दृश्यते । अत्र मन्त्रार्थस्यानिष्टापत्तेर्निवारणाय पदपाठो द्रष्टव्यः। अस्य मन्त्रस्य पदपाठो यथा –

"बृहन्तः । इत् । भानवः । भाःऋजीकम् । अग्निम् । सचन्त । विऽद्युतः । न । शुक्राः॥

गुहाऽइव । वृद्धम् । सदसि । स्वे । अन्तः । अपारे । ऊर्वे । अमृतम् । दुहानाः ॥"[४७४] इति।

पदपाठे दृश्यते यत् महर्षिणा शाकल्येन पदविभागकाले 'भाऋजीकम्' इत्यस्य दण्डेनैकपदत्वं सूचितं, न केवलमेकपदत्वं सूचितमपि तु तेन अवग्रहप्रयोगेन तत्र समासोऽस्तीत्यपि विज्ञापितः। पदपाठतः अस्य समस्तपदत्वमेकपदत्वञ्चावगम्य एकेनैव

---

[४७२] पा. सू. ८/३/१७

[४७३] तदेव. ८/३/१९

[४७४] ऋ. सं. ३/१/१४ पदपाठः

कर्मत्वेन अन्वयेन मन्त्रार्थो व्याख्यातः चेत्तदा मन्त्रार्थस्य अनिष्टापत्तिर्दुरीभूता भवति। अतः परवर्तिभिः भाष्यकारैः पदपाठप्रदर्शितमेकपदत्वमादाय मन्त्रस्यास्य प्रकृतः अर्थः निरूपितः। मन्त्रस्यास्यार्थनिरुपणावसरे सायणाचार्येणोच्यते – "अपारे अगाधे ऊर्वे समुद्रे अन्तः मध्ये अमृतम् उदकं दुहानाः क्षरन्तः बृहन्त इद्धानवः महान्तः सूर्या एव शुक्राः दीप्यमानाः विद्युतो न विद्युत इव स्वे स्वकीये सदसि सदने अन्तरिक्षे गुहेव गुहायामिव बृद्धं प्रबृद्धं भाऋजीकं प्रभया दीप्यमानम् अग्निं सचन्त आश्रयन्ति।"[४७५] इति। अस्य मन्त्रस्य व्याख्यानरूपेण वेङ्कटमाधवेनोच्यते – "महान्त एव भानवः ऋजुदीप्तिम् अग्निम् सेवन्ते विद्युतः इव दीप्यमानाः शुक्रवर्णाः वा। पर्वतगुहायाम् इव अपाम् अन्तः स्वस्मिन् स्थाने प्रबृद्धम् अग्निम् पारवर्जिते ऊर्वाख्ये तस्मिन् उदकम् दुहानाः भानवः।"[४७६] इति।

आपातदृष्ट्या यद्यपि 'भाऋजीकम्' इति द्विपदात्मकं मन्यते परन्तु पदपाठे अवग्रहप्रदर्शनादनन्तरमस्य प्रकृतस्वरूपं ज्ञायते। पदस्यास्य प्रकृतस्वरूपज्ञानादनन्तरं समग्रस्य मन्त्रस्यापि अर्थः प्रकटितो भवति। अतः संशयाविष्टेऽस्मिन् स्थले शाकल्येन अवग्रहमाध्यमेन मन्त्रार्थकरणे साहाय्यं विहितमिति सुस्पष्टमेव।

ऋग्वेदसंहितायाः प्रथममण्डले एको मन्त्रो वर्तते –

"अ॒स्मा इदु॒ स्तोमं॒ सं हि॑नोमि॒ रथं॒ न तत्सि॑नाय ।

गिर॑श्च॒ गिर्वा॑हसे सुवृ॒क्तीन्द्रा॑य विश्वमि॒न्वं मेधि॑राय ।।"[४७७] इति।

मन्त्रस्यास्य चतुर्थे पादे 'विश्वमिन्वम्' इति संहितांशे मन्त्रार्थज्ञानाय संशयो दृश्यते । आपातदृष्ट्या 'विश्वम्', 'इन्वम्' इति पृथक् पदद्वयमस्तीति मन्यते । द्विपदत्वमादाय अन्वये कृते

---

४७५ ऋ. सं. ३/१/१४ सायणभाष्यम्

४७६ तदेव. वेङ्कटमाधवभाष्यम्

४७७ ऋ. सं. १/६१/४

मन्त्रस्य सम्यगर्थागमो न भवति। लौकिकरीत्या अनयोः पदयोः समासे कृते ‘विश्वेन्वम्’ इत्येवं रूपं भवितव्यम् । परन्तु ‘विश्वमिन्वम्’ इति संहितांशे विभक्तेः लोपाभावात् आपातदृष्ट्यात्र समासो न प्रतीयते । मन्त्रस्यास्य पदपाठत एवं ज्ञायते यदत्र ‘विश्वमिन्वम्’ इति संहितांशे एकमेव पदं वर्तते। अस्य मन्त्रस्य पदपाठे यथा –

“अ॒स्मै । इत् । ऊँ॒ इति॑ । स्तोम॑म् । सम् । हि॒नो॒मि॒ । रथ॑म् । न । तष्टा॑ऽइव । तत्ऽसि॑नाय।

गिरः॑ । च॒ । गिर्वा॑हसे । सु॒ऽवृ॒क्ति । इन्द्रा॑य । वि॒श्व॒म्ऽइ॒न्वम् । मेधि॑राय ॥”[४७८] इति।

पदपाठे दृश्यते यत् ‘विश्वमिन्वम्’ इति संहितांशः ‘विश्वम्ऽइन्वम्’ इत्येवंप्रकारेण महर्षिणा शाकल्येन प्रदर्शितः। पदपाठे शाकल्येन दण्डेन न केवलमस्य एकपदत्वं सूचितमपि तु तेन अवग्रहप्रदानेन समासोऽपि सूचितः। पदपाठे अवग्रहं परिलक्ष्य एव प्रतीयते यदत्र समासः जातः, अपि च छान्दसो विभक्तिलोपाभावो वर्तते। पदपाठं दृष्ट्वैव समस्तपदरूपेण पदमिदं स्वीकृत्य ‘विश्वमिन्वम्’ इत्यस्य ‘विश्वव्यापकम्’ इत्यर्थः प्रदर्शितः। समासे स्वीकृते च मन्त्रगतानां सर्वेषां पदानां सम्यक्तया अन्वयो सम्भवति। तेन च मन्त्रस्य यथार्थतया अर्थावबोधोऽपि भवति। तस्मात् सर्वैः भाष्यकारैरेवात्र पदपाठप्रदर्शितं समस्तपदत्वमादाय मन्त्रोऽयं व्याख्यातः। सायणाचार्येण मन्त्रस्यास्य व्याख्यानप्रसङ्गे उच्यते – “अस्मै एव इन्द्राय स्तोमं शस्त्ररूपं स्तोत्रं सं हिनोमि प्रेरयामि। तत्र दृष्टान्तः। तत्सिनाय। सिनम् इति अन्ननाम । ‘सिनमन्नं भवति सिनानि भूतानि’ (निरु. ५.५) इति यास्कः। तेन रथेन सिनमन्नं यस्य स तथोक्तः। तस्मै रथस्वामिने तष्टेव तष्टा तक्षको रथनिर्माता रथं न यथा रथं प्रेरयति तद्वत्। इव इत्येतत् पादपूरणम्। तथा गिर्वाहसे गीर्भिः स्तुतिभिरुह्यमानाय इन्द्राय गिरश्च शस्त्रसम्बन्धिनीः केवला ऋचश्च सुवृक्ति शोभनमावर्जनं

[४७८] ऋ. सं. १/६१/४ पदपाठः

यथा भवति तथा प्रेरयामि। तथा मेधिराय मेधाविने इन्द्राय विश्वमिन्वं विश्वव्यापकं विश्वैर्व्याप्तं सर्वोत्कृष्टं हविश्च सं हिनोमीत्यनुषङ्गः।।"[४७९] इति।

न केवलमुपर्युक्तेषु स्थलेषु अपि च ऋग्वेदसंहितायाः बहुषु मन्त्रेषु मन्त्राणां संहितापाठतः पदपाठकरणसमये पदमध्ये अवग्रहं प्रदाय समासज्ञापनेन अस्माकं सविधे वेदार्थो विज्ञापित इति वक्तुं शक्यते।

## ४.५ इतिकरणम्

ऋग्वेदस्य पदपाठकृता शाकल्येन वैदिकमन्त्राणां संहितापाठतः पदपाठकरणकाले बह्व्यः पद्धतयः समाश्रिताः। तासु पद्धतिषु इतिकरणमन्यतमम्। आद्युदात्तस्य इतिशब्दस्य प्रयोग इतिकरणनाम्नाभिधीयते। ऋग्वेदीयपदपाठे द्विविधम् इतिकरणं परिलक्ष्यते। आर्षम् इतिकरणम्, अनार्षम् इतिकरणञ्च। वैदिकमन्त्राणां संहितापाठे यत्र इतिशब्दस्य प्रयोगः प्राप्यते पदपाठकरणसमये तस्य यदा पुनः प्रदर्शनं भवति तद्भवति आर्षम्, संहितापाठस्य कर्तृत्वाभावात्।[४८०] यश्च इतिशब्दस्य प्रयोगः पदपाठे विविधानां पदानां प्रकृतस्वरूपविज्ञापनाय पदपाठकृता स्वयमेव कृतः तदनार्षमितिकरणं भवति तस्य सकर्तृत्वकत्वात्। इदञ्चानार्षमितिकरणमाचार्यशौनकेन *ऋग्वेदप्रातिशाख्ये* पदान्तबोधनाय उल्लिखितम्। तत्रोच्यते – "प्राक् चानार्षादितिकरणात् पदान्ताँस्तद्युक्तानाम्"[४८१] इति। अर्थात् पदपाठे अनार्षादितिकरणात् पूर्वं संहितापाठस्य पदान्तः इति बोध्यः। अत्रैव भाष्यकृता उवटेन 'अनार्षात्' इति पदस्य 'अवैदिकात्' इत्यर्थः प्रदर्शितः।[४८२] प्राधान्येन येषां पदानाम् *ऋग्वेदप्रातिशाख्य*ग्रन्थे आचार्यशौनकेन तथा*ष्टाध्यायी*ग्रन्थे पाणिनिना प्रगृह्यत्वं प्रतिपादितं तेषां

---

[४७९] ऋ. सं. १/६४/१ सायणभाष्यम्

[४८०] आर्षस्येतिकरणस्य उदाहरणं वर्तते – 'यः प्राणिति...' इत्यादिकः मन्त्रः। ऋ. सं. १०/१२५/४

[४८१] ऋ. प्रा. १/५८

[४८२] 'प्राक् पूर्व्येण अनार्षाद् इतिकरणात् अवैदिकात् इतिकरणात् पदान्ताञ्जानीयात्' इति। ऋ. प्रा. १/५८ उ.भा.

प्रगृह्यसंज्ञकानां पदानाम् इतिकरणं परिलक्ष्यते पदपाठे। महर्षिणा शाकल्येन वैदिकमन्त्राणां पदपाठे कुत्र कुत्र इतिकरणं कृतम् अधः प्रस्तूयते।

१.वैदिकमन्त्राणां संहितापाठे यत्र ईकारान्तस्य ऊकारान्तस्य एकारान्तस्य च द्विवचनान्तस्य प्रगृह्यसंज्ञकस्य पदस्य प्रयोगः परिलक्ष्यते पदपाठे तादृग्भ्यः पदेभ्यः आद्युदात्तस्य इतिशब्दस्य प्रयोगः परिलक्ष्यते। यथा - 'रोद॑सी > रोद॑सी इति॑' (ऋ. सं. १/५९/४), 'इन्द्रवायू > इन्द्रवायू इति॑' (१/२३/२) 'चमू > चमू इति' (ऋ. सं. ८/४/४), 'सचेथे > सचेथे इति' (ऋ. सं. ८/५/२)।

२. संहितापाठे अस्मे, युस्मे, त्वे इत्येतानि पदानि इतिकरणेन ज्ञाप्यन्ते। यथा - 'अस्मे > अस्मे इति' (ऋ. सं. ८/५/१५), 'त्वे > त्वे इति' (१/५९/१)।

३. सम्बोधनविभक्त्यन्तः ओदन्तः शब्दः इतिकरणेन पदपाठे प्रदर्श्यते। यथा – 'वायो > वायो इति॑।' (ऋ. सं. १/२३/१)।

४. ओदन्तो निपातः इतिकरणेन प्रदर्श्यते। यथा – 'यहो > यहो इति॑।' (ऋ. सं. १/२६/१०), 'अथो > अथो इति॑ ' (ऋ. सं. १/२८/६)>

५. अदसिति प्रातिपदिकस्य मकारान्तात् परस्थितम् ईकारान्तम् उकारान्तम् एकारान्तं च रूपम् इतिकरणेन प्रदर्श्यते। यथा – 'अमी > अमी इति' (ऋ. सं. १/२४/६)।

६. उ इति निपातः पदपाठे इतिकरणेन सह दीर्घानुनासिकेन प्रदर्श्यते। यथा – 'उ > ऊँ इति' (ऋ. सं. १/२६/५)।

७. संहितापाठे विद्यमानः रजातो विसर्गः[४८३] कुत्रचित कुत्रचित् इतिकरणेन पृथक् प्रदर्शितः। किञ्च पदपाठे सर्वाणि रजातविसर्गान्तानि पदानि न प्रदर्शितानि परन्तु यत्र यत्र रजातत्वं

[४८३] रजातः विसर्गः ऋग्वेदप्रातिशाख्ये रिफितनाम्नाभिहितः।

स्पष्टतया न परिलक्ष्यते उत तस्य विसर्गस्य रजातत्वविषये संशयो वर्तते तत्र तत्र इतिना प्रदर्शितम्। यथा – 'पुक्वमुन्तः पयः > पुक्वम् । अुन्तरिति॑ । पयः॑ ।' (ऋ. सं. १/६२/९),

८. कानिचन रिफितसंज्ञकानि पदानि इतिकरणेन सह पुनरुच्चार्य्यन्ते। यथा – 'स्वः > स्वरिति स्वः' (ऋ. सं. १/५२/१२), 'गुहाकः > गुहा अकरित्यकः' (ऋ. सं. २/१२/४)।

९. पदपाठे यत्र 'अवग्रहः', 'इति' द्वावेवापेक्षेते तत्र आदौ इतिकरणाद् अनन्तरम् अवग्रहः प्रदीयते। यथा – 'चित्रभानो > चित्रभानो इति॑ चित्रऽभानो' (ऋ. सं. १/२७/६), 'हरीइ॒व > हरी॑ इ॒वेति॒ हरी॑ऽइव' (ऋ. सं. १/२८/७)।

## ४.६ इतिकरणेन मन्त्रार्थज्ञापनम्

महर्षिणा शाकल्येन इतिकरणेन न केवलं प्रगृह्याणि पदानि तथा रिफितानि पदानि सूचितानि अपि तु तेन इतिकरणेन बहुत्र मन्त्रेषु शब्दार्थज्ञानं मन्त्रार्थव्याख्यानं च अनायाससाध्यं कृतम्। किञ्च इतिकरणेन कस्यचित् पदस्य प्रकृतस्वरूपं यथार्थतया ज्ञायते, येन स्वरूपज्ञानेनैव तस्य मन्त्रस्य स्पष्टतयार्थबोधः सम्भवति । तादृशानि कानिचनोदाहरणानि अधः प्रस्तूयन्ते। ऋक्संहितायाः द्वितीयमण्डलस्य तृतीयसूक्तगतः एको मन्त्रो यथा –

''देवं ब॒र्हिर्वर्धमानं सु॒वीरं॑ स्ती॒र्णं रा॒ये सु॒भरं॒ वेद्य॒स्याम्।

घृ॒तेना॒क्तं वस॑वः सीदते॒दं विश्वे॑ देवा आदित्या य॒ज्ञिया॑सः॥''[४८४] इति।

अत्र संहितागतस्य मन्त्रस्य प्रथमपादे 'वेद्यस्याम्' इत्यत्र आपातदृष्ट्या 'वेदी' 'अस्याम्' इति पदद्वयमस्तीति अवगम्यते। 'वेदी' इति प्रथमान्तम्, 'अस्याम्' इति सप्तम्यन्तञ्च। अनयोः च

[४८४] ऋ. सं. २/३/४

पदयोः 'इको यणचि'[४८५] इति सूत्रेण ईकारस्थाने यकारादेशे 'वेद्यस्याम्' इति निष्पन्नम्। अतः असमानविभक्तिकत्वात् अनयोः पदयोः एकत्रान्वयो न सम्भवति। पदपाठं विना अस्य मन्त्रस्यार्थप्रकाशकाले 'वेदी' इति प्रथमान्तं पदम् 'अस्याम्' इति सप्तम्यन्तं पदम् आदाय मन्त्रार्थः कर्तव्यः। पदद्वयस्य पृथक् अन्वयं कृत्वा मन्त्रार्थे कृते अनिष्टापत्तिर्भवति। परन्तु पदपाठे अस्य इतिकरणेन संशयोऽयं दूरीभवति। मन्त्रस्यास्य पदपाठो यथा –

"देवं । बर्हिः । वर्धमानम् । सुऽवीरम् । स्तीर्णम् । राये। सुऽभरम्। वेदी इति । अस्याम् ।

घृतेन । अक्तम् । वसवः । सीदत । इदम् । विश्वे । देवाः । आदित्याः । यज्ञियासः ।।"[४८६] इति।

अत्र दृश्यते यत् 'वेद्यस्याम्' इति संहितांशस्य 'वेदी इति। अस्याम् ।' एवं पदपाठः प्रदर्शितः शाकल्येन। 'वेदी इति' इत्यत्र इतिकरणं दृष्ट्वा 'वेदी' इत्यस्य प्रगृह्यत्वमवगम्यते पदपाठात्, यतो हि पदपाठे शाकल्येन इतिकरणेन सर्वत्र प्रगृह्यसंज्ञकानि पदानि सूचितानि । यतो हि 'वेदी' इति पदं प्रथमैकवचनस्य, तस्मात् 'ईदूदेद्विवचनं प्रगृह्यम्'[४८७] इति सूत्रेण अत्र प्रगृह्यसंज्ञा न प्राप्नोति । तदा अन्येषाञ्च प्रगृह्यसंज्ञाविधायकसूत्राणां प्रसक्त्यभावात् 'ईदूतौ च सप्तम्यर्थे'[४८८] इति सूत्रेणात्र प्रगृह्यत्वमवगम्यते । 'ईदूतौ च सप्तम्यर्थे' इति सूत्रस्याशयो हि सप्तम्यर्थे वर्तमानः ईदन्त ऊदन्तश्च शब्दः प्रगृह्यसंज्ञको भवति । तस्मादुच्यते भट्टोजिदीक्षितेन वैयाकरणसिद्धान्तकौमुद्याम् – "सप्तम्यर्थे पर्यवसन्नमीदूदन्तं प्रगृह्यं स्यात्"[४८९] इति। यतो हि 'ईदूतौ च सप्तम्यर्थे' इति सूत्रेण प्रगृह्यत्वं तस्मात् 'वेदी' इत्यत्र सप्तम्यर्थे प्रथमा विभक्तिर्वर्तते इति अवगम्यते। पदपाठतः अस्य सप्तम्यर्थत्वमादाय 'वेद्याम् अस्याम्' इति मनसि निधाय

---

[४८५] पा. सू. ६/१/७७

[४८६] ऋ. सं. २/३/४ पदपाठः

[४८७] पा. सू. १/१/११

[४८८] तदेव. १/१/१९

[४८९] वैयाकरणसिद्धान्तकौमुदी १/१/१९

मन्त्रार्थः क्रियते। तेन 'वेद्यस्याम्' इति संहितांशे 'वेदी अस्याम्' इति पदद्वयस्य असमानविभक्तिकत्वेऽपि समानाधिकरणत्वेन अन्वयं स्वीकृत्य मन्त्रार्थे कृते अनिष्टापत्तिर्न भवति। शाकल्यकृतपदपाठमादाय सर्वे भाष्यकारा अपि 'वेदी' इत्यत्र सप्तमीविभक्तिं स्वीकृत्य मन्त्रार्थव्याख्यानं कृतवन्तः। मन्त्रस्यास्य अर्थः सायणाचार्येण एवं प्रदर्शितः – ''हे वर्हिः देव एतदभिमानिन्नग्ने वर्धमानं सुवीरं शोभनवीरसम्पादकं सुभरं सुपूर्णं स्तीर्णम् अस्मदीयैर्ऋत्विग्भिरास्तृतं भव। किमर्थम्। राये धनाय। अस्याम् वेदी वेद्याम् ।। सप्तम्यर्थे प्रगृह्यसंज्ञा संहितायां यणादेशश्छान्दसः।। घृतेन आज्येन अक्तम् इदं स्निग्धं बर्हिः सीदत। के। हे वसवः एतन्नामकाः। हे विश्वे सर्वे देवाः। हे आदित्याः। यज्ञियासः यज्ञार्हास्ते यूयंमिदं बर्हिर्निषीदत अस्मिन् बर्हिषि निषीदतेत्यर्थः।''[४९०] इति। वेङ्कटमाधवेनास्य मन्त्रस्य व्याख्यानप्रसङ्गे उच्यते – "हे देव! बर्हिः! त्वं पुनःपुनः लवनेऽपि वर्धमानं शोभनदेववीरम् आसीः। सुष्ठु सम्भ्रिमाणम् अस्याम् वेद्याम् स्तीर्णम् राये घृतेन अक्तम् इदम् बर्हिः हे वसवः! आसीदत, विश्वे देवाः! रुद्राः! यूयम् आदित्याः! च यज्ञार्हाः।।" इति।

वस्तुतस्त्वत्र संहितापाठे 'वेद्यस्याम्' इत्यंशे सन्धिकार्यं दृष्ट्वा केनाप्युपायेन प्रगृह्यत्वं नावगम्यते। यतो हि साधारणतया प्रगृह्यत्वे सति सन्धिकार्यं न परिलक्ष्यते। परन्तु अस्मिन् मन्त्रे छान्दसं सन्धिकार्यं जातम्। अतः छान्दसस्य सन्धिकार्यस्य ज्ञानं पदपाठाद् विना केनाप्युपायेन न सम्भवति। तस्य छान्दससन्धिकार्यस्य ज्ञानाभावे पदानां यथार्थतया अन्वयो न कर्तुं शक्यते। यथार्थरूपेण पदानामन्वयज्ञानाभावे समुचितो मन्त्रार्थो सम्यग् न प्रतिभाति। अस्य छान्दससन्धिकार्यस्योल्लेखः भाष्यकृता सायणाचार्येण स्वकीयभाष्ये कृतः। अत्र छान्दसरीत्या 'सुपां सुलुक्पूर्वसवर्णाऽच्छेयाडाड्यायाजालः'[४९१] इति सूत्रेण सप्तमीविभक्तेः स्थाने

[४९०] ऋ. सं. २/३/४ सायणभाष्यम्

[४९१] पा. सू. ७/१/३९

प्रथमाविभक्तिर्जाता। अतः स्पष्टतयात्र प्रतिफलितं यत् पदपाठकृता शाकल्येन इतिकरणेनात्र प्रकृतो मन्त्रार्थो विज्ञापितः।

एवंप्रकारको नवममण्डलान्तर्गतः एको मन्त्रो यथा –

"मदच्युत्क्षेति सादने सिन्धोरूर्मा विपश्चित्।

सोमो गौरी अधि श्रितः॥"[492] इति।

संहितागतस्यास्य मन्त्रस्य तुरीये पादे 'सोमो गौरी' इत्यंशे द्वयोः पदयोः प्रथमाविभक्तिरिति अवगम्यते। 'सोमः' इति पुंसि प्रथमैकवचनम्, 'गौरी' इति स्त्रियां प्रथमैकवचनम्। उभयत्र प्रथमाविभक्तिं दृष्ट्वा उभयोर्मध्ये समानाधिकरण्येन अन्वयः कर्तुं शक्यते समानविभक्तिकत्वात्। तथा कृते मन्त्रार्थो भवति - मदच्युत् मदकरस्य च्यवयिता सोमः गौरी सादने स्थाने क्षेति वसति इति। एवंप्रकारमन्वयं स्वीकृत्य मन्त्रार्थकरणे सोमपदेन यो बोध्यः गौरीपदेन च तस्यैव बोधो भवति, तयोः विशेष्यविशेषणभावसम्बन्धेन अन्वयवशात्। अनेन मन्त्रार्थस्य अनिष्टापत्तिर्भवति। वस्तुतः अत्र उभयोर्मध्ये विशेष्यविशेषणभावसम्बन्धः न कर्तव्यः, तयोर्भिन्नलिङ्गकत्वात्। अतः पदपाठाद् विनात्र केवलं संहितागतं मन्त्रमादाय यथार्थरूपेण मन्त्रार्थः कर्तुं न शक्यते। मन्त्रस्यास्य पदपाठो यथा –

"मदच्युत् । क्षेति । सदने । सिन्धोः । ऊर्मा । विपःऽचित् ।

सोमः । गौरी इति । अधि । श्रितः ।"[493] इति।

---

[492] ऋ. सं. ९/१२/३

[493] तदेव. पदपाठः

मन्त्रस्यास्य पदपाठे दृश्यते यत् गौरीपदं 'गौरी इति' इत्येवंप्रकारेण इतिकरणेन प्रदर्शितम्। पदपाठे संहितागतगौरीपदस्य इतिकरणं दृष्ट्वा 'गौरी'पदस्य प्रगृह्यत्वमवगम्यते, पूर्वमेवालोचितं यत् पदपाठे प्रगृह्यसंज्ञकानि पदानि इतिना प्रदर्शितानि। प्रकृतेऽस्मिन् मन्त्रांशे 'गौरी' इति पदं द्विवचनान्तं भवितुं नार्हति, गौरी इति प्रातिपदिकस्य सप्तसु विभक्तिषु कुत्रापि तादृशस्य रूपस्य सद्भावाभावात्। तस्माद् 'ईदूदेद्द्विवचनं प्रगृह्यम्'[४९४] इति सूत्रेण अस्य प्रगृह्यसंज्ञा न भवति। 'अदसो मात्', 'शे', 'निपात एकाजनाङ्', 'सम्बुद्धौ शाकल्यस्येतावनार्षे', 'उञः ऊँ'[४९५] इत्येतेषां सूत्राणाञ्च प्रसक्त्यभावात् 'ईदूतौ च सप्तम्यर्थे' इति सूत्रेण अस्य प्रगृह्यसंज्ञा जातेति ज्ञायते। अस्य सूत्रस्याशयः प्रागेव प्रतिपादितः। 'ईदूतौ च सप्तम्यर्थे' इति सूत्रेण प्रगृह्यसंज्ञावगमात् 'गौरी' इत्यत्र रकारोत्तरः ईकारः सप्तम्यर्थे प्रयुक्तः इति ज्ञायते । यतो ह्यत्र सप्तम्यर्थे प्रयुक्तः ईकारस्तस्मात् गौरी इत्यस्य गौर्य्याम् इत्येवमर्थः कर्तव्यः। पदपाठतः 'गौरी' इत्यस्य सप्तम्यन्तत्वम् अवगम्य पदानामन्वये कृते तदा 'सोमः' 'गौरी' इति पदद्वयस्य सम्यग् अन्वयोऽपि भवति – 'सोमः गौर्य्याम् अधिश्रितः' इति। एवमन्वयेन च पदानां यथार्थतयार्थज्ञानं भवति। अनेन प्रकृतमन्त्रार्थस्य अनिष्टापत्तिरपि दूरीभवति। अतः पदपाठस्थम् इतिकरणं दृष्ट्वा भाष्यकाराः अपि 'गौरी'इत्यस्य गौर्य्याम् इत्यर्थमादाय मन्त्रव्याख्यानं कृतवन्तः। सायणाचार्येण अस्य मन्त्रस्य अर्थः प्रदर्शितः – "मदच्युत् मदकरस्य रसस्य च्यावयिता सोमः सादने। संहितायां दीर्घश्छान्दसः। स्थाने क्षेति निवसति। एतदेव विवृणोति। सिन्धोः नद्याः ऊर्मा ऊर्मौ तरङ्गे। वसतीवरीष्वित्यर्थः। विपश्चित् विद्वान् सोमः गौरी अधि गौर्य्यामधि। अधीति सप्तम्यर्थानुवादः। माध्यमिकायां वाचि। गौरी गान्धर्वी इति वाङ्नामसु पाठात्। श्रितः निवसति।"[४९६] इति। अस्य वेङ्कटमाधवकृतं व्याख्यानं यथा – "मादकस्य रसस्य च्यावयिता निवसति स्थाने । तदेवाह

[४९४] पा. सू. १/१/११

[४९५] तदेव. १/१/१२-१७

[४९६] ऋ. सं. ९/१२/३ सायणभाष्यम्

सिन्धोः ऊर्मौ वसतीवरीषु विपश्चित् सोमः गौर्याम् अधि श्रितः। गौरी इति माध्यमिकां वाचमाह (तु. निघ १,११; ५,५)।”[४९७] इति।

अतो भाष्याण्यपि पर्यालोच्य दृश्यते यदत्र ‘गौरी’ इत्यस्य ‘गौर्याम्’ इत्यर्थ एव यथार्थः। वस्तुतस्तु अत्र सप्तमीविभक्तेः स्थाने छान्दसः प्रथमाविभक्तेरादेशः। अयञ्च छान्दसो नियमविशेषः अष्टाध्यायीरचयित्रा पाणिनिना स्वकीये ग्रन्थे ‘सुपां सुलुक्पूर्वसवर्णाऽच्छेयाडाड्यायाजालः’[४९८] इति सूत्रेण प्रतिपादितः। पदपाठाभावे मन्त्रेऽस्मिन् छान्दसनियमज्ञानाभावात् प्रकृतमन्त्रार्थः अस्माकं सविधे अज्ञातो भवेत्। अतः पदपाठ एवात्र इतिकरणेनादौ पदस्वरूपं यथार्थरूपेण विज्ञाप्य मन्त्रार्थः सूचितः, तेन च मन्त्रार्थव्याख्याने महानुपकारः साधितः।

एवं प्रथममण्डलान्तर्गतः अपरो मन्त्रो यथा –

“म॒ही अत्र॑ महि॒ना वार॑मृण्वथोऽरे॒णव॒स्तुज॒ आ सद्म॑न्धेनवः᳚ ।

स्वर॑न्ति॒ ता उ॑प॒रता॑ति॒ सूर्य॒मा नि॒म्रुच॑ उ॒षस॑स्तक्व॒वीरि॑व ।।”[४९९] इति।

मन्त्रस्यास्य संहितापाठे आपातदृष्ट्या द्वे प्रथमान्ते पदे दृश्येते ‘मही’ इति प्रथमैकवचनम्, ‘धेनवः’ इति प्रथमायाः बहुवचनञ्च। संहितापाठमादाय मन्त्रार्थकरणे असमानलिङ्गकत्वात् तयोः अन्वयः कर्तुं न शक्यते। द्वे पृथग्रूपेण स्वीकृत्य मन्त्रार्थः क्रियते चेत्तदपि न सम्भवति, ‘स्वरन्ति’ इति एकस्यैव बहुवचनविभक्त्यन्तस्य तिङन्तस्य विद्यमानत्वात् । एवमवस्थायां

[४९७] ऋ. सं. ९/१२/३ वेङ्कटमाधवभाष्यम्

[४९८] पा. सू. ७/१/३९

[४९९] ऋ. सं १/१५१/५

पदपाठत एव मन्त्रस्यास्य पदानां प्रकृतस्वरूपं ज्ञायते, पदानां प्रकृतस्वरूपज्ञानेन च मन्त्रार्थः स्पष्टीभवति। मन्त्रस्यास्य पदपाठो यथा -

"मही इति॑ । अत्र॑ । महि॒ना । वार॑म् । कृ॒ण्व॒थः । अ॒रे॒णवः॑ । तुजः॑ । आ । सद्म॑न् । धे॒नवः॑।

स्वर॑न्ति । ताः । उ॒प॒रऽता॑ति । सूर्य॑म् । आ । नि॒ऽम्रुचः॑ । उ॒षसः॑ । त॒क्व॒वीःऽइ॑व ॥"[५००] इति।

मन्त्रस्यास्य पदपाठे दृश्यते यत् 'मही' इति पदं 'मही इति' इत्येवंप्रकारेण इतिना प्रदर्शितम् । पदपाठे संहितागतमहीपदस्य इतिकरणं दृष्ट्वा 'मही'पदस्य प्रगृह्यत्वमवगम्यते, पूर्वमेवालोचितं यत् पदपाठे प्रगृह्यसंज्ञकानि पदानि आद्युदात्तेन इतिना प्रदर्शितानि । प्रकृतेऽस्मिन् मन्त्रांशे 'मही' इति पदं द्विवचनान्तं भवितुं नार्हति, 'मही' इति प्रातिपदिकस्य सप्तसु विभक्तिषु द्विवचने कुत्रापि तादृशस्य रूपस्य विद्यमानाभावात् । तस्माद् 'ईदूदेद्द्विवचनं प्रगृह्यम्'[५०१] इति सूत्रेण अस्य प्रगृह्यसंज्ञा न भवति । 'अदसो मात्', 'शे', 'निपात एकाजनाङ्', 'सम्बुद्धौ शाकल्यस्येतावनार्षे', 'उञः ऊँ'[५०२] इत्येतेषां सूत्राणाञ्च प्रसक्त्यभावात् 'ईदूतौ च सप्तम्यर्थे' इति सूत्रेण अस्य प्रगृह्यसंज्ञा जातेति ज्ञायते । अस्य सूत्रस्याशयः प्रागेव प्रतिपादितः। 'ईदूतौ च सप्तम्यर्थे' इति सूत्रेण प्रगृह्यसंज्ञावगमात् 'मही' इत्यत्र हकारोत्तरः ईकारः सप्तम्यर्थे प्रयुक्तः इति ज्ञायते। यतो ह्यत्र सप्तम्यर्थे प्रयुक्तः ईकारस्तस्मात् 'मही' इत्यस्य 'मह्याम्' इत्येवमर्थः कर्तव्यः। पदपाठतः 'मही' इत्यस्य सप्तम्यन्तत्वम् अवगम्य पदानामन्वये कृते तदा 'मही' 'धेनवः' इति पदद्वयस्य सम्यग् अन्वयोऽपि भवति – 'धेनवः मह्यां स्वरन्ति' इति। एवमन्वयेन च पदानां यथार्थतयार्थज्ञानं भवति। अनेन प्रकृतमन्त्रार्थस्य अनिष्टापत्तिरपि

---

[५००] ऋ. सं १/१५१/५ पदपाठः

[५०१] पा. सू. १/१/११

[५०२] तदेव. १/१/१२-१७

दूरीभवति। अतः पदपाठस्थम् इतिकरणं दृष्ट्वा भाष्यकाराः अपि ‘मही ’इत्यस्य मह्याम् इत्यर्थमादाय मन्त्रव्याख्यानं कृतवन्तः। सायणाचार्येण अस्य मन्त्रस्य अर्थः प्रदर्शितः – “ हे मित्रावरुणौ युवां मही महत्यां ।। सप्तम्येकवचने पूर्वसवर्णदीर्घः। ‘ईदूतौ च सप्तम्यर्थे’ इति प्रगृह्यता ।। अत्र अस्यां पृथिव्यां महिना महत्त्वेन या धेनूः वारं वरणीयं प्रदेशम् ऋण्वथः गमयथः ।। अन्तर्भावितण्यर्थोऽयम् ।। गमनादिव्यवहारस्य तयोरधीनत्वात् द्यावापृथिव्योः अभिमानिदेवत्वाच्च मित्रावरुणयोः। ता एताः धेनवः गावः सायंकाले युष्यन्महत्त्वेन अरेणवः अनवद्याः तस्कराद्यनपहारेण अनष्टा वा तुजः क्षीराणां प्रदात्र्यः।। तुजतिः दानकर्मा ।। सद्मन् सद्मनि गोष्ठे आ आश्रिता अगच्छन्ति वा ।। ...ताः एवंकारिता धेनवः उपरताति उपरतातौ ।। सप्तम्या लुक् ।। मेघानां विस्तारवति अन्तरिक्षे मेघाच्छन्ने सति सूर्यं सर्वस्य प्रसवितारं सुवीर्यं शोभनसामर्थ्यं वा । ‘सुवीर्यो मर्या यथा गोपायत इति तत्सूर्यस्य सूर्यत्वम्’ इति श्रुत्यन्तरात्। आदित्यमभिलक्ष्य स्वरन्ति शब्दयन्ति सुखसञ्चाराय ।। ‘स्वृ शब्दोपतापयोः’। भौवादिकः ।। कस्मिन् काले इति तदुच्यते । निम्रुचः उषसः। सर्वेष्वपि सायंकालेषु उषःकालेषु च । तत्र दृष्टान्तः। तक्ववीरिव । तक्वा स्तेनः । तस्य वेता गन्ता मनुष्यः । स यथा क्रोशति तद्वत् । एवं निरुद्धानां गवां सुखचारः युस्मदायत्तः इति तयोः स्तुतिः।।”[५०३] इति।

अत्र दृश्यते यत् सायणाचार्येण ‘मही’ इत्यस्य ‘अस्यां पृथिव्याम्’ इत्येवमर्थो निर्दिष्टः। अतोऽत्र महर्षिणा शाकल्येन इतिकरणेन पदस्य प्रकृतस्वरूपं विज्ञाप्य प्रकृतमन्त्रार्थज्ञाने तथा मन्त्रार्थकरणे विशिष्टं साहाय्यं विहितम्।

अस्यैव प्रबन्धस्य तृतीयाध्यान्तर्गते अनानुपूर्विकसंहिताख्ये उपाध्याये आलोचितं यत् संहितापाठे कानिचन समस्तपदानि वर्तन्ते येषां पूर्वोत्तरपदे पृथक् वर्तेते। तादृशानि

---

[५०३] ऋ. सं १/१५१/५ सायणभाष्यम्

पृथगवस्थितानि अनानुपूर्विकसंहितागतानि पदानि पदपाठे एकीकृत्य प्रदर्श्यन्ते, येन तेषां प्रकृतस्वरूपं ज्ञात्वा मन्त्रस्य यथार्थतया अर्थावबोधो भवति। ऋग्वेदसंहितायाः कुत्रचित् कुत्रचित् अनानुपूर्विकसंहिता परिलक्ष्यते यत्र एकस्यैव समस्तपदस्य पृथगवस्थिते पूर्वोत्तरपदे पदपाठे न एकीकृत्य प्रदर्शिते शाकल्येन। परन्तु तत्र महर्षिणा शाकल्येन इतिकरणेन अनानुपूर्विकसंहिता विज्ञापिता। ऋग्वेदसंहितायाः द्वितीयमण्डलान्तर्गत एको मन्त्रो यथा –

"द्यावा॑ चिदस्मै पृथि॒वी न॑मे॒ते॒ शुष्मा॑च्चिदस्य॒ पर्व॑ता भयन्ते।

यः सो॑म॒पा नि॑चि॒तो वज्र॑बाहुर्यो वज्र॑हस्तः॒ स ज॑नास॒ इन्द्रः॑ ॥"[५०४] इति।

मन्त्रस्यास्य प्रथमे पादे द्यावा॑ चिदस्मै पृथि॒वी इत्यंशे 'द्यावा' 'पृथिवी' इत्यनयोः पदयोर्मध्ये पदान्तरस्य विद्यमान्तवात् समासो न ज्ञायते। समासज्ञानाभावे पृथगन्वयेन मन्त्रार्थस्य अनिष्टापत्तिर्दृश्यते। ऋग्वेदसंहितायामेवं बहुत्र अनानुपूर्विकसंहिता दृश्यते। परन्त्वत्र अनानुपूर्विकसंहिता अस्ति उत न पदपाठाद् विना तन्न ज्ञायते। तज्ज्ञानाय अस्य मन्त्रस्य पदपाठ एव शरणम्। मन्त्रस्यास्य पदपाठो यथा –

"द्यावा॑ । चि॒त् । अ॒स्मै॒ । पृ॒थि॒वी इति॑ । न॒मे॒ते॒ इति॑ । शुष्मा॑त् । चि॒त् । अ॒स्य॒ । पर्व॑ताः । भ॒य॒न्ते॒ ।

यः । सो॒म॒ऽपाः । नि॒ऽचि॒तः । वज्र॑ऽबाहुः । यः । वज्र॑ऽहस्तः । सः । ज॒ना॒सः॒ । इन्द्रः॑ ॥"[५०५] इति।

अत्र दृश्यते यत् 'द्यावा' 'पृथिवी' इत्यनयोः अनानुपूर्विकसंहितात्वं पदपाठे न प्रदर्शितम्। परन्तु 'पृथिवी इति' इत्यत्र इतिकरणेन अस्य प्रगृह्यत्वं ज्ञायन्ते। तेन च द्यावापृथिवी इत्यस्य समासो

---

[५०४] ऋ. सं. २/१२/१३

[५०५] तदेव. पदपाठः

ज्ञायते । पदपाठे प्रगृह्यपदानि इतिकरणेन प्रदर्श्यन्ते इति पूर्वमेवालोचितम्। अत्र 'ईदूदेद्द्विवचनं प्रगृह्यम्'[५०६] इति नियमेन प्रगृह्यसंज्ञकत्वात् 'द्यावापृथिवी' इत्येकमेव पदमित्यवगम्यते। अस्यैकपदत्वावगमाच्च पदानां सम्यक्तया अन्वयः सम्भवति। तेन च 'नमेते' इति क्रियया सह पदानां सम्यगर्थावबोधोऽपि भवति । अतः अत्र इतिकरणेन पदपाठकृता पदानां प्रकृतस्वरूपं प्रतिपादितम्। तेन च प्रकृतो मन्त्रार्थः परिस्फुटो भवति । परवर्तिनि काले भाष्यकारैरप्यत्र 'द्यावापृथिवी' इति एकपदत्वेनादाय मन्त्रस्यास्य व्याख्यानं विहितम् । अस्य मन्त्रस्य व्याख्यानरूपेण सायणाचार्येणोच्यते – "अस्मै इन्द्राय द्यावा पृथिवी॥ इतरेतरापेक्षया द्विवचनं 'प्र मित्रयोर्वरुणयोः' (ऋ. सं ७.६६.१) इतिवत्॥ नमेते स्वयमेव प्रह्वीभवतः॥ 'णमु प्रह्वत्वे'। ...चित् अपि च अस्य इन्द्रस्य शुष्मात् बलात् पर्वताः भयन्ते बिभ्यति। यः सोमपाः सोमस्य पाता निचितः सर्वैः। यद्वा अन्येभ्योऽपि देवेभ्यो दृढाङ्गः। वज्रबाहुः वज्रसदृशबाहुः। यः च वज्रहस्तः वज्रयुक्तः सः इन्द्रः इत्यादि प्रसिद्धम्॥"[५०७] इति। वेङ्कटमाधवेनापि एवंप्रकारेणैव पदपाठसूचितम् एकपदत्वं स्वीकृत्य मन्त्रार्थः प्रदर्शितः। तेनोच्यते – "अस्मै द्यावापृथिवी प्रह्वीभवतः। तथा अस्य भयात् पर्वताः बिभ्यति। यः सोमपाः दृढशरीरः, तस्य बाहौ कदाचिद् वज्रः, कदाचित् हस्ते इति।"। इति।

ऋग्वेदसंहितायाः अपर एको मन्त्रो वर्तते –

"स वां यज्ञेषु मानवी इन्दुर्जनिष्ट रोदसी।

देवो देवी गिरिष्ठा अस्रेधन्तं तुविष्वणि ॥"[५०८] इति

---

[५०६] पा. सू. १/१/११

[५०७] ऋ. सं. २/१२/१३ सायणभाष्यम्

[५०८] ऋ. सं. ९/९८/९

मन्त्रस्यास्य संहितापाठं दृष्ट्वा 'देवी' प्रथमान्तं पदं मन्यते। प्रथमान्तत्वेन तस्य स्वीकारे मन्त्रप्रतिपादिताभ्यां द्यावापृथिवीभ्यां देवताभ्यां तस्यान्वयो न सम्भवति। तेन च यथार्थरूपेण मन्त्रार्थावबोधो न भवति। परन्तु पदपाठे इतिकरणं दृष्ट्वा अस्य प्रगृह्यत्वमवगम्यते। मन्त्रस्यास्य पदपाठो यथा –

''सः । वाम् । यज्ञेषु । मानवी इति । इन्दुः । जनिष्ट । रोदसी इति ।

देवः । देवी इति । गिरिऽस्थाः । अस्रेधन् । तम् । तुविऽस्वनि ॥''[५०९] इति।

पदपाठे 'देवी इति' इत्येवंप्रकारेण इतिकरणमादाय अस्य प्रगृह्यत्वमवगम्यते। अपि च 'सुपां सुलुक्पूर्वसवर्णाऽच्छेयाडाड्यायाजालः'[५१०] इति सूत्रेण औविभक्तेः स्थाने सुविभक्तिर्जातेति ज्ञायते। तस्माद् भाष्यकारैः 'देवी' इत्यस्य 'देव्यौ द्योतमाने' इत्येवमर्थः प्रदर्शितः। अस्य मन्त्रस्य सायणाचार्यानुसारिणी व्याख्या यथा – ''हे मानवी मानव्यौ मनोः स्वभूते हे देवी द्योतमाने हे रोदसी द्यावापृथिव्यौ वां युवयोः यज्ञेषु सः इन्दुः सोमः जनिष्ट अजनि अन्तरिक्षे देवः स्वतेजसा सर्वं प्रकाशयन् पृथिव्यां गिरिष्ठाः ग्रावसु तिष्ठन्। तं जातं सोमं तुविष्वणि बहुस्वने उपरे यज्ञे वा अस्रेधन् ऋत्विजो ग्रावभिरघ्नन्। अभ्यषुण्वन्निति यावत्।''[५११] इति।

मन्त्रस्यास्य पदपाठे इतिकरणाभावे 'देवी' इत्यत्र प्रथमैकवचनमादाय 'सः', 'इन्दुः', 'देवः' इत्यादिपदैः सह तस्यान्वयः कर्तव्यः समानविभक्तिकत्वात्। परन्तु तथापि न कर्तुं शक्यते असमानलिङ्गकत्वात् । तस्मादत्र पदपाठकृता शाकल्येन पदपाठे इतिकरणेन मन्त्रार्थव्याख्याने संशयो दूरीभुत इति फलति ।

---

[५०९] ऋ. सं. ९/९८/९ पदपाठः

[५१०] पा. सू. ७/१/३९

[५११] ऋ. सं. ९/९८/९ सायणभाष्यम्

एवंप्रकारेण बहुत्र सम्बोधनपदेभ्यः इतिकरणेन शाकल्येन प्रकृतो मन्त्रार्थः सूचितः। 'वायो' इति ओकारान्तं पदं 'वायु' इत्यस्य प्रातिपदिकस्य सम्बोधने प्रथमैकवचने भवितुमर्हति, पुनश्च 'वायः' इति अकारान्तशब्दस्य विसर्गस्य सन्धिकार्येणापि भवितुमर्हति । संहितापाठे ओकारान्तं 'वायो' इति पदं दृष्ट्वा  तस्य प्रकृतस्वरूपं नावगम्यते। पदपाठे तस्य इतिकरणेनैव सम्बोधनपदत्वं ज्ञायते। तस्माच्च मन्त्रार्थो यथार्थरूपेण अस्माभिरवगम्यते।

### ४.७ अध्यायसारः

अतोऽनेनावगम्यते शाकल्यः कथं पदपाठे अवग्रहप्रदानेनेतिकरणमाध्यमेन च मन्त्राणामर्थव्याख्याने अनिष्टापत्तिनिवारणे च भाष्यकारान् साहाय्यं व्यदधत् । महर्षिणा शाकल्येन एकत्र 'अवसाय' इति पदे अवग्रहो न प्रदत्तश्चेत् तत्र गतिसमासः केनाप्युपायेन ज्ञातुं न शक्येत। गतिसमासज्ञानाभावे तस्य तिङन्तत्वं केनापि प्रकारेण न ज्ञायते। अपरत्रापि अवग्रहः प्रदत्तश्चेत् तत्रापि तिङन्तत्वं समापतेत्। परन्तु तत्र अवग्रहं न प्रदाय तस्य सुबन्तत्वं प्रतिपादितं शाकल्येन । अतः पदपाठत एव एकस्यैव पदस्य एकत्र सुबन्तत्वमन्यत्र तिङन्तत्वं ज्ञायते । तज्ज्ञानेन च यथार्थतया मन्त्रार्थज्ञानं तथा मन्त्रार्थव्याख्यानं सम्भवति। संहितापाठे 'स्वश्चन्द्रम्', 'विश्वश्चन्द्रम्' इति पदद्वयं दृष्ट्वा केनाप्युपायेन अनयोरेकपदत्वं न ज्ञातुं शक्यते, तत्र श्चुत्वकार्यस्य विद्यमानत्वात्। अनयोः पदयोः एकपदत्वं केवलं पदपाठे अवग्रहं दृष्ट्वा ज्ञायते। अवग्रहेणैवात्र पदानां प्रकृतस्वरूपज्ञानात् अनन्तरं मन्त्राणां यथार्थतया अर्थज्ञानं सम्भवति, सम्यक् देवतास्मरणरूपं फलं च प्राप्यते । अत्रोल्लेख्यं यत् यदि केनचिदुच्यते पाणिनिविरचितेन 'ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे' इति सूत्रेण अत्र समासो ज्ञातुं शक्यते तान् प्रति एवं वक्तव्यं यत् शाकल्यस्तु पाणिनेरपि पूर्ववर्ती, अतः अष्टाध्यायीग्रन्थविद्यमानात् प्रागेव शाकल्येन स्वकीयपदपाठे अवग्रहेण एतादृशेषु स्थलेषु एकपदत्वं सूचयित्वा मन्त्रार्थो ज्ञापितः । तथैव 'भाऋजीकम्', 'विश्वमिन्वम्' इत्यत्रापि पदपाठाद् विना केनाप्युपायेन एकपदत्वज्ञानं न

सम्भवति, प्रकृतमन्त्रार्थोऽपि अज्ञातः स्यात् । पदपाठकृता प्रगृह्यपदेषु इतिकरणं न कृतं चेत्तदा 'वेदी' इति पदे 'गौरी' इति पदे च सप्तमीविभक्तिरस्ति इति केनाप्युपायेन अवबोद्धुं न शक्यते । तदा पदानां यथार्थरूपेण अन्वयाभावात् प्रकृतमन्त्रार्थोऽपि केनाप्युपायेन न ज्ञापितो भवति । एतादृशः दृष्टान्तः ऋक्संहितायाः बहुत्र प्राप्यते यत्र शाकल्यः इतिकरणेन मन्त्राणां प्रकृतमर्थं ज्ञापितवान् तथा वेदव्याख्यानकर्मणि भाष्यकारान् महदुपकारं साधितवान् । अत एव तस्य वेदव्याख्यातृरूपेणापि गणना कर्तव्येति शम् ।

**५.१ भाषा व्याकरणञ्च**

भाष्यते अनया इति भाषा । सभ्यतायाः प्रारम्भे मानवानां परस्परयोर्मध्ये भावस्य आदानप्रदाने अङ्गसञ्चालनेन अक्षिनिकोचनेन अभिनयेन वा प्रचलिते आस्ताम् । परन्तु तादृशैः प्रकारैः भावविनिमयो यथार्थरूपेणासम्भवः, अभिनयादीनां बहुरूपत्वात् । तस्मात् परवर्तिनि काले मानवैः संकेतविशिष्टाः शब्दाः आविष्कृताः, ततश्च भाषायाः समुद्भवः। अभिनयैरेव पाणिविहाराक्षिनिकोचादिभिः भावविनिमये सम्भवेऽपि अत्यल्पत्वेन भावग्राहकत्वात् लोके शब्दव्यवहारः प्रचलित इति यास्काचार्यस्य निरुक्तग्रन्थेऽपि व्यज्यते । निरुक्तकृता यास्काचार्येणोक्तम् – "अणीयस्त्वाच्च शब्देन संज्ञाकरणं व्यवहारार्थं लोके"[५१२] इति । भाषा हि मानवानां परस्परयोर्भावविनिमयस्य श्रेष्ठः पन्थाः। भाषायाः लक्षणप्रसङ्गे आङ्गलभाषाविदा हेनरि-सुइटमहाभागेनोच्यते (Henry Sweet) - "Language is the expression of ideas by means of speech-sounds combined into words."[५१३] इति। अर्थात् ध्वन्यात्मकैः शब्दैः भावप्रकटीकरणेव भाषा। भाषातात्त्विकाभ्यां ब्लोच-ट्रागारमहाभागाभ्यां (Bernard Bloch and George L. Trager) भाषायाः स्वरूपप्रसङ्गे उच्यते - "A language is a system of arbitrary vocal symbols by means of which a social group cooperates."[५१४] इति। अर्थात् भाषा तु यादृच्छिकवाचिकध्वनिसंकेतस्य एका पद्धतिरस्ति यया पद्धत्या मानवाः परस्पराणां मध्ये भावविनिमयं कुर्वन्ति । भाषा युगविवर्तनेन सह विवर्तिता परिवर्तिता च भवति । भाषायाः उत्पत्तिविवर्तनप्रसङ्गे भाषावित्सु मतवैविध्यं परिलक्ष्यते । भाषातात्त्विकेषु मतभेदे सत्यपि संस्कृतभाषायाः प्राचीनत्वविषये विद्वांसो न विवदन्ते । विश्वस्य प्राचीनासु भाषासु

---

[५१२] नि. १/१/३

[५१३] Henry Sweet. *The History of Language*, p-1

[५१४] Bernard Bloch and George L. Trager. *Outline of Linguistic Analysis*, p-5

संस्कृतमन्यतमम् । ख्रीष्टपूर्वचतुस्सहस्राब्दात् पूर्वं समुपलब्धस्य वेदस्य संस्कृतभाषया निबद्धत्वात् अस्याः भाषायाः ततोऽपि पूर्ववर्तित्वं ज्ञायते। वैदिककालादारभ्य देवभाषानाम्ना परिचिता अतिप्राचीना भाषेयं स्वमहिम्ना अद्यावधिः विराजते । एतावत्पर्यन्तं यथार्थरूपेण अस्याः भाषायाः विद्यमानस्य प्रथमं कारणं हि अस्याः सुग्रथितं व्याकरणम् । कालस्य करालग्रासे यथा विनाशं न प्राप्नुयात्तस्मात् कस्याश्चित् भाषायाः संरक्षणार्थं सर्वेषां भाषाणां भाषाविद्भिः व्याकरणशास्त्रं प्रवर्तितम्।

वि-पूर्वकात् कृ-धातोर्ल्युटि व्याकरणशब्दनिष्पत्तिः। व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः प्रकृतिप्रत्ययभेदेन अनेनेति व्याकरणम्। व्याकरणं हि शब्दानुशासनशास्त्रम्, शब्दानुशासनं नाम शब्दानां साधुत्वासाधुत्वनिर्णयः। यतो हि असाधुशब्दप्रयोगे अधर्मः, साधुशब्दप्रयोगे अभ्युदयश्च भवति, तस्मात् साधुशब्दानामेव प्रयोगः कर्तव्यः। महाभाष्यकृता पतञ्जलिना व्याकरणलक्षणप्रसङ्गे उक्तम् – "लक्ष्यलक्षणे व्याकरणम्"[५१५] इति। अत्र लक्ष्यं नाम शब्दः, लक्षणं नाम सूत्रम् । 'स्वाध्यायोऽध्येतव्यः'[५१६] इति अध्ययनविध्यनुसारं न केवलं परम्पराप्राप्तस्वशाखाध्ययनं विहितमपि तु तत्रैव वेदैः सह वेदाङ्गानामपि अध्ययनं विहितम्। पतञ्जलिना उच्यते - "ब्राह्मणेन निष्कारणो धर्मः षडङ्गवेदोऽध्येयो ज्ञेयश्च।"[५१७] इति । तेषु षट्सु अङ्गेषु व्याकरणस्य प्राधान्यं बहुत्र शास्त्रान्तरे प्रतिपादितम् । अतः वैदिककालादेव संस्कृतव्याकरणस्य सम्यक् विस्तारो जात इति वक्तुं शक्यते । पतञ्जलिना उच्यते च – "पुराकल्प एतदासीत् संस्कारोत्तरकालं ब्राह्मणो व्याकरणं स्माधीयते, तेभ्यस्तत्तत्स्थानकरणनादानुप्रदानज्ञेभ्यो वैदिकाः शब्द उपदिश्यन्ते"[५१८] इति । विश्वसंसारे

[५१५] महा./ पस्पशा.

[५१६] तै. आ. २/१५

[५१७] महा./पस्पशा

[५१८] तदेव

विद्यमानासु भाषासु प्राचीना तथा उत्कृष्टा भाषा हि संस्कृतभाषा। यद्यपि भगवता पाणिनिना विरचिता *अष्टाध्यायी* संस्कृतव्याकरणस्य प्रथमः सुग्रथितो व्याकरणग्रन्थः, तथापि पाणिनेः पूर्वमपि नैके वैयाकरणसम्प्रदायाः प्रचलिता आसन् इति ज्ञायते । पाणिनिनापि स्वयम् *अष्टाध्यायी*ग्रन्थे केचन पूर्वाचार्याः उल्लिखिताः।

पाणिनिना ये पूर्वाचार्याः उल्लिखिताः तेषु शाकल्यः अन्यतमः। व्यक्तिशाकल्यस्य परिचयः वैशद्येन अस्यैव शोधप्रबन्धस्य द्वितीयाध्यायान्तर्गते 'पदपाठकारः शाकल्यः' इत्याख्ये उपाध्याये प्रदत्तः। वैयाकरणरूपेण शाकल्यस्य उल्लेखो बहुत्र प्राप्यते। पाणिनिना *अष्टाध्यायी*ग्रन्थे शाकल्यस्योल्लेखपूर्वकं चत्वारि सूत्राणि विरचितानि – 'लोपः शाकल्यस्य'[५१९], 'सम्बुद्धौ शाकल्यस्येतावनार्षे'[५२०], 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च'[५२१], 'सर्वत्र शाकल्यस्य'[५२२] इति च । गुरुपद-हालदार-महाभागविरचितस्यस्य *व्याकरण-दर्शनेर-इतिहास* इति ग्रन्थस्य उल्लेखानुसारेण *श्रीतत्त्वनिधि*नामके ग्रन्थे प्रसिद्धेषु वैयाकरणसम्प्रदायेषु शाक्ल्यस्योल्लेखोऽस्ति –

'ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।

सारस्वतं चापिशलं शाकल्यं पाणिनीयकम्'।।[५२३] इति।

किञ्च गुरुपद-हालदार-महाभागेन स्वकीये ग्रन्थे शाकल्यव्याकरणम् इति नाम्ना पृथग् उपाध्यायः अपि प्रदर्शितः। प्रातिशाख्यादिषु च बहुत्र पदानां वैयाकरणरीत्या साधुत्वासाधुत्वपर्यालोचनावसरे शाकल्यस्योल्लेखः परिलक्ष्यते।

---

[५१९] पा. सू. ८/३/१९

[५२०] तदेव. १/१/१६

[५२१] तदेव. ६/१/१२७

[५२२] तदेव. ८/४/५१

[५२३] गुरुपद हालदार, *व्याकरण-दर्शनेर-इतिहास*. पृ. ५३१

भारतीयपरम्परानुसारम् ऋषिभिराम्नातत्वात् निखिलज्ञानाधारत्वात् च वेदमन्त्राणां दुरवगाहत्वं विद्वत्समाजे विदितमेव । श्रुत्वा श्रुत्वा कण्ठस्थीकरणकाले कदाचित् वक्तुः कथनदोषात् श्रोतुः श्रवणदोषाद् वा यथा वेदमन्त्रेषु किमपि प्रक्षिप्तं न समापतेत्, मन्त्रस्थानां पदानां क्रमः यथा अन्यथा न भवेत् इत्यादिविषयान् मनसि निधाय वेदमन्त्राणाम् अक्षतरूपेण संरक्षणाय ऋषयो वेदस्य एकादश पाठप्रकाराः समुद्भावितवन्तः। त्रिविधः प्रकृतिपाठः, अष्टौ च विकृतिपाठाः। प्रकृतिपाठेषु पदपाठः अन्यतमः। ऋग्वेदस्य पदपाठकारोऽस्ति शाकल्यः। यद्यपि वैयाकरणरूपेण कुत्रचित् कुत्रचित् शाकल्यस्य उल्लेखः प्राप्यते परन्तु शाकल्यविरचितः व्याकरणग्रन्थः अस्माभिः दृग्गोचरो न भवति । शाकल्येन वेदमन्त्राणां संहितापाठतः पदपाठकरणसमये यान् नियमान् आधारीकृत्य पदानि विभक्तानि ते नियमाः सामग्रिकेन ग्रन्थ इव प्रतिभान्ति । समग्रे पदपाठे ये व्याकरणनियमाः प्रतिपादिताः ते तस्य वैयाकरणत्वं प्रमाणयन्ति । यद्यपि संस्कृतव्याकरणस्य प्रथमः सुग्रथितः ग्रन्थः पाणिनिविरचिता *अष्टाध्यायी*, परन्तु पाणिनेः पूर्ववर्तिनः शाकल्यकृते ऋग्वेदपदपाठेऽपि संस्कृतव्याकरणस्य एकं सुस्पष्टं चित्रमस्माभिः प्राप्यते। पदपाठे प्रतिफलिताः केचन व्याकरणनियमाः वक्ष्यन्ते ।

## ५.२ पदपाठप्रतिफलिताः सन्धिनियमाः

सन्धिर्नाम वर्णानां मेलनम् । पाणिनिना संहितासंज्ञायाः सूत्रं सूत्रितम् – "परः सन्निकर्षः संहिता"[५२४] इति। गौणोपचारेण सन्धिसंहितयोः समार्थकत्वेऽपि अत्रेदमवधेयं यत् संहिता तु निमित्तं सन्धिस्तु कार्यम् । संहितायाः विद्यमाने सति सन्धिकार्यं परिलक्ष्यते । परन्तु कदा केन वर्णेन सह कस्य वर्णस्य मेलनं सम्भवति, तयोर्मेलनेन कस्य वर्णस्योत्पत्तिः भवति इत्यादिनियमाः प्रथमं सूत्ररूपेण पाणिनिना एव उल्लिखिताः। शाकल्येन वर्णानां सन्धिविषये एते नियमाः पदपाठे पदविच्छेदकाले ज्ञापिताः एव। ऋग्वेदीयप्रथमसूक्तस्य अग्निसूक्तस्य

[५२४] पा. सू. १/४/१०९

द्वितीयमन्त्रे “स देवाँ एह वक्ष्यति”[५२५] इति संहितागतमन्त्रांशः “सः। देवान्। आ। इह। वक्षति।” इत्येवं प्रकारेण पदपाठे प्रदर्शितः शाकल्येन। अत्र पदपाठे संहितायाः (सन्धेः) ते नियमाः प्रतिफलिताः ये परवर्तिनि काले पाणिनिना *अष्टाध्यायी*ग्रन्थे सूत्ररूपेण ग्रथिताः। ‘देवान् आ इह’ इति स्थितौ “दीर्घादटि समानपदे”[५२६] इति सूत्रानुसारेण नकारस्य रुत्वम्, “अत्रानुनासिकस्य पूर्वस्य तु वा”[५२७] इति सूत्रानुवृत्तौ “आतोऽटि नित्यम्”[५२८] इति सूत्रेण वकारोत्तरः आकारः सानुनासिको भवति। ततः ‘देवाँरु आ इह’ इति जाते “भोभगोअघोअपूर्वस्य योऽशि”[५२९] इति सूत्रेण रोर्यकारो भवति। स च यकारः “लोपः शाकल्यस्य”[५३०] इति सूत्रेण लुप्यते। तेन ‘देवाँ एह’ एवं रूपं भवति। इयञ्च सुसमृद्धा सम्पूर्णा प्रक्रिया पाणिनेः प्रागेव शाकल्येन स्वकीयपदपाठे प्रदर्शिता। यतो हि पदपाठे शाकल्येन ‘देवाँ एह’ इत्यस्य पदविभागः ‘देवान्। आ। इह।’ इति प्रदर्शितस्तस्मादिदं वक्तुमुचितं यत् अत्र प्रयुक्ताः सन्धिनियमाः सर्वे महर्षिशाकल्यस्य मनसि आसन्नेव। एवंप्रकारेणैव ‘द्यौश्चिं॑द॒स्याम॑वाँ॒ अहेः॑’[५३१] इति संहितांशः पदपाठे ‘अम॑ऽवान्। अहेः॑’ इति प्रदर्शितः, ‘स तु॒र्वणि॑र्म॒हाँ अ॑रे॒णु’[५३२] इति संहितांशः ‘महान्। अरेणु’ इति प्रदर्शितः, ‘साह्वाँ अव’[५३३] इति संहितांश ‘साह्वान्। अव’ इति प्रदर्शितः, ‘जनाँ उपमिद्ययन्थ’[५३४] इति संहितांशः ‘जनान्। उपऽमित्’ इति प्रदर्शितः, ‘वैश्वानरो दस्युमग्निर्जघन्वाँ

[५२५] ऋ. सं. १/१/२
[५२६] तदेव. ८/३/९
[५२७] तदेव ८/३/२
[५२८] तदेव ८/३/३
[५२९] तदेव ८/३/१७
[५३०] ऋ. सं. ८/३/१९
[५३१] तदेव. १/५२/१०
[५३२] तदेव. १/५६/३
[५३३] तदेव. १/५८/५
[५३४] तदेव. १/५९/१

अधुना..’[५३५] इति संहितांशे ‘जघन्वान् । अधुना’ इति प्रदर्शितः, ‘द्युमाँ असि क्रतुमाँ इन्द्र’[५३६] इति संहितांशे ‘द्युमान् । असि । क्रतुमान् । इन्द्रः’ इति प्रदर्शितः। इत्येवंप्रकारेण ऋग्वेदसंहितायाः सर्वत्र संहितापाठतः पदपाठप्रदानकाले समानपद्धतिसमाश्रयणेन इदमवगम्यते यत् सन्धिविषयिणी इयं सम्पूर्णा प्रक्रिया शाकल्यमनसि आसीदेव।

ऋग्वेदसंहितायाः द्वितीयमण्डलस्य अपर एको मन्त्रो यथा –

“प्राता रथो नवो योजि सस्निश्चतुर्युगस्त्रिकशः सप्तरश्मिः।

दशारित्रो मनुष्यः स्वर्षाः स इष्टिभिर्मतिभी रंह्यो भूत्॥”[५३७] इति।

अस्मिन् मन्त्रे ‘प्राता रथो नवो’ इत्यंशस्य पदपाठः प्रदर्शितः ‘प्रातरिति । रथः । नवः।’ इति।

“रो रि”[५३८] इति पाणिनीयसूत्रानुसारेण रेफे परतः रेफस्य लोपो भवति, “ढ्रलोपे पूर्वस्य दीर्घोऽणः”[५३९] इति सूत्रेण च ढकाररेफयोः लोपनिमित्तयोः पूर्वस्य अणः दीर्घः भवति। यथा ‘पुनः + रमते’ इति स्थितौ ‘विसर्जनीयस्य सः’ इत्यनेन सूत्रेण ‘पुनस्+रमते’ इति जाते ‘ससजुषो रुः’ इत्यनेन सूत्रेण रुत्वे ‘पुनर् + रमते’ इत्यवस्थायां ‘रो रि’ इति सूत्रेण रकारस्य लोपे ‘पुन + रमते’ इति भवति, तदनन्तरं च ‘ढ्रलोपे पूर्वस्य दीर्घोऽणः’ इत्यनेन सूत्रेण दीर्घे ‘पुना रमते’ इति जायते, तथैव पदपाठकारेण शाकल्येन ‘प्राता रथो’ इत्यस्य ‘प्रातरिति रथः’ इत्येवंप्रकारेण पदपाठं प्रदर्श्य इयं सन्धिप्रक्रिया स्वकीयपदपाठे पाणिनेः पूर्वमेव प्रदर्शिता । अपि च प्रथममण्डले ‘सुगेभी रक्षा’ इति संहितांशं ‘सुऽगेभिः । रक्ष’ इति (ऋ. सं. १/३५/११) प्रदर्शनेनाप्ययं नियमो विज्ञापितः।

---

[५३५] ऋ. सं. १/५९/६

[५३६] तदेव. १/६३/१२

[५३७] तदेव. २/१८/१

[५३८] पा. सू. ८/३/१४

[५३९] तदेव ६/३/१११

ऋक्संहितायाः प्रथमे मण्डले एको मन्त्रो यथा –

“युवं वस्त्राणि पीवसा वसाथे युवोरच्छिद्रा मन्तवो ह स्वर्गाः।

अवातिरतमनृतानि विश्व ऋतेन मित्रावरुणा सचेथे॥”[५४०] इति।

अस्मिन् मन्त्रे “विश्व ऋतेन” इति संहितांशस्य पदपाठः “विश्वा । ऋतेन ।” इत्येवंप्रकारेण प्रदर्शितः। अतोऽनेन ज्ञाप्यते यत् ऋकारे परे सति दीर्घस्य अवर्णस्य ह्रस्वादेशो भवति, पुनश्च तयोः सन्धिः न भवति । पाणिनिना “ऋत्यकः”[५४१] इति यत् सूत्रं प्रणीतं तस्य विषयस्तु अयमेव। ‘ऋत्यकः’ इति सूत्रेण ऋकारे परतः अइउऋलृवर्णानां प्रकृतिभावः ह्रस्वश्च भवति । यथा – ‘ब्रह्मा + ऋषिः’ इति स्थिते विकल्पेन आकारस्य ह्रस्वत्वं प्रकृतिभावश्च भवति तथैवात्र ‘विश्वा ऋतेन’ इति स्थितौ सन्ध्या ‘विश्व ऋतेन’ इति जातम्। अस्मिन् सूत्रे “लोपः शाकल्यस्य”[५४२] इति सूत्रात् शाकल्यपदानुवर्तनं भवति। तेन शाकल्यस्य मतेन ‘ऋति परे अकः प्रकृतिभावः ह्रस्वादेशश्च भवति’ इति सूत्रार्थो भवति। अतः पाणिनिना यः नियमः सूत्राकारेण *अष्टाध्याय्यां* निरूपितः स नियमः शाकल्यकृते पदपाठे प्रतिफलित एव । किञ्च पाणिनिना स्वयमेव उल्लिखितं यदिदं सूत्रं शाकल्यमतानुसारि ।

पाणिनिना *अष्टाध्यायी*ग्रन्थे यण्-सन्धिविषये यो नियमः ‘इको यणचि’[५४३] इति सूत्रेण ग्रन्थीकृतः स नियमस्तु पदपाठकृता शाकल्येन संहितापाठतः पदपाठे पदानां सन्धिं विभज्य पृथक्प्रदर्शनकाले प्रदर्शितः। ‘इको यणचि’ इति सूत्रेण अचि परे इकः स्थाने यण् विधीयते। यथा ‘नदी+अम्बु’ इत्यवस्थायां नदीशब्दोत्तरस्य ईकारस्य स्थाने यकारादेशे ‘नद्यम्बु’ इति रूपं भवति। ऋग्वेदस्य बहूनां मन्त्राणां संहितापाठस्थाः यवरलाः इउऋलृकाररूपेण पदपाठे

[५४०] ऋ. सं. १/१५२/१

[५४१] पा. सू. ६/१/१२८

[५४२] तदेव ८/१/१९

[५४३] तदेव ६/१/७७

प्रदर्शिताः। यथा- 'याह्या' इति संहितांशः 'याहि । आ' इति प्रदर्शितः, 'त्रिकद्रुकेष्वपिबत्'[544] इति संहितांशः "त्रिऽकद्रुकेषु । अपिबत्" इति प्रदर्शितः, 'स्ववसा' इति संहितांशः 'सुऽअवसा' इति प्रदर्शितः (ऋ. सं १/९३/७) इद्यादीनि । अतः एतेषु प्रयोगेषु शाकल्येन यण्-सन्धिविषयको नियमः स्पष्टतया प्रतिपादितः स्वकीये पदपाठे ।

*अष्टाध्यायी*ग्रन्थस्य षष्ठाध्यायान्तर्गतं सूत्रं हि 'आद्गुणः'[545] इति । अनेन सूत्रेण अवर्णात् अचि परे पूर्वपरयोः गुणादेशो भवति । 'अदेङ् गुणः'[546] इति सूत्रेण पाणिनिना अ-ए-ओ-वर्णानां गुणसंज्ञा विहिता, तस्मात् अवर्णात् अचि परे स्थानसाम्यात् तादृशः गुणवर्णादेशो भवति । यथा – 'उप+इन्द्रः' इति स्थिते 'आद्गुणः' इति सूत्रेण अकार-इकारयोः कण्ठताल्वोः स्थानयोः कण्ठतालुस्थानविशिष्टः गुणवर्णः एकारो जायते, तेन 'उपेन्द्रः' इति रूपं भवति । महर्षिशाकल्यविरचिते पदपाठे परिलक्ष्यते यत् संहितागतमन्त्राणां पदविभागकाले सर्वत्र अयं गुणसन्धिः समस्तपदे अवग्रहेण प्रदर्शितः, असमस्तपदेषु दण्डेन विभज्य प्रदर्शितः। यथा – 'अश्विनेयते' इति संहितांशः "अश्विना । ईयते" इति प्रदर्शितः (ऋ. सं १/३०/१८), 'उवासोषा' इति संहितांशः "उवास । उषा" इति प्रदर्शितः (ऋ. सं १/४८/३), 'विश्वेदह' इति संहितांशः "विश्वा । इत् । अह।" इति प्रदर्शितः (ऋ. सं १/९२/३) इत्येवंप्रकारेण गुणसन्धिसम्बन्धी विधिः शाकल्येन पदपाठे प्रतिपादितः।

*अष्टाध्यायी*ग्रन्थस्य षष्ठाध्यायान्तर्भूतं सन्धिविषयकं सूत्रं हि 'वृद्धिरेचि'[547] इति। अनेन सूत्रेण पाणिनिनोक्तं यत् अवर्णाद् एचि पदे पूर्वपरयोः वृद्धिरेकादेशो भवति । अयञ्च नियमः गुणसन्धेः बाधकः। 'वृद्धिरादैच्'[548] इति सूत्रेण पाणिनना आ-ऐ-औ-वर्णानां वृद्धिसंज्ञा विहिता,

---

[544] ऋ. सं. २/१५/१
[545] पा. सू. ६/१/८७
[546] तदेव. १/१/२
[547] पा. सू. ६/१/८८
[548] तदेव. १/१/१

तस्मात् अवर्णात् एचि परे स्थानसाम्यात् तादृशः वृद्धिसंज्ञकवर्णादेशो भवति । यथा 'देव+ऐश्वर्यम्' इति स्थिते अकार-ऐकारयोः कण्ठतालुवर्णयोः स्थाने कण्ठतालुस्थानविशिष्टः वृद्धिसंज्ञकवर्णः ऐकारः भवति, तेन 'देवैश्वर्यम्' इति रूपं प्राप्यते। शाकल्येनापि पदपाठे सर्वत्र विधिमिमं मनसि निधाय संहितागतमन्त्राणां पदपाठे विभागकाले दण्डेन वृद्धिसन्धिं विभज्य पदानि प्रदर्शितानि। अनेनावगम्यते यत् तेन विधिरयमवगत आसीत्, यद्यपि तेन सूत्रादिकं न विरच्य विधिरयं ग्रन्थीकृतस्तथापि वैयाकरणरूपेण अयं विधिः तेन पदपाठे प्रतिपादितः। 'नैतावत्' इति पदं तेन 'न एतावत्' इत्येवं विभज्य प्रदर्शितः (ऋ. सं ७/५८/३), एवमपरत्रापि।

भगवता पाणिनिना *अष्टाध्यायी*ग्रन्थस्य षष्ठाध्याये सूत्रं प्रणीतम् 'एचोऽयवायावः'[५४९] इति। अस्य सूत्रस्यार्थो हि अचि परे सति एचः क्रमाद् अय् अव् आय् आव् इत्येते आदेशा भवन्ति। तेन यथासंख्यमनुदेशः समानामित्यनेन लभ्यते यत् एकारस्थाने अयादेशः, ओकारस्थाने अवादेशः, ऐकारस्थाने आयादेशः, औकारस्थाने आवादेशश्च भवति। यथा 'हरे+इह' इति स्थिते रकारोत्तरस्य एकारस्य अयादेशे 'हरय् इह' इति जाते संयोगे 'हरयिह' इति रूपं प्राप्यते। अत्रोल्लेख्यं यत् 'हरय् इह' इत्यवस्थायां पाणिनिना 'लोपः शाकल्यस्य' इति सूत्रेण अशि परतः पदान्तयोः यवकारयोः वैकल्पिको लोपो विहितः। तेन 'हरय् इह' इत्यवस्थायां पदान्तस्य यकारस्य विकल्पेन लोपे 'हर इह' इति रूपमपि साधु। महर्षिणा शाकल्येन पदपाठे अयादयः आदेशाः सन्धिं विभज्य प्रदर्शिताः, संहितापाठे यकारवकारलोपे सति पदपाठे प्रकृतस्वरूपं प्रतिपादितम्। यथा - 'द्वारावृणवो' इति संहितांशः "द्वारौ। ऋणवः" इति प्रदर्शितः (ऋ. सं १/४८/१५)। 'अमृतत्व उत्तमे' इति संहितांशे पदान्तयकारवकारलोपः परिलक्ष्यते, पदपाठे सन्धिं विभज्य तस्योल्लेखो विहितः "अमृतत्वे। उत्तमे।" इति (ऋ. सं

[५४९] पा. सू. ६/१/७८

१/३१/७)। 'अग्निषोमाविमं' इति संहितांशः सन्धिं विभज्य "अग्निषोमौ। इमम्" इति प्रदर्शितः (ऋ. सं. १/९३/१)।

पाणिनिना 'अकः सवर्णे दीर्घः'[५५०] इति सूत्रेण विहितं यत् सवर्णे अचि परतः अकः पूर्वपरयोः दीर्घः एकादेशो भवति। अर्थात् द्वयोः अवर्णयोः मिलित्वा आकारः, द्वयोः इवर्णयोः स्थाने ईकारः, द्वयोः उवर्णयोः मिलित्वा ऊकारः इत्येवम्। यथा 'दैत्य+अरि' इति स्थिते सवर्णे अचि अकारे परतः द्वयोर्मिलित्वा सवर्णः दीर्घैकादेशः आकारो भवति, तेन 'दैत्यारि' इति रूपं प्राप्यते। पदपाठे महर्षिणा शाकल्येन दीर्घसन्धिं विभज्य अयं व्याकरणनियमः प्रतिपादितः। तत्र कानिचनोदाहरणानि यथा - 'इहाद्य' इति संहितांशः "इह । अद्य।" इति प्रदर्शितः (ऋ. सं १/४६/९), 'प्रावाद्य' इति संहितांशः "प्र+अव+अद्य" इति प्रदर्शितः (ऋ. सं १/४९/२), 'अत्राह' इति संहितांशः "अत्र+अह" इति प्रदर्शितः (ऋ. सं. १/४८/४), 'सूक्तानि' इति संहितांशः 'सुऽउक्तानि' इति प्रदर्शितः (ऋ. सं. १/९३/१)।

व्यञ्जनवर्णे परतः सति मः अनुस्वारो भवतीति पाणिनिना 'मोऽनुस्वारः' इति सूत्रेण प्रतिपादितम्। महर्षिणा शाकल्येन सर्वत्रैव पदपाठे इमं विधिमनुसृत्य संहितापाठस्थाः अनुस्वाराः म्-रूपेण प्रदर्शिताः। यथा ऋग्वेदस्य प्रथममन्त्रे 'पुरोहितं यज्ञस्य' इति संहितांशः "पुरोऽहितम् । यज्ञस्य।" इत्येवं प्रदर्शितः, 'इन्द्रं विश्वाः' इति संहितांशः "इन्द्रम् । विश्वाः।" इति प्रदर्शितः (१/११/१)। अतः तत्सकाशे व्याकरणनियमोऽयं ज्ञात आसीदेव।

पाणिनिना 'ङमो ह्रस्वादचि ङमुण्नित्यम्'[५५१] इति सूत्रेण उच्यते यत् ह्रस्वात् परो यो ङम् तदन्तं यत् पदं तस्मात् परस्याचः ङमुडागमो भवति। अर्थात् ह्रस्वस्वरात् परं विद्यमानानां ङ-ण-न-वर्णानां परमवस्थितस्य अचः स्थाने क्रमात् ङुट्, णुट्, नुट् इत्येते आगमा भवन्ति। यथा

---

[५५०] पा. सू. ६/१/१०१

[५५१] तदेव. ८/३/३२

'प्रत्यङ् + आत्मा' इति स्थिते ङुडागमे अनुबन्धत्वे प्रत्यङ्ङात्मा इति रूपं भवति। 'सन्+अच्युतः' इति स्थितौ नुडागमे अनुबन्धत्वे 'सन्नच्युतः' इति रूपं प्राप्यते। महर्षिणा शाकल्येनापि स्वकीये पदपाठे दण्डेन पदविभागकाले अयं नियमः प्रदर्शितः। तेन 'प्रत्यङ्ङुदेषि' इति संहितांशः "प्रत्यङ् । उत् । एषि।" इति प्रदर्शितः (ऋ. सं. १/५०/५), 'जुजोषन्निन्मरुतः' इति संहितांशः "जुजोषन् । इत् । मरुतः" इत्येवं प्रदर्शितः (ऋ. सं ७/५९/३)।

पाणिनिना *अष्टाध्याय्याः* अष्टमाध्याये 'झयो होऽन्यतरस्याम्'[५५२] इति सूत्रेणोक्तं यत् झय्-प्रत्याहारस्थितात् वर्णात् परावस्थितस्य हकारस्य विकल्पेन पूर्वसवर्णादेशो भवति। यथा - 'वाग्+हरिः' इति स्थितौ झयः परस्य हकारस्य पूर्ववर्णादेशे घकारो भवति, तेन 'वाग्घरिः' इति रूपं लभ्यते। अत्रोल्लेख्यं यत् संवार-नाद-घोष-महाप्राणस्य हकारस्य स्थाने स्थानसाम्यात् गकारसवर्णानां क-ख-ग-घ-ङानां मध्ये घकार एव भवति । *अष्टाध्यायी*ग्रन्थस्थितोऽयं विधिश्च महर्षिणा शाकल्येन पदपाठे पदविभागकाले सूचित एव। तेन 'चिद्धि' इति संहितांशस्य पदविभागकाले "चित् । हि।" इति प्रदर्शितः (ऋ. सं. १/४८/१४)। पदपाठतो ज्ञायते यत् हि इत्यस्य हकारः पूर्वावस्थितस्य दकारस्य सवर्णः धकारः सञ्जातः। एवंप्रकारेण सर्वत्र प्रदर्शनेन शाकल्यस्य वैयाकरणत्वं प्रतीयते।

पाणिनिना 'स्तोः श्चुना श्चुः' इति सूत्रेण प्रतिपादितं यत् सकारतवर्गयोः शकारचवर्गाभ्यां योगेन शकारचवर्गौ भवतः। तेन 'रामस् चिनोति' इत्यवस्थायां सकारस्थाने शकारे 'रामश्चिनोति' इति रूपं प्राप्यते। पाणिनिना ग्रन्थीकृतोऽयं सन्धिनियमो महर्षिणा शाकल्येन पदपाठे सन्धिं विभज्य प्रदर्शितः। तेन 'इन्द्रश्च' इति संहितांशस्य पदविभागकाले "इन्द्रः । च ।" इत्येवं प्रदर्शितः (ऋ. सं २/४१/११)। तेन पदविभागं दृष्ट्वा ज्ञायते यत् आदौ विसर्गः आसीत् तदनन्तरं विसर्गस्थाने 'विसर्जनीयस्य सः' इति सूत्रेण सकारे ततः चकारस्य विद्यमानत्वात्

[५५२] पा. सू. ८/४/६२

सकारस्य शकारे संहितापाठे इन्द्रश्च इति निष्पन्नम्। एवंप्रकारेण सर्वत्र पदपाठे इमं सन्धिं विभज्य शाकल्यः *अष्टाध्यायी*स्थितं विधिमिमं सूचितवान्।

एवंप्रकारेण महर्षिणा शाकल्येन पाणिनिना ग्रन्थीकृताः सर्वे सन्धिनियमाः पदपाठे पदविभागकाले विज्ञापिताः, येन तत्सकाशे एते व्याकरणनियमा अवगता आसीदिति निश्चयरूपेण प्रतिपादयितुं शक्यते।

## ५.३ पदपाठेन प्रगृह्यत्वज्ञापनम्

संस्कृतवैयाकरणसम्प्रदाये प्रचलितासु संज्ञासु प्रगृह्यमन्यतमम्। वाक्येषु प्रगृह्यसद्भावे प्रकृतिभावः परिलक्ष्यते। प्रकृतिभावोऽप्येकः पारिभाषिकः शब्दः, यस्यार्थः सन्ध्यभावः। पाणिनिना *अष्टाध्यायी*ग्रन्थे प्रथमं कैश्चन सूत्रैः पदानां प्रगृह्यसंज्ञा विहिता, पुनः प्रगृह्यसंज्ञकपदानां "प्लुतप्रगृह्या अचि नित्यम्"[५५३] इति सूत्रेण सन्ध्यभावो विहितः। प्रगृह्यसंज्ञाप्राप्तानि पदानि न सन्धीयन्ते। पाणिनिना *अष्टाध्यायी*ग्रन्थे प्रगृह्यसम्बन्धीनि यानि सूत्राणि सूत्रितानि तानि सर्वाण्येव शाकल्येन स्वकीयपदपाठे इतिकरणेन प्रदर्शितानि। शाकल्यकृते इतिकरणे प्रयुक्तः इतिशब्दस्तु आद्युदात्तः इतिशब्दः। न केवलं शाकल्येन पदपाठे आद्युदात्तः इतिशब्दः प्रयुक्तः किञ्च ऋग्वेदस्य संहितापाठेऽपि आद्युदात्तस्येतिशब्दस्य प्रयोगः परिलक्ष्यते।[५५४]

पाणिनिविरचितेषु प्रगृह्यसंज्ञाविधायकसूत्रेषु 'ईदूदेद्द्विवचनं प्रगृह्यम्'[५५५] इति प्रधानम्। अनेन सूत्रेण द्विवचने प्रयुक्तस्य ईकारान्तस्य, ऊकारान्तस्य, एकारान्तस्य च पदस्य प्रगृह्यसंज्ञा भवति। प्रगृह्यसंज्ञकत्वात् एतेषां पदानां सन्धिर्न क्रियते। यथा 'विष्णू इमौ' इति स्थिते यण्-

[५५३] पा. सू ६/१/१२५
[५५४] ऋ. सं. ९/६/२
[५५५] पा. सू. १/१/११

सन्ध्या उकारस्थाने वकारादेशे प्राप्तेऽपि अत्र ऊकारस्य द्विवचने प्रयुक्तत्वात् सन्ध्यभावो दृश्यते। ऋग्वेदसंहितायामपि एतादृशानि बहूनि पदानि परिलक्ष्यन्ते येषां परे स्वरे विद्यमाने सन्धिर्न विहितः। एतादृशानां मन्त्राणां संहितापाठं दृष्ट्वा सन्ध्यभावकारणं नावगम्यते, परन्तु पदपाठे एतेभ्यः पदेभ्यः इतिशब्दस्य प्रयोगेन प्रगृह्यत्वमवगम्यते । यथा 'अ॒ग्नी इति॑।'[५५६] 'अ॒ज॒रयू॒ इति॑'[५५७] 'न॒मे॒ते॒ इति॑'[५५८] प्रभृतीनि। पाणिनिना 'अदसो मात्'[५५९] इति सूत्रेण विहितं यत् अदसिति प्रातिपदिकस्य मकारात् परस्थितः ईकारः, ऊकारः, एकारश्च प्रगृह्यसंज्ञका भवन्ति । अस्य पाणिनीयसूत्रस्यापि प्रयोगः पदपाठकृता प्रदर्शितः - 'अमी इति' (ऋ. सं. १/२४/६) इत्यादिषु। पाणिनिना 'ओत्'[५६०] इति सूत्रेण ओदन्तान्तानां निपातानां प्रगृह्यसंज्ञा विहिता। तस्यापि उल्लेखो महर्षिणा शाकल्येन पदपाठे 'अथो इति' (ऋ. सं १/५०/१२), 'मो इति' (ऋ. सं. १/५०/१३), 'यहो इति' (ऋ.सं १/७४/५) इत्यादिप्रयोगैः सूचितः। पाणिनिना 'उञः'[५६१] 'ऊँ' इति सूत्रद्वयेन अनार्षे इतिशब्दे परतः निपातसंज्ञकस्य उकारस्य प्रगृह्यसंज्ञा विहिता, विकल्पेन च तस्य दीर्घानुनासिकत्वं विहितम्। संहितापाठे विद्यमानः निपातसंज्ञकः उकारः पदपाठे शाकल्येन दीर्घानुनासिकरूपेण प्रदर्शितम्। अतोऽयं प्रगृह्यनियमो महर्षिणा शाकल्येन पदपाठे प्रतिपादित एव । पदपाठे 'ऊँ इति' (ऋ. सं. १/२६/५), 'ऊँ इति' (८/२/१३) इत्यदीनि उदाहरणानि परिलक्ष्यन्ते ।

[५५६] ऋ. सं. ५/८५/४ पदपाठः

[५५७] तदेव १/११६/२०

[५५८] तदेव २/१२/१३

[५५९] पा. सू. १/१/१२

[५६०] तदेव १/१/१५

[५६१] तदेव. १/१/१७

पाणिनिना 'शे'[५६२] इति सूत्रेण प्रतिपादितं यत् 'सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः'[५६३] इति सूत्रेण सुपां स्थाने शे इत्यादेशः प्रगृह्यसंज्ञको भवति। तेन अस्मे, युस्मे, त्वे इत्यादीनि पदानि प्रगृह्यसंज्ञकत्वात् वाक्ये न सन्धीयन्ते। पदपाठकृता शाकल्येन संहितापाठतः मन्त्राणां पदविभागकाले 'अस्मे इति' (ऋ. सं. ८/५/१५), 'त्वे इति' (ऋ. सं. १/५९/१) इत्यादिरूपेण एतेषां प्रगृह्यत्वं पाणिनेः प्रागेव सूचितम्। सप्तम्यर्थे प्रयुक्तस्य ईकारस्य ऊकारस्य च प्रगृह्यत्वं विहितं पाणिनिना 'ईदूतौ च सप्तम्यर्थे'[५६४] इति सूत्रेण। शाकल्येन स्वकीयपदपाठेऽपि सप्तम्यर्थे प्रयुक्तस्य ईकारस्य ऊकारस्य च प्रगृह्यत्वं प्रदर्शितम् इतिकरणेन। यथा – "वेदी॒ इति॑ । अ॒स्याम् ।"[५६५] "सोमः॑ । गौ॒री इति॑ । अधि॑ । श्रि॒तः।"[५६६] महर्षिणा शाकल्येन समासवृत्तिनिष्पन्नपदानि अवग्रहेन प्रदर्शितानि। यत्र अवग्रहः प्रदर्शनीयः इतिकरणमपि कर्तव्यं तत्र प्रथमम् इतिकरणेन प्रगृह्यत्वं प्रदर्श्य तदनन्तरं समासं सूचितवान् महर्षिः। यथा – "चित्र॑भानो॒ इति॒ चित्र॑ऽभानो।"[५६७] शाकल्येन इतिशब्दप्रयोगेन न केवलम् असमस्तपदानां प्रगृह्यत्वं सूचितमपि तु तेन प्रगृह्यपदानां समासे सति तत्रापि इतिशब्देन प्रगृह्यत्वं सूचितम् - 'हरीइव > हरी इवेति हरीऽइव' (ऋ. सं १/२८/७)।

पाणिनिना स्वविरचितस्य ग्रन्थस्य षष्ठाध्याये 'सर्वत्र विभाषा गोः' इति सूत्रेण विहितं यत् पदान्ते विद्यमानस्य एङन्तस्य गोशब्दस्य वैकल्पिकः प्रकृतिभावो भवति। तेन 'गो+अग्रम्' इति स्थिते 'एचोऽयवायावः'[५६८] इत्यनेन सूत्रेण अवादेशे यथा गवाग्रम् इति रूपं भवति, 'एङः पदान्तादति' इत्यनेन पूर्वरूपैकादेशे यथा गोऽग्रम् इति रूपं भवति तथैव विकल्पेन प्रकृतिभावे

---

[५६२] पा. सू. १/१/१३
[५६३] तदेव. ७/१/३९
[५६४] तदेव १/१/१९
[५६५] ऋ. सं. २/३/४
[५६६] तदेव. ९/१२/३
[५६७] ऋ. सं. ५/२६/२
[५६८] पा. सू. ६/१/७८

‘गो अग्रम्’ इति वर्तते। अनेन त्रीणि रूपाणि प्राप्यन्ते। अयञ्च वैकल्पिकः प्रकृतिभावरूपः तृतीयः पक्षः महर्षिणा शाकल्येन पदपाठे पदविभागकाले प्रदर्शित एव । तेन ‘गो अग्राँ’ इति संहितांशः ‘गोऽअग्रान्’ (ऋ. सं. १/९२/७) इति प्रदर्शितः, ‘गो अग्रया’ इति संहितांशः ‘गोऽअग्रया’ (ऋ. सं. १/५३/५) इति प्रदर्शितः। पदपाठे अवग्रहमादाय निश्चीयते यत् संहितापाठे ‘गो’ ‘अग्रान्’ इति पदयोर्मध्ये समासो जातः, परन्तु समासे सन्धेरावश्यकत्वे संहितापाठे सन्ध्यभावदृष्टत्वात् प्रतीयते यत् अत्र प्रकृतिभाववशात् सन्धिर्न विहितः। अतः पदपाठे समासज्ञानेन संहितापाठे सन्ध्यभावदर्शनेन चास्य प्रगृह्यत्वमवगम्यते यत् प्रगृह्यत्वं परवर्तिनि काले वैयाकरणैः सूत्रेण प्रतिपादितम्। एवंप्रकारेण दृश्यते यत् भगवता पाणिनिना *अष्टाध्यायी*ग्रन्थे ये प्रगृह्यनियमाः सूत्ररूपेण प्रतिपादितास्ते नियमाः महर्षिणा शाकल्येन स्वकीये पदपाठे पदविभागकाले विज्ञापिता एव ।

## ५.४ पदपाठप्रतिपादिताः समासनियमाः

वैयाकरणसम्प्रदाये स्वीकृतेषु पञ्चसु वृत्तिषु समासोऽन्यतमः। पाणिनिना *अष्टाध्यायी*ग्रन्थे समासः कुत्र विधेयः, उपसर्जनविधिः, समासान्तप्रत्ययः, समासे आगमाः इत्यादिविषये बहूनि सूत्राणि विरचितानि । तेषां समासविधीनामुल्लेखः पदपाठे अस्माभिः पदविभागप्रसङ्गे तथा समासज्ञापनप्रसङ्गे प्राप्यते । कुत्र समासो भवति कुत्र न इति विषये शाकल्येन अवग्रहप्रदानेन पदपाठे समासो विज्ञापितः। “इवेन सह समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वञ्च वक्तव्यम्” इति वार्त्तिकस्य उल्लेखस्तु शाकल्येन पदपाठे प्रदर्शितः। अग्निसूक्तस्य अन्तिमे मन्त्रे “स नः पितेव....”[५६९] इति संहितागतमन्त्रांशस्य “सः॑ । न॒ः। पि॒ताऽइ॑व।” इति पदपाठः प्रदर्शितः। अत्र पदपाठत एव ज्ञायते यत् संहितापाठे ‘पिता इव’ इति पदयोर्मध्ये सन्धिर्न, परन्तु समास एव सञ्जातः। यदि सन्धिः स्यात्तदा पदपाठे ‘पिता’ इति पृथक्

[५६९] ऋ. सं. १/१/९

पदम्, 'इव' इति पृथक् पदं च वर्तेत। समासत्वात् पदपाठे पिताऽइव इति एकपदरूपेण पठितम्। किञ्च समासं स्वीकृत्य एकपदत्वमादाय स्वरोऽपि प्रदर्शितः। यथा पि॒ताऽइ॑व इति अन्यथा 'पिता' इत्यस्य पृथक् स्वरः 'इव' इत्यस्य च पृथक् स्वरः स्यात्। अपि च शाकल्येन 'आयुधानीव' इति संहितांशः 'आयुधानिऽइव' (ऋ. सं १/९२/१) इत्येवंप्रकारेण प्रदर्शितः। अत्र सन्धिकार्येण यद्रूपं प्राप्यते समासवृत्त्यापि तद्रूपमेव उपलभ्यते तस्मात् संहितापाठे समासो जातः उत सन्धिः इति निर्णेतुं न शक्यते। परन्तु महर्षिणा शाकल्येन समग्रे ऋग्वेदीये पदपाठे इवेति पदेन सह युक्तः संहितांशः अवश्यमेव अवग्रहेण निर्दिश्य एकपदत्वेन प्रदर्शितम्। तेन पदपाठतः निश्चीयते यत् इवेन सह समर्थस्य सुबन्तस्य नित्यं समासो भवति। अतः परवर्तिनि काले वार्त्तिककृता कात्यायनेन यः नियमः वार्त्तिकरूपेण ग्रन्थीकृतः स तु शाकल्येन बहुपुर्वमेव स्वकीयपदपाठे प्रदर्शितः यत् इवेन सह समर्थसुबन्तस्य समासो भवति, किञ्च इवेन सह समासे 'सुपो धातुप्रातिपदिकयोः'[५७०] इति सूत्रेण विभक्तेः लोपो न भवति, पूर्वपदस्य प्रकृतिस्वरत्वं च भवतीति। परवर्तिवैयाकरणैः कुत्र समासो जातः कुत्र नेति विषये ये नियमाः सूत्रत्वेन प्रणीताः ते तु पदपाठे शाकल्येन ज्ञापिताः।

पाणिनिना *अष्टाध्यायी*ग्रन्थस्य षष्ठाध्याये एकं सूत्रं सूत्रितं – 'ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे'[५७१] इति। सूत्रेणानेन विधीयते यत् मन्त्रे चन्द्रशब्दे उत्तरपदे सति ह्रस्वान्तात् पूर्वपदात् सुडागमो भवति । अयञ्च नियमविशेषः शाकल्येन 'विश्वश्चन्द्रम्' इति संहितांशस्य 'विश्वऽचन्द्रम्' (ऋ. सं ९/९४/५) इत्येवं रूपेण, 'स्वश्चन्द्रम्' इति संहितांशस्य 'स्वऽचन्द्रम्' (१/५२/९) इत्येवंरूपेण प्रदर्शनात् ज्ञापित एव। अत्रोदाहरणेषु पदपाठे अवग्रहं दृष्ट्वा ज्ञायते यत् 'विश्वः', 'चन्द्रम्' इति पदयोर्मध्ये सन्धिः न सञ्जातः, परन्तु समास एव जातः। किञ्च उभयत्रैव

---

[५७०] पा. सू. २/४/७१

[५७१] तदेव. ६/१/१५१

पदपाठे सकारप्रदर्शनाभावात् अवगम्यते यत् समासे एवायं सुडागमो जातः, समासाभावे न दृश्यते। पदपाठविज्ञापितः अयं नियमविशेष एव पाणिनिना प्रकृतसूत्रेण ग्रन्थीकृतः। एवंप्रकारेण महर्षिणा शाकल्येन पदपाठे अवग्रहप्रदानेन समासविधयः विज्ञापिताः ये परवर्तिनि काले वैयाकरणैः सूत्ररूपेणोल्लिखिताः।

### ५.५ पदपाठे प्रतिपादिताः उदात्तादिस्वराः

'स्वृ-शब्दोपतापयोः'[५७२] इति भ्वादिगणीयाद्धातोः 'पुंसि संज्ञायां घः प्रायेण'[५७३] इत्यनेन सूत्रेण करणे घञि स्वरशब्दो निष्पन्नः। स्वर्यन्ते ज्ञायन्ते अर्था एभिरिति स्वराः, उदात्तादयः। उदात्तादिस्वरैरेव कस्यचिच्छब्दस्य प्रकृतार्थः प्रकटितो भवति। उदात्तादिस्वराणां संख्याविषये विद्वांसो नैकमत्यं भजन्ते। कैश्चित् त्रयः स्वराः, कैश्चित् चत्वारः, कैश्चित् पञ्च, कैश्चिच्च सप्त स्वराः स्वीकृताः। *ऋग्वेदप्रातिशाख्ये* प्राधान्येन त्रयः स्वराः स्वीकृताः। उच्यते च तत्र – "उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः। आयामविश्रम्भाक्षेपैस्त उच्यन्ते॥"[५७४] इति। पाणिनिना उदात्तानुदात्तस्वरितानां त्रयाणां स्वराणां संज्ञा विहिता 'उच्चैरुदात्तः', 'नीचैरनुदात्तः' 'समाहारः स्वरितः'[५७५] इति सूत्रत्रयेण । महाभाष्यकृता पतञ्जलिना सप्त स्वराः स्वीकृताः। तेनोच्यते - 'उदात्तः, उदात्ततरः, अनुदात्तः, अनुदात्ततरः, स्वरितः, स्वरिते य उदात्तः सोऽन्येन विशिष्टः, एकश्रुतिरिति सप्तमः'[५७६] इति। वाक्येषु मुख्यतया चत्वारः स्वराः उपलभ्यन्ते उदात्तः, अनुदात्तः, स्वरितः एकश्रुत्यपराभिधः प्रचयश्च। पाणिनिना यद्यपि प्रचयसंज्ञायाः सूत्रं न विरचितं परन्तु तेन 'स्वरितात् संहितायामनुदात्तानाम्'[५७७] इति सूत्रेण स्वरितपरस्य अनुदात्तस्य प्रचयत्वं

---

[५७२] पा. धा. १००४
[५७३] पा. सू. ३/३/११८
[५७४] ऋ. प्रा. ३/१
[५७५] पा. सू. १/२/२९-३१
[५७६] पा. सू. १/२/३३ महाभाष्यम्
[५७७] पा. सू. १/२/३९

विहितम्। यद्यपि उदात्तादीनां वर्णमात्रधर्मत्वात् एते यथा अचां धर्मस्तथापि व्यञ्जनानामपि इति व्यामोहो लोके वर्तते, परन्तु तन्न साधुः। उदात्तादिः अचामेव धर्मो न व्यञ्जनानामिति प्रतिपादयता ऋग्वेदप्रातिशाख्यकृता शौनकेनोच्यते - 'अक्षराश्रयाः'[५७८] इति, भट्टोजिदीक्षितेन 'उच्चैरुदात्तः' इति सूत्रवृत्तौ उच्यते - 'ताल्वादिषु सभागेषु स्थानेषूर्द्धभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात्' इति। किञ्च उदात्तादयो यदि हलामपि धर्माः स्युः तदा वैदिकसंहितायाम् अज्झीने हलि स्वरः दृश्येत, परन्तु तथा न दृश्यते।

वैदिकसंस्कृतलौकिकसंस्कृतयोः मध्ये अन्यतमो भेदो हि वैदिकसंस्कृते यथा उदात्तादिस्वराणां प्रयोगः आसीत् लौकिकसंस्कृते तथा न परिलक्ष्यते। सर्वे एव वैदिकमन्त्राः स्वरसम्बद्धाः वर्तन्ते। वैदिकसंहिताः विहाय ब्राह्मणेष्वपि कुत्रचित् कुत्रचित् स्वरसद्भावो दृश्यते। सर्वासु संहितासु स्वरचिह्नः न समानः, ऋग्वेदसंहितायाम् उदात्तप्रचयौ चिह्नरहितौ, अनुदात्तः आनुभूमिकरेखाङ्कितः, स्वरितः उपरि उल्लम्बरेखाङ्कितश्च।

वैदिकमन्त्राणां संहितापाठे मन्त्रमध्ये यानि पदानि सन्ति तेषु प्रदत्तः उदात्तादिस्वरः कदाचित् पूर्वपदं कदाचिच्च् उत्तरपदं दृष्ट्वा परिवर्तितो भवति। यथा परवर्तिस्वरः उदात्तः स्वरितो वा भवति चेत् पूर्ववर्तिस्वरः "उदात्तस्वरितपरस्य सन्नतरः"[५७९] इति पाणिनीयसूत्रानुसारेण अनुदात्ततरो भवति, प्रचितं न। तस्मात् प्रत्येकं पदानां पृथक्तया यथार्थस्वरः संहितापाठतः ज्ञातुं न शक्यते। पदपाठकाले पदपाठकृता शाकल्येन न केवलं पदानि विभक्तानि अपि च विभक्तानां सर्वेषां पदानां पृथक्तया स्वरः पदपाठे प्रदर्शितः। एवंप्रकारेण पदानां पृथक्स्वरं दृष्ट्वा तेषां प्रकृतमर्थं कर्तुं शक्यते, यतो हि स्वरपरिवर्तनेन शब्देषु अर्थपार्थक्यं दृश्यते। आद्युदात्तः वेदशब्दः ज्ञानवाची, परन्तु अन्तोदात्तः वेदशब्दः कुशमुष्टिवाची। प्रत्येकं

[५७८] ऋ . प्रा. ३/२

[५७९] पा. सू. १/२/४०

पदानां पृथक्तया स्वरः अवश्यमेव ज्ञातव्यः। यतो हि पदानां स्वरपार्थक्ये अर्थपार्थक्यं भवत्येव। भ्रातृ॑व्यशब्दः आद्युदात्तः भवति चेत् स शत्रुपर्यायः। अयं तु व्यन्-प्रत्ययनिष्पन्नः, ‘ञ्नित्यादिर्नित्यमि’ति[५८०] सूत्रेण आद्युदात्तश्च। पुनः भ्रा॒तृ॒व्य॑शब्दः अन्त्यस्वरितः भवति चेत् स भ्रातुष्पुत्रवाचकः। अयं तु व्यत्-प्रत्ययनिष्पन्नः ‘तित् स्वरितमि’ति[५८१] सूत्रेण अन्त्यस्वरितश्च। किञ्च स्वरपार्थक्यत्वात् अर्थभिन्नत्वे इन्द्रेण वृत्रबधस्य कथा तु अस्माभिः ज्ञातैव । पाणिनिना ये स्वरसम्बन्धिनः नियमाः सूत्रत्वेन अष्टाध्याय्यां प्रणीताः, प्रायेण तेषां सर्वेषामेव नियमानां प्रतिफलनं शाकल्यकृते पदपाठे उपलभ्यते। तेषां कतिपयानामुदाहरणान्यत्र प्रस्तूयन्ते।

पाणिनिना ‘एकादेश उदात्तेनोदात्तः’[५८२] इति सूत्रेण प्रतिपादितं यत् यदा उदात्तानुदात्तयोः द्वयोः स्वरयोः गुणैकादेशः, बृद्ध्येकादेशः, पूर्वरूपैकादेशः, पररूपैकादेशो वा भवति तदा उदात्तस्वर एव अवशिष्यते, नानुदात्तः। यथा ‘अ॒ग्नि+अ॒म्’ इत्यत्र अन्तोदात्तः अग्निशब्दः प्रत्ययस्वरत्वात्, अमः अकारः अनुदात्तः विभक्तिस्वरत्वात् ‘अनुदात्तौ सुप्पितौ’[५८३] इति सूत्रेण। ‘अमि पूर्वः’[५८४] इति सूत्रेण तयोः पूर्वरूपैकादेशे अग्निम् इति रूपं प्राप्यते । अत्र उदात्तानुदात्तयोः एकादेशे उदात्त एव शिष्यते । तेन ‘अ॒ग्निम्’ इति स्वरो भवति। महर्षिणा शाकल्येन पदपाठे पदविभागकाले अस्य नियमस्य बहुत्र प्रयोगः प्रयोगः प्रदर्शितः।

“उप॑ त्वाग्ने दि॒वेदि॑वे॒ दोषा॑वस्तर्धि॒या व॒यम्। नमो॒ भर॑न्त॒ एम॑सि।”[५८५]

इति संहितागतमन्त्रस्य पदपाठ एवं प्रदर्शितः –

[५८०] पा. सू. ६/१/१९७
[५८१] तदेव. ६/१/१८५
[५८२] तदेव. ८/२/५
[५८३] तदेव ३/१/४
[५८४] तदेव ६/१/१०७
[५८५] ऋ. सं. १/१/९

‘उप॑ । त्वा॒ । अ॒ग्ने॒ । दि॒वेऽदि॑वे । दोषा॑ऽवस्तः । धि॒या । व॒यम् । नमः॑ । भर॑न्तः । आ । इ॒म॒सि॒॥’ इति।

संहितापाठे ‘एम॑सि’ इति पदस्य ‘आ+इमसि’ इति सन्धिविच्छेदो भवति, परन्तु एकारोत्तरः यः उदात्तस्वरः स कस्य धर्मः आकारस्य उत इकारस्य तत्तु संहितापाठतः न ज्ञायते। ‘आ। इ॒म॒सि॒।’ इति पदपाठत एव ज्ञातुं शक्यते आकारः उदात्तः, इकारश्चानुदात्तः । किञ्च तयोरेकादेशे उदात्तस्वर एवावतिष्ठते इत्यपि पदपाठतः ज्ञायते। अतः पाणिनिना ‘एकादेश उदात्तेनोदात्तः’[५८६] इति सूत्रेण उदात्तेन सह एकादेशे उदात्तो भवतीति यद् विहितं तेषां प्रकाशनं तु शाकल्येन पदपाठे बहुपूर्वमेव कृतम्। शाकल्येन ‘गोष्वश्वे॑षु’ (ऋ. सं. १/२९/१) इति संहितांशः ‘गोषु॑ । अश्वे॑षु ।’ इति प्रदर्शितः। ‘गोषु॑’ इत्यत्र षकारोत्तरः उकारः स्वरितः, ‘अश्वे॑षु’ इत्यत्र अकारः अनुदात्तः। अत्र यण्-सन्ध्या स्वरितस्य उकारस्य स्थाने वकारादेशे उदात्तेन तस्य संयोगे उदात्तः एव अवशिष्यते इति पदपाठतः प्रतीयते। पाणिनिना ‘तिङ्ङतिङः’[५८७] इति सूत्रेणोपदिष्टं यत् सुबन्तात् पदात् परतः विद्यमानस्य तिङन्तपदस्य सर्वानुदात्तत्वं जायते । अयं नियमोऽपि शाकल्येन प्रकृतमन्त्रस्य पदपाठे विज्ञापित एव। तेन ‘आ । इ॒म॒सि॒।’ इत्यत्र सुबन्तात् परस्य तिङन्तस्य सर्वानुदात्तत्वं प्रदर्शितम् । अन्यत्र च तेन ‘असि॑ । होता॑ । नः॒ । ईड्यः॑ ।’ (ऋ. सं. १/१२/३) इत्यत्र तिङन्तस्य पादादित्वात् सर्वानुदात्तत्वं न प्रदर्श्य प्रक्रियानुसारेण आद्युदात्तः प्रदर्शितः।

अपि च अत्रैव संहितापाठे ‘दि॒वेदि॑वे॒’ इत्यत्र वकारोत्तरः यः अनुदात्तः स तु अनुदात्ततरः, परे उदात्तस्य विद्यमानत्वात् प्रचयस्य अनुदात्ततरत्वं जातम् ‘उदात्तस्वरितपरस्य सन्नतरः’[५८८] इति पाणिनीयसूत्रेण । वस्तुतस्तु पाणिनिना ‘उदात्तस्वरितपरस्य सन्नतरः’ इति सूत्रेण यदुक्तम्

---

[५८६] पा. सू. ८/२/५

[५८७] तदेव ८/१/२८

[५८८] तदेव. १/२/४०

तत्तु शाकल्येन पदपाठे बहुपूर्वमेव प्रदर्शितम् । संहितापाठस्य दि॒वेदि॑वे इति पदस्य पदपाठे दि॒वेऽदि॑वे इत्येवंप्रकारेण प्रदर्शितः। यतो हि पदपाठे पदानां निरपेक्षरूपेण स्वरः प्रदीयते तस्मादत्र पदपाठं दृष्ट्वा ज्ञायते संहितापाठे वकारोत्तरः यः अनुदात्तः स प्रकृत्या प्रचय एव।

'उपसर्गाश्चाभिवर्जम्'[५८९] इति सूत्रेण अभिभिन्नानामुपसर्गाणाम् आद्युदात्तत्वं प्रतिपादितम्। अस्य मन्त्रस्य पदपाठे 'आ' इत्युपसर्गमुदात्तरूपेण प्रदर्श्य नियमोऽयं विज्ञापितः। शाकल्येन पदपाठे अन्यत्रापि अभिभिन्नानाम् उपसर्गाणामाद्युदात्तत्वं प्रदर्शितम्। यथा – "अ॒भि । प्र ।" (ऋ. सं. १/११/२) इत्यत्र अभीत्यस्य अन्तोदात्तत्वं, प्र इत्यस्य आद्युदात्तत्वं प्रदर्शितम्।

पाणिनिना *अष्टाध्यायी*ग्रन्थे 'आमन्त्रितस्य च'[५९०] इति सूत्रं द्विरावृत्तं षष्ठाध्याये अष्टमाध्याये च। षष्ठाध्याये पठितं सूत्रमिदं षाष्ठिकामन्त्रितमित्युच्यते, अष्टमाध्याये उक्तं सूत्रमिदमाष्टमिकामन्त्रितमित्युच्यते। आमन्त्रितं नाम सम्बोधनविभक्त्यन्तं पदम्। षाष्ठिकामन्त्रितेन पादादिस्थितस्य आमन्त्रितस्य आद्युदात्तत्वं विधीयते, आष्टमिकामन्त्रितेन पदात् परस्य अपादादिस्थितस्य आमन्त्रितस्य सर्वानुदात्तत्वं विधीयते। यथा 'राम॑! इहागच्छ' इति वाक्ये 'राम॑!' आद्युदात्तः, परन्तु 'इहागच्छ रा॒म॒!' इति वाक्ये 'रा॒म॒!' सर्वानुदात्तः। पदपाठकृता शाकल्येनापि पदविभागकाले नियमममिमनुसृत्य सम्बोधनविभक्त्यन्तानि पदानि यथायथं स्वरेण प्रदर्शितानि। तेनापि पदपाठे आमन्त्रितपदानां पृथग्रूपेण स्वरप्रदानेन नियमोऽयं विज्ञापितः। शाकल्येन 'अग्ने॑ । यम् । य॒ज्ञम्...' (ऋ. सं. १/१/४) इत्यत्र आमन्त्रितस्य पादादित्वात् आद्युदात्तत्वं प्रदर्शितम्, 'उप॑। त्वा॒। अ॒ग्ने॒। ...' (ऋ. सं १/१/७) इत्यत्र पदात् परे विद्यमानत्वात् सर्वानुदात्तत्वं प्रदर्शितम्।

---

[५८९] फि. सू. ८१

[५९०] पा. सू. ६/१/१९८, ८/१/१९

## ५.६ कम्पस्वरः

पाणिनिना *अष्टाध्यायी*ग्रन्थे स्वरितसंज्ञायाः सूत्रं कृतं 'समाहारः स्वरितः'[५९१] इति। अस्य सूत्रस्य अर्थप्रदर्शनाय भट्टोजिदीक्षितेन वृत्तावुच्यते - 'उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात्' इति। अतः स्वरितस्वरे उदात्तत्वानुदात्तत्वयोः द्वयोः धर्मयोः समावेशो दृश्यते। स्वरितस्वरे कियान् भागः उदात्तः, कियान् अनुदात्तः इति विषये शास्त्रकारा विवदमाना वर्तन्ते। कस्मिंश्चित् पदे द्विधा स्वरितस्वरो भवितुमर्हति – प्रथमतः कस्यचिदुदात्तस्य परावस्थितः अनुदात्तः उदात्तादनुदात्तस्य स्वरितः इति सूत्रेण स्वरितो भवति, द्वितीयतः स्वयमेव स्वरितत्वेन जायते 'तित् स्वरितम्'[५९२], 'तिल्यशिक्यकाश्मर्यधान्यकन्याराजन्यमनुष्याणामन्तः'[५९३] इत्यादिना। अयञ्च स्वयमेव जातत्वात् उदात्तमनपेक्ष्य जातत्वाच्च स्वतन्त्रः जात्यो वाभिधीयते। ऋग्वेदप्रातिशाख्यकृता शौनकेनोच्यते – "उदात्तपूर्वं स्वरितमनुदात्तं पदेऽक्षरम्।" इति, "अतोऽन्यत् स्वरितं स्वारं जात्यमाचक्षते पदे।।"[५९४] इति च। अत्रैव भाष्यकृता उवटेन जात्यस्य स्वरूपप्रसङ्गे उक्तम् - 'जात्या स्वरूपेणैवोदात्तानुदात्तसङ्गतिं विना जातो जात्यः'[५९५] इति। अस्यैव स्वरितस्वरस्य विविधा भेदाः प्रातिशाख्यकारैः, वैयाकरणैः, शिक्षाकारैश्च प्रतिपादिताः। *याज्ञवल्क्यशिक्षायां* स्वरितस्वरस्य अष्टौ भेदाः स्वीकृताः – जात्यः, अभिनिहितः, क्षैप्रः, प्रश्लिष्टः, तैरोव्यञ्जनः, तैरोविरामः, पादवृत्तः ताथाभाव्यश्च। तत्रोच्यते –

'अष्टौ स्वरान् प्रवक्ष्यामि तेषामेव तु लक्षणम्।

---

[५९१] पा. सू. १/२/३१

[५९२] तदेव ६/१/१८५

[५९३] फि. सू. ७६

[५९४] ऋ. प्रा. ३/७-८

[५९५] तदेव, उवटभाष्यम्

जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्टश्च तथापरः।।

तैरोव्यञ्जनसंज्ञश्च तथा तैरोविरामकः।

पादवृत्तो भवेत्तद्वत् ताथाभाव्य इति स्वराः।।'[५९६] इति।

अष्टानां स्वरितानां[५९७] मध्ये जात्याभिनिहितक्षैप्रप्रश्लिष्टेषु चतुर्षु स्वरितेषु वर्तमानः अनुदात्तांशः उदात्ते स्वरिते वा परतः प्रकम्पते। तदायं कम्पस्वरः इत्युच्यते। कम्पस्वरस्य स्वरूपं शौनकेन *ऋग्वेदप्रातिशाख्ये* उच्यते - 'जात्योऽभिनिहितश्चैव क्षैप्रः प्रश्लिष्ट एव च।

एते स्वाराः प्रकम्पन्ते यत्रोच्चस्वरितोदयाः।।'[५९८] इति।

कम्पस्वरितः ह्रस्वस्वरश्चेत् १ इति संख्यया निर्दिश्यते, कम्पस्वरितः दीर्घस्वरश्चेत् ३ इति संख्यया निर्दिश्यते।

अतो दृश्यते यत् कम्पस्वरः क्षैप्रप्रश्लिष्टाभिनिहितसन्धिज्ञानापेक्षी । पदपाठत एव अस्माभिः यथार्थपदविभागेन सन्धयो ज्ञातुं शक्यन्ते । तेन च कम्पस्वरस्य प्रकृतस्वरूपं ज्ञायते ।

## ५.७ पदपाठे प्रतिफलिता वैदिकनियमाः

संस्कृतव्याकरणस्य मूर्द्धण्यस्वरूपं पाणिनीयव्याकरणं न केवलं लौकिकसंस्कृतमेव प्रतिपादयति अपि त्विदं वैदिकसंस्कृतस्य नियमानपि प्रतिपादयति। पाणिनिना स्वकीये *अष्टाध्यायी*ग्रन्थे बहवो वैदिकविधयः सूत्रिताः, ये पदपाठे महर्षिणा शाकल्येन उदाहरणरूपेण विज्ञापिता एव । पाणिनिना 'द्व्यचोऽतस्तिङः'[५९९] इति सूत्रेण प्रतिपादितं यत् वैदिकमन्त्रेषु द्विस्वरविशिष्टस्य अकारान्तस्य तिङन्तपदस्य दीर्घादेशो भवति । *अष्टाध्यायी*ग्रन्थस्यायं नियमो

---

[५९६] या. शि. १८०

[५९७] वाजसनेयिप्रातिशाख्येऽपि स्वरितस्वरस्य अष्टौ भेदाः आलोचिताः । (वा. प्रा. १/१११-१२०)

[५९८] ऋ. प्रा. ३/३४

[५९९] पा. सू. ६/३/१३५

महर्षिणा शाकल्येन संहितापाठतः पदपाठनिरूपणसमये पदविभागमाध्यमेन संहितापाठे अकारान्तानां सर्वेषां दीर्घतिङन्तानां ह्रस्वकरणेन विज्ञापित एव। शाकल्येन 'रक्षा > रक्ष' (ऋ. सं. १/३५/११) 'श्रुधी > श्रुधि' (ऋ. सं ८/९५/४) इत्येवंप्रकारेण सर्वत्र एतादृशानि पदानि विज्ञापितानि। किञ्चात्र पाणिनीयं सूत्रं दृष्ट्वैवायं नियमो अस्माभिर्ज्ञातुं शक्यते इत्युच्यते चेत् तन्न साधु, शाकल्येन तत्पूर्वमपि पदपाठे एतानि उदाहरणानि प्रदर्शितत्वात्। पाणिनिना 'ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम्'[६००] इति सूत्रेण ऋचि विषये तु-नु-घ-मक्षु-तङ्-कु-त्र-उरुष्य इत्येतेषां शब्दानां दीर्घत्वं प्रतिपादितम्। पाणिनिविरचितस्यास्य सूत्रस्य प्रतिफलनमस्माभिः शाकल्यकृते पदपाठे परिलक्ष्यते। महर्षिणा शाकल्येन संहितापाठस्थितानां तू, घा, नू, मक्षू इत्यादीनां दीर्घान्तपदानां पदपाठे सर्वत्रैव ह्रस्वरूपेण प्रतिपादितम्। महर्षिणा शाकल्येन वैदिकसंहितायां समस्तपदमध्ये ये छान्दसदीर्घाः दृश्यन्ते, पदपाठे ते ह्रस्वत्वेन प्रदर्शिताः। यथा – 'ऋतावृधः' > 'ऋतऽवृधः' (ऋ. सं १/१३/६) 'अमित्रायुधः' > 'अमित्रऽयुधः' ( ऋ. सं. ३/२९/१५), 'अन्नावृधम्' > 'अन्नऽवृधम्' (ऋ. सं १०/१/४), 'विश्वापुषम्' > 'विश्वऽपुषम्' (ऋ. सं १/१६२/२२), 'अपीजुवा' > 'अपिऽजुवा' (ऋ. सं २/३१/५), 'घृतावृधा' > 'घृतऽवृधा' (ऋ. सं. ६/७०/४), 'सदनासदे' > 'सदनऽसदे' (ऋ. सं ९/९८/१०) इत्यादीनि। एतान्येव छान्दसदीर्घस्थलानि परवर्तिनि काले 'अन्येषामपि दृश्यते'[६०१] इति सूत्रेण पाणिनिना प्रतिपादितानि।

**५.८ अध्यायसारः**

एवंप्रकारेण सन्धिविषयकाः, समासविषयकाः, स्वरविधिविषयकाः बहवः नियमाः शाकल्येन पदपाठे प्रदर्शिताः ये तस्य वैयाकरणत्वं प्रमाणयन्ति। अतः ऋग्वेदीयपदपाठे

[६००] पा. सू. ६/३/१३३

[६०१] पा. सू. ६/३/१३७

संस्कृतव्याकरणस्य सुग्रथितं चित्रं परिलक्ष्यते अस्माभिः। यद्यपि शाकल्येन एते नियमाः सूत्ररूपेण न ग्रन्थीकृताः परन्तु एते नियमाः तन्मनसि आसन् एव, यतो हि एतानेव आधारीकृत्य शाकल्येन पदपाठे पदविभागादिः प्रदर्शितः। पदपाठे प्रतिफलिताः व्याकरणनियमाः न केवलं शाकल्यस्य वैयाकरणत्वं प्रमाणयन्ति, अपि तु तदानीं शाकल्यसम्प्रदाय इति व्याकरणसम्प्रदायोऽपि आसीदिति अनुमातुं शक्यते। यद्यपि अधुना वेदमन्त्राणां सन्धिविचारकाले, समासविचारकाले, स्वरप्रक्रियाविचारावसरे च पाणिनीयसूत्राण्येव अवलम्ब्यन्ते परन्तु इदमत्रावधेयं यत् शाकल्येन ये सिद्धान्ताः पदपाठे प्रदर्शिताः ते तु पाणिनिमपि स्वरविध्यादिविरचने साहाय्यं व्यदधदिति। न केवलं पाणिनिना ये नियमाः ग्रन्थीकृताः तेषां प्रतिफलनं पदपाठे परिलक्ष्यते, अपि तु बहुत्र पदपाठस्थं पदच्छेदं दृष्ट्वा एव तादृशानां पदानां साधुत्वनिर्णयार्थं पाणिनिना पृथक् सूत्राणि विरचितानि। पदपाठे पृथक् पदच्छेदं दृष्ट्वा अवगम्यते यत् महर्षेः शाकल्यस्य समये पदानाम् एतादृशः प्रयोगः प्रचलितः आसीत्। तदानीन्तनकाले वैयाकरणदिशापि एतेषां पदानां साधुत्वं प्रचलितमासीदित्यनुमीयते। तस्मादेव शाकल्येन पदपाठे ते नियमाः ग्रन्थीकृताः। यतो हि शाकल्यः पाणिनेरपि पूर्ववर्ती तस्मात् पदपाठे प्राप्तैः एतैः प्रमाणैः तस्य प्राचीनवैयाकरणत्वमपि सिद्ध्यत इति शम्।

**उपसंहारः**

"पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना।

आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणम्॥[६०२]"

इति प्रसिद्धेऽस्मिन् व्याख्यानलक्षणे पञ्चविधव्याख्यानेषु प्रथमस्तावत् पदच्छेदः। कस्याश्चित् पङ्क्तेः मन्त्रस्य श्लोकस्य वा अर्थः तावत्पर्यन्तं यथार्थतया अवबोद्धुं न शक्यते यावत्पर्यन्तं तद्गतपदानां विच्छेदो विभागः वा न क्रियते। कस्यचिन्मन्त्रस्य श्लोकस्य वा पदविभागेन पदानां प्रकृतस्वरूपं ज्ञायते। ततः पदविभागादनन्तरं विभक्तानां तेषां पदानां यथार्थतया अन्वयेन एव पङ्क्तेः प्रकृतः अर्थः स्पष्टीभवति। पदविभागे सम्यक् न जाते पदानां प्रकृतान्वयाभावात् अर्थस्य अनिष्टापत्तिरपि भवति। लौकिककाव्येष्वेव एतादृशी स्थितिः वैदिकमन्त्राणां का कथा। वैदिकमन्त्राणां भाषाविषये उच्यते 'निण्या वचांसि' इति। किञ्च वैदिकमन्त्राणां या संस्कृतभाषा सा तु न लौकिकसंस्कृतवत् सम्पूर्णतया नियमानुसारिणी। वैदिकसंस्कृते बहूनां लौकिकनियमानां व्यत्ययः अस्माभिः परिलक्ष्यते। तेषां व्यत्ययानां च यथासम्भवं भगवता पाणिनिना स्वकीये *अष्टाध्यायी*ग्रन्थे उल्लेखो विहितः। वैदिकमन्त्रेषु बहुत्रैव विभक्तिलोपः, विभक्तिस्थाने आदेशः, छान्दसदीर्घत्वम्, छान्दसह्रस्वत्वं च परिलक्ष्यते। अतः वैदिकमन्त्राणामर्थज्ञानाय आदौ मन्त्रगतानां पदानां यथार्थरूपेण विभागः कर्तव्यः। यथार्थतया पदविभागेनैव पदार्थज्ञानं सम्भवति, सर्वेषां पदानामर्थज्ञानादनन्तरञ्च सम्पूर्णस्य मन्त्रस्यार्थज्ञानं सम्भवति। अतः वेदेषु मन्त्रार्थपरिज्ञानं पदविभागेन विना कथमपि न सम्भवति।

शोधप्रबन्धोऽयं मया वर्णनामूलकविश्लेषणरीत्या प्रस्तुतः। प्रबन्धोऽयं मया संस्कृतभाषां तथा देवनागरीलिपिमाश्रित्य प्रस्तुतः। शोधप्रबन्धेऽस्मिन् वर्णाः कोकिलाफन्ट

---

[६०२] प. उप. १८/१७

इत्याधारीकृत्य मुद्रिता वर्तन्ते, अक्षरपरिमितिः च अष्टादश । प्रबन्धेऽस्मिन् ग्रन्थनामानि वक्रलेखेन (Italics) प्रदत्तानि, प्रतिपृष्ठं पादटीका प्रदत्ता, प्रबन्धस्यास्य सूचीपत्रात् परं संकेतसूची वर्तते यत्र पादटीकास्थानां संकेतशब्दानां पूर्णरूपाणि लिखितानि। षट्सु अध्यायेषु विभक्तेऽस्मिन् शोधप्रबन्धे अध्यायान्ते तत्तदध्यायस्य सारः समासेन प्रदत्तः। उपसंहाराभिधेये अस्मिन् षष्ठाध्याये समग्रस्य शोधकार्यस्य नूतनाः दिशः प्रकटिताः । शोधप्रबन्धेऽस्मिन् व्यवहृताः संहितागतमन्त्राः वैदिक-संशोधन-मण्डलात् प्रकाशितात् ऋग्वेदस्य संस्करणात् गृहीताः। शोधकार्ये व्यवहृतं सायणभाष्यमपि अस्मादेव संस्करणाद् संकलितम्। ऋग्वेदस्य स्कन्दस्वामिभाष्यम्, वेङ्कटमाधवभाष्यम्, मुद्गलीया वृत्तिश्च विश्वबन्धुसम्पादितात् विश्वेश्वरानन्दवैदिकशोधसंस्थानतः प्रकाशितात् ऋग्वेदस्य संस्करणात् गृहीताः। प्रबन्धेऽस्मिन् निरुक्तस्य यः क्रमः वर्तते स तु मुकुन्दझाशर्मसम्पादितग्रन्थानुसारी । शोधप्रबन्धेऽस्मिन् पादटीकायां वैदिकमन्त्राणां यः क्रमः स तु मण्डलक्रमः, तत्र आदौ मण्डलसंख्या, ततः सूक्तसंख्या, तदनन्तरञ्च मन्त्रसंख्या प्रदत्ता।

**प्रबन्धसारः**

**उपसंहृत्यां** शोधप्रबन्धेऽस्मिन् अध्यायगतान् सर्वान् विषयान् पर्यालोच्य वक्तुं शक्यते यद् यद्यपि आदौ वैदिकमन्त्राणां संरक्षणाय एव पदपाठस्य समुद्भवः, परन्तु पदपाठकृता शाकल्येन न केवलं वैदिकमन्त्राणां केवलं संरक्षणं कृतम् किञ्च तेन पदपाठे पदविभागेन, छान्दसदीर्घत्वज्ञापनेन, छान्दसह्रस्वत्वज्ञापनेन, तिङन्तपददीर्घत्वज्ञापनेन, अभ्यासदीर्घत्वज्ञापनेन, समासज्ञापनेन, प्रगृह्यत्वज्ञापनेन च सन्दिग्धार्थानां वैदिकमन्त्राणां व्याख्यानकर्मणि बहुधा साहाय्यं विहितम्। निगुढार्थानां निखिलज्ञानमयानां च वैदिकमन्त्राणां कालस्य करालग्रासेन यथा विनाशो न स्यात्तस्मादेव वैदिकमन्त्राणाम् अक्षरशः, पदशः, स्वरशश्च यथार्थतया संरक्षणाय वैदिकसम्प्रदाये विविधाः पाठाः प्रचलिताः। त्रयः प्रकृतिपाठाः

अष्टौ च विकृतिपाठाः। एकादशसु पाठेषु सत्स्वपि वैदिकमन्त्राणामर्थज्ञाने पदपाठ एव प्राधान्यं भजते । अस्माभिरालोचितं यत् वैदिकमन्त्राणां पदपाठे एव मन्त्रगतानां सर्वेषां पदानां यथार्थस्वरूपं वैशद्येन समुद्घाटितम् । अष्टानां विकृतिपाठानां मूलभूतस्तु पदपाठ एव, तेषां विकृतिपाठानां पृथक्पदस्वरूपज्ञानापेक्षित्वात् पदपाठेनैव पदस्वरूपज्ञानाच्च । शाकल्यप्रदर्शितपदपाठेनैव संहितागतमन्त्राणां सन्दिग्धस्थले यथार्थतया मन्त्रार्थज्ञानं तथा मन्त्रार्थव्याख्यानं सम्भवति ।

**द्वितीयाध्याये** अस्माभिर्दृश्यते यत् अखिलज्ञानाधारस्वरूपाणां वैदिकमन्त्राणां व्याख्यानप्रचेष्टा न केवलमद्यत्वे एव प्रचलिता अपि त्वियं व्याख्यानधारा वैदिककालादेव प्रारब्धा परम्पराक्रमेण अद्यावधि प्रचलिता च । "साक्षात्कृतधर्माण ऋषयो बभुवुः। तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुः। उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च ॥"[६०३] इति निरुक्तवचनादेव प्रतीयते यत् पुरा मन्त्रद्रष्टृभिः ऋषिभिः स्वशिष्येभ्यो मन्त्राः उपदिष्टाः, ते च स्वशिष्येभ्यः, एवंप्रकारेण परम्पराक्रमेण वैदिकमन्त्रा अस्माकं सविधे आनीताः। किञ्च पुरा ऋषीणां मानवानाञ्च बुद्धिप्रकर्षात् तेषां सविधे वेदार्थः स्फुटः आसन् परन्तु परवर्तिनि काले मानवानां वुद्धेः तादृशप्रकर्षाभावात् परम्पराप्राप्तानां वेदमन्त्राणामर्थज्ञानं जनानां सविधे साधारणतया असम्भवत्वात् तदाप्रभृत्येव वेदव्याख्यानार्थं वेदाङ्गानि प्रवृत्तानि । तदुत्तरकाले ततोऽपि अल्पधीनां कृते वेदस्य अर्थप्रकाशनाय वेदभाष्याणि भाष्यकृद्भिः विरचितानि । किञ्च वेदाङ्गकाले या व्याख्यानधारा प्रारब्धा सा तु इदानीमपि प्रचलितैव । उत्तरकाले च तस्याः व्याख्यानपरम्परायाः विस्तारश्च जातः। कैश्चित् प्राचीनपद्धतिमतिरिच्य व्याख्यानस्य नवीना पद्धतिरपि आविष्कृता, वेदमन्त्राणामनेकार्थत्वात् एकस्यैव मन्त्रस्य विविधप्रकारकं

---

[६०३] नि. १/२०

व्याख्यानमस्माभिर्लक्ष्यते। अष्टादशशतकोत्तरकाले पाश्चात्त्यविद्वद्भिः वैदिकसाहित्यं विश्वस्य विद्वत्समाजे स्थानं स्वीचकार। अनयैव परम्परानुसारेण प्रचलितया व्याख्यानधारया विश्वसमाजे वेदमाहात्म्यं प्रसारितं प्रचारितञ्च। तेन च समग्रे विश्वे वैदिकसाहित्यस्य विशेषः समादरो दृश्यते सृष्टेः एतावत्परवर्तिकालेऽपि।

**शोधप्रबन्धस्यास्य तृतीयाध्याये** पर्यालोचितं यत् यद्यपि वैदिकमन्त्राणामर्थज्ञानाय वेदस्य व्याख्यानधारा वैदिककालादेव प्रारब्धा, परन्तु तद्व्याख्यानं महर्षिशाकल्यविरचितपदपाठाद् विना सर्वथा असम्भवः आसीत्। पदपाठे पदविभागाभावे कथमेकस्यैव मन्त्रस्य बहुधा पदविभागः कर्तुं शक्यते, तेन च मन्त्रार्थस्यानिष्टापत्तिरपि समापतति इति प्रतिपादितं तृतीयाध्याये। तेषु तेषु सन्दिग्धस्थलेषु पदपाठकृता शाकल्येन पदविभागे न प्रदर्शिते अस्माकं सविधे मन्त्रार्थः अज्ञातः अस्पष्टार्थो वा स्यात्। लौकिकवाक्येष्वेवास्माभिर्दृश्यते यत् एकस्यैव सन्धिकार्यभूतस्य वाक्यांशस्य द्विधा त्रिधा वा सन्धिविच्छेदः कर्तुं शक्यते। यथा 'नर इह' इति कस्मिंश्चिद् वाक्यांशे विसर्गसन्धिं स्वीकृत्य 'नरः', 'इह' इति पृथक् पदद्वयं स्वीकर्तुं शक्यते, पुनः स्वरसन्धिं स्वीकृत्य 'एचोऽयवायावः' इति सूत्रेण एकारस्य अयादेशे 'लोपः शाकल्यस्य' इति सूत्रेण यकारलोपे 'नरे', 'इह' इति पृथक् पदद्वयं स्वीकर्तुं शक्यते। वैदिकमन्त्रेष्वपि संहितापाठे सन्धियुक्तानां पदानां बहुधा सन्धिविच्छेदः कर्तुं शक्यते। तत्र तत्र विविधे पदविभागे सम्भवे कः पदविभागो मन्त्रार्थज्ञाने तथा मन्त्रार्थकरणे इष्टः इति संहितापाठं दृष्ट्वा निर्णेतुं न शक्यते। पदपाठे एव प्रकृतः सन्धिविच्छेदः प्रदर्शितः। पदपाठस्य वैशिष्ट्येषु अन्यतमं हि सन्धियुक्तानां पदानां यथार्थरूपेण सन्धिं विभज्य दण्डेन पृथक् कृत्वा पदानां प्रकृतस्वरूपविज्ञापनम्। एवंप्रकारेण ऋग्वेदसंहिताया येषु स्थलेषु संहितागते मन्त्रे पदविभागमादाय विद्वत्सु मतभेदो दृश्यते उत पदविभागविषये संहितापाठे संशयो दृश्यते तेषु सर्वत्रैव महर्षिणा शाकल्येन विरचितः पदपाठः

प्रमाणत्वेनाङ्गीक्रियते। ऋग्वेदसंहितायाः मन्त्राणां संहितापाठे एकत्र 'निर्ऋत्या आ' अन्यत्र 'निर्ऋत्या इदम्' इति वर्तते । संहितापाठं दृष्ट्वा आपातदृष्ट्या उभयत्रैव 'निर्ऋत्या' इत्यस्य समानविभक्तकत्वे ज्ञाते अपि पदपाठत एव अनयोर्विषमविभक्तिकत्वं प्रतीयते। पदपाठे एकस्मिन् स्थले 'निर्ऋत्यै आ' इति, अन्यत्र 'निर्ऋत्याः इदम्' इति प्रदर्शितम् । पदपाठप्रदर्शितविषमविभक्तिकत्वमादाय एकस्मिन् स्थले चतुर्थ्यन्तरूपेण अन्यत्र षष्ठ्यन्तरूपेण च विषमरूपेण अनयोः अन्वयेन प्रकृतमन्त्रार्थज्ञानमस्माभिः प्राप्यते, अन्यथा पदपाठाभावे मन्त्रार्थज्ञाने अनिष्टापत्तिरागच्छति। कुत्रचित् कुत्रचिद् एकस्मिन् संहितांशे एकं पदमस्ति उत पदद्वयमिति विषये संशयः, कुत्रचित् सन्धियुक्ते पदे द्विधा त्रिधा वा व्याकरणनियमेन पदविभागः कर्तुं शक्यते तत्र प्रत्येकस्मिन् पदविभागपक्षे पदानां पृथगन्वयः प्राप्यते, मन्त्रान्तर्भूतानां पदानां पृथगन्वये स्वीकृते तदा पृथक् मन्त्रार्थः समागच्छति । तदा कः पदविभागः समीचीनः, कथंप्रकारकः अन्वयो यथार्थः, प्रकृतमन्त्रार्थश्च कः इत्यादिविषयमादाय वेदव्याख्यातृषु मन्त्राणां पदपाठाद् विना व्याख्यारचनाकाले संशयाः समापतन्ति । ऋग्वेदसंहितायाः एवंविधेषु सर्वेषु स्थलेषु मन्त्राणां संहितापाठस्य पदानि दण्डेन पृथग् विभज्य उपर्युक्तानां सर्वेषां संशयानां समाधानं विहितम्। अतः यद्यपि परवर्तिनि काले स्कन्दस्वाम्यादिभाष्यकाराः साधारणान् निकषा वेदार्थावगमनाय वेदमन्त्राणां यथार्थतया व्याख्यानं कृतवन्तः परन्तु तेषां व्याख्यारचनाकर्मण्यादावेव महर्षिणा शाकल्येन पदपाठकरणेन साहाय्यं विहितम्। अतोऽस्माभिरेवंप्रकारेण यथार्थपदविभागेन मन्त्रार्थज्ञाने विद्यमानं संशयमपास्य महर्षिणा शाकल्येन यथा मन्त्रार्थव्याख्याने साहाय्यं विहितं तेन तस्य व्याख्यातृत्वं प्रतिपाद्यते ।

अपि च तृतीयाध्याये छान्दसदीर्घत्वमाकारप्रश्लेषं च पर्यालोच्य दृश्यते यत् ऋग्वेदसंहितायाः मन्त्राणां संहितापाठे बहूनि दीर्घान्तानि पदानि परिलक्ष्यन्ते । तेषु दीर्घान्तेषु पदेषु कानिचन प्रकृत्या दीर्घस्वरान्तानि कानिचन च प्रकृत्या ह्रस्वस्वरान्तानि परन्तु वेदस्य

संहितापाठे दीर्घरूपेण विद्यन्ते । एवंप्रकारेण प्रकृत्या ह्रस्वान्तानि पदानि छान्दसदीर्घपदरूपेण उच्यन्ते। कस्मिंश्चित् पदे उपसर्गयोगेनापि दीर्घत्वं परिलक्ष्यते । यथा 'तेन' इति सुबन्तम् 'आ' इत्युपसर्गयोगेन 'तेना' इति भवति। किञ्च उपसर्गयोगेन दीर्घो भवति चेत् मन्त्रगतेन तिङन्तेन तस्योपसर्गस्य अन्वयः कर्तव्यः। वैदिकमन्त्रेषु उपसर्गाः क्रियायाः परं व्यवधानेन च तिष्ठन्ति । तद्विषये पाणिनिनापि सूत्राणि निगदितानि । यदि कुत्रचित् 'आ' इत्युपसर्गस्य प्रश्लेषः स्वीक्रियते तदा तद्गतमन्त्रस्य 'गच्छति' इति तिङन्तस्य 'आगच्छति' इत्यर्थो भवति । तेन च समग्रस्य मन्त्रार्थस्य वैपरीत्यं जायते, किञ्च उपसर्गयोगेन धात्वर्थस्य अन्यत्र गमनं वैयाकरणनिकाये प्रसिद्धमेव । ऋग्वेदसंहितायाम् एकस्मिन् सूक्ते 'अथा' इति छान्दसदीर्घं पदम् अन्यत्र च 'अथा' इत्यत्र 'अथ आ' इति आकारप्रश्लेषो दृश्यते । एकस्मिन्नेव मन्त्रे द्वयोः दीर्घान्तयोः पदयोः एकत्र छान्दसदीर्घत्वमन्यत्र च आकारप्रश्लेषो दृश्यते । एकस्मिन् एव चरणे 'तेना' इत्यत्र 'तेन आ' इति आकारप्रश्लेषो वर्तते, 'अथा' इत्यत्र 'अथ' इति छान्दसदीर्घत्वं वर्तते । संहितापाठे विद्यमानानाम् एवंरूपाणां दीर्घान्तपदानां प्रकृतस्वरूपं मन्त्रार्थज्ञानाय आवश्यकमेव । दीर्घान्तपदानां प्रकृत्या दीर्घत्वमुत छान्दसदीर्घत्वमिति निर्णयाभावे प्रकृतधात्वर्थज्ञानं न जायते, प्रकृतधात्वर्थज्ञानाभावे च सम्पूर्णस्य मन्त्रस्य यथार्थतया अर्थज्ञानं न सम्भवति, अर्थः क्रियते चेत् मन्त्रार्थस्य अनिष्टापत्तेरपि सम्भावना समुदेति। एवंविधेषु स्थलेषु यथार्थतया मन्त्रार्थज्ञानाय तथा मन्त्रार्थव्याख्यानाय पदपाठ एव शरणम्। पदपाठे एव महर्षिणा शाकल्येन पदविभागकाले छान्दसदीर्घाणि पदानि दण्डेन ह्रस्वरूपेण प्रदर्शितानि, दीर्घपदमध्ये आकारस्य प्रश्लेषे सति दण्डेनैव आकारः अन्यः उपसर्गो वा पृथक् प्रदर्शितः। पदपाठे पदविभागाभावे एतेषां संशयापन्नानां पदानां प्रकृतस्वरूपमस्माभिर्न ज्ञायते । पदानां प्रकृतस्वरूपज्ञानाभावे तेषामन्वयः सम्यग् न सम्भवति । अतः पदपाठाभावे प्रकृतमन्त्रार्थः अज्ञात एव स्यात् मन्त्रार्थस्य अन्यथाभावो वा स्यात् । अपि च पदपाठे तिङन्तपदानां तथा अभ्यासदीर्घाणां पदानां

छान्दसदीर्घत्वे न प्रदर्शिते तत्र तत्र तेषां पदानां वैयाकरणदिशा याथार्थ्यमपि न प्रदर्शयितुं शक्यते तादृशस्य व्याकरणविधेरभावात् । अपि चास्मिन् शोधप्रबन्धे पर्यालोचितं यत् महर्षिणा शाकल्येन न केवलं छान्दसदीर्घाणि पदानि पदपाठे ह्रस्वत्वेन प्रदर्श्य मन्त्रार्थकरणे साहाय्यं विहितमपि तु तेन छान्दसह्रस्वानि पदानि पदपाठे दीर्घरूपेण प्रदर्श्य तेषां पदानां प्रकृतस्वरूपं विज्ञाप्य वैदिकमन्त्राणामर्थज्ञाने तथा अर्थव्याख्याने भाष्यकारेभ्यो विशिष्टं साहाय्यं प्रतिपादितम्। एवंप्रकारेण ऋग्वेदस्य पदपाठकृता महर्षिणा शाकल्येन पदपाठे पदविभागमाध्यमेन वेदव्याख्यानकर्मणि सहायता विहिता । किञ्च आदौ तेनैव पदपाठेन वैदिकमन्त्राणां व्याख्या विहिता । तेन ऋग्वेदसंहितायाः सर्वेषां मन्त्राणां पदपाठप्रदर्शनत्वात् तत्पूर्ववर्तिनि ब्राह्मणग्रन्थादिषु सर्वेषां मन्त्राणां व्याख्यानप्रदर्शनाभावाच्च स एव ऋग्वेदस्य प्रथमो व्याख्याकृदित्यपि न अत्युक्तिर्भवति ।

**चतुर्थाध्याये** संशयापन्नानां मन्त्राणां पर्यालोचनया अस्माभिः परिलक्ष्यते यत् पदपाठकृता शाकल्येन यथा सम्यक् पदविभागेन पदानां प्रकृतस्वरूपं विज्ञाप्य मन्त्रार्थज्ञाने तथा मन्त्रार्थव्याख्याने साहाय्यं विहितं तथैव अवग्रहप्रदानेन इतिकरणेन च संशयापन्नानां मन्त्राणामर्थज्ञाने महानुपकारः साधितः। वैयाकरणनिकाये प्रसिद्धमेतद् यत् कस्मिंश्चित् पदे समासवृत्तेः सद्भावाद् वाक्ये अर्थपार्थक्यं परिलक्ष्यते । नीलः कण्ठः चेति पृथक् पदयोः सतोः यमर्थं प्रकाशयतः, अनयोर्मध्ये समासे सति न तमर्थं प्रकाशयतः, तदा तु अर्थपार्थक्यं भवत्येव। 'नीलः, कण्ठः' इति पृथगवस्थिते सति नीलवर्णविशिष्टस्य कण्ठस्य बोधो जायते, परन्तु 'नीलकण्ठः' इत्युक्ते न कण्ठविशेषस्यापि तु नीलकण्ठस्य परमेश्वरस्य शिवस्य बोधो भवति । किञ्च द्वयोः पदयोः सन्धिकार्येण यथा रूपं प्राप्यते समासवृत्त्यापि तथैव रूपं प्राप्यते, समासे सन्धेरावश्यकत्वात् । अतः सन्धियुक्ते वाक्यांशे समासोऽस्ति उत न इति ज्ञानादनन्तरं तस्य वाक्यांशस्य अर्थबोधो सम्भवः । ऋग्वेदसंहितायाः मन्त्राणां संहितापाठे एवं बहूनि पदानि सन्ति,

यत्र आपातदृष्ट्या समासोऽस्ति उत सन्धिरिति न ज्ञायते, तज्ज्ञानाभावे पदानां पृथगन्वयः कर्तुं न शक्यते, पृथगन्वयज्ञानाभावे च पृथक्तया पदानामर्थो न ज्ञायते। अतः समासवृत्तेर्ज्ञानाभावात् मन्त्राणामर्थावबोधो यथार्थतया न सम्भवः। सम्यग्रूपेण तन्न ज्ञात्वा अर्थः क्रियते चेत् मन्त्रस्यानिष्टापत्तिरपि सम्भवति । महर्षिणा शाकल्येन पदपाठे सर्वत्र समस्तपदमध्ये पूर्वोत्तरपदयोर्मध्ये अवग्रहं प्रदाय समासः सूचितः। अवग्रहेण समासज्ञानेन पदानां प्रकृतस्वरूपं तथा पदानामर्थो ज्ञायते। ऋग्वेदसंहितायां द्वयोः मन्त्रयोः एकरूपमेव पदं परिलक्ष्यते, यस्य एकत्र सुबन्तत्वमन्यत्र तिङन्तत्वञ्च परिलक्ष्यते। परन्तु कुत्र सुबन्तत्वं कुत्र तिङन्तत्वमिति अवग्रहं परिलक्ष्य एव ज्ञातुं शक्यते । महर्षिणा शाकल्येन संहितापाठतः पदपाठकरणसमये एकत्र 'अवसाय' इति संहितागतं पदं सावग्रहं प्रदर्शितम्, अन्यत्र च अवग्रहेण विना प्रदर्शितम् । उभयत्र अवग्रहविद्यमानतां परिलक्ष्यैव सुबन्तत्वं तिङन्तत्वञ्च अवगम्यते। एकत्र 'अवसाय' इति पदे अवग्रहो न प्रदत्तश्चेत् तत्र गतिसमासः केनाप्युपायेन ज्ञातुं न शक्यते । गतिसमासज्ञानाभावे तस्य तिङन्तत्वं केनापि प्रकारेण न ज्ञायते। अपरत्रापि अवग्रहः प्रदत्तश्चेत् तत्रापि तिङन्तत्वं समापतेत्। परन्तु तत्र अवग्रहं न प्रदाय तस्य सुबन्तत्वं प्रतिपादितं महर्षिणा शाकल्येन। अतः पदपाठत एव एकस्यैव पदस्य एकत्र सुबन्तत्वमन्यत्र तिङन्तत्वं ज्ञायते। तज्ज्ञानेन च यथार्थतया मन्त्रार्थज्ञानं तथा मन्त्रार्थव्याख्यानं सम्भवति। यथा महर्षिणा शाकल्येन समस्तपदमध्ये अवग्रहप्रदानेन पदपाठे समासः सूचितः तथैव प्रगृह्यसंज्ञकेभ्यः पदेभ्यः आद्युदात्तम् इतिशब्दं प्रदाय सन्धिनिषेधकारणं विज्ञापितं प्रगृह्यत्वञ्च सूचितम्। इतिकरणेन न केवलं शाकल्येन प्रगृह्यत्वं सूचितमपि तु प्रगृह्यत्वज्ञापनेन तेन बहुत्र पदस्य प्रकृतस्वरूपं विज्ञाप्य मन्त्रार्थज्ञाने तथा मन्त्रार्थव्याख्याने महान् उपकारः साधितः। पदपाठे इतिकरणं दृष्ट्वैव 'वेदी' इति पदस्यार्थो 'वेद्याम्' इति प्राप्तुं शक्यते, 'गौरी' इति पदस्यार्थः 'गौर्य्याम्' इति कर्तुं शक्यते। पदपाठकृता इतिकरणं न कृतं चेत्तदा केवलं संहितापाठमादाय 'वेदी' इति पदे 'गौरी' इति पदे

च सप्तमीविभक्तिरस्ति इति केनाप्युपायेन अवबोद्धुं न शक्यते । तत्र तत्र पदेषु सप्तमीविभक्तेर्ज्ञानाभावाच्च 'वेदी' इति पदस्य 'देव' इति पदेन सह, 'गौरी' इति पदस्य 'सोम' इति पदेन सह अन्वयापत्तिर्भवेत् । तदा पदानां यथार्थरूपेण अन्वयाभावात् प्रकृतमन्त्रार्थोऽपि केनाप्युपायेन न ज्ञापितो भवति । एवंप्रकारस्य दृष्टान्तः ऋक्संहितायाः बहुत्र प्राप्यते यत्र शाकल्यः इतिकरणेन मन्त्राणां प्रकृतमर्थं ज्ञापितवान् तथा वेदव्याख्यानकर्मणि भाष्यकारान् महदुपकारं साधितवान् । एवंप्रकारेण महर्षिणा शाकल्येन संहितागतमन्त्राणां यथायथं पदानि विभज्य, छान्दसदीर्घत्वं छान्दसह्रस्वत्वञ्च प्रदर्श्य, समासं विज्ञाप्य, प्रगृह्यत्वं विज्ञाप्य मन्त्रगतपदानां सम्यगन्वयकरणे, प्रकृतमन्त्रार्थज्ञाने च बहुधा साहाय्यं विहितम् ।

**पञ्चमाध्याये** विषयान् पर्यालोच्य एवं वक्तुं शक्यते यत् वैदिकमन्त्राणां यथार्थरूपेण संरक्षणाय समुद्भाविते पदपाठे यथा मन्त्रार्थो विज्ञापितस्तथैव पदपाठे पदविभागावसरे विविधानां व्याकरणनियमानां स्वरविधीनाञ्चोल्लेखः अस्माभिर्दृश्यते । मन्त्राणां संहितापाठे पदेषु प्रयुक्ताः उदात्तादिस्वराः परस्परसापेक्षाः वर्तन्ते, तस्मात् संहितापाठतः पदानां पृथक् स्वरः स्पष्टतया न प्रतीयते। पदपाठस्यापरमेकं महत् वैशिष्ट्यं यत् पदविभागकाले महर्षिणा शाकल्येन दण्डेन पदानि सस्वराणि एव विभक्तानि । अतः पदपाठत एवास्माभिः प्रत्येकं पदानां पृथक् स्वरो ज्ञातुं शक्यते । प्रत्येकं पदानां पृथग्रूपेण स्वरज्ञानेन वैदिकस्वरविषये सुस्पष्टं चित्रमस्माभिर्लभ्यते। स्वरज्ञानम् अनादाय मन्त्रस्य फलवैपरीत्यविषये वृत्रोपाख्यानमस्माभिर्ज्ञातमेव । अतो व्याकरणनियमैः स्वरनियमैश्च पदपाठे संस्कृतव्याकरणस्य प्राचीनतमं सुसंबद्धं चित्रं परिलक्ष्यते। यद्यपि वैयाकरणेन शाकल्येन कोऽपि व्याकरणग्रन्थः न विरचितः, उत विरचितश्चेत् स ग्रन्थः अस्माभिर्न दृग्गोचरीभूतः, परन्तु पदपाठे उदाहरणमुखेन प्रदत्तैः तैः व्याकरणनियमैः अस्माभिः महर्षेः शाकल्यस्य वैयाकरणत्वमपि प्रतिपादयितुं शक्यते ।

**शोधप्रबन्धस्यास्य काश्चन नूतना दिशः**

- प्रबन्धेऽस्मिन् अष्टानां विकृतिपाठानां मूलभूतः कथं पदपाठः इति प्रतिपादनप्रयासो विहितः।
- ऋषिभिर्दृष्टे संहितागते वेदमन्त्रे सर्वाणि पदानि सन्धिसमासादिकार्ययुक्तानि भवन्ति। तस्मात् मन्त्राणां संहितापाठं दृष्ट्वा मन्त्रमध्ये सन्धिरस्ति उत समासः इति यथार्थतया निर्णेतुं न शक्यन्ते। किञ्च सन्धिसमासादिनिर्णीतेऽपि तत्र कः सन्धिः जातः, कीदृशः पदविभागश्च इष्टः इति केवलं पदपाठस्थं पदविभागमादायैव ज्ञातुं शक्यते। तस्मात् सन्दिग्धपदविभागस्थले प्रकृतपदविभागज्ञानाय कथं शाकल्य एव शरणं तत् युक्त्या प्रदिपादनप्रयासः मया प्रबन्धेऽस्मिन् कृतः।
- वैदिकसंहितायाः अन्यतमं वैशिष्ट्यं ह्यत्र लौकिकव्याकरणनियमानां कुत्रचित् कुत्रचित् व्यत्ययः परिलक्ष्यते। वैदिकसंहितायां दीर्घस्वरान्तानि पदानि बहुत्र परिलक्ष्यन्ते, परन्तु तेषु दीर्घान्तपदेषु कुत्र पदं प्रकृत्या दीर्घस्वरान्तं कुत्र च व्यत्ययेन छान्दसदीर्घत्वं जातमिति अस्माभिः केवलं पदपाठत एव ज्ञायते। तस्मात् छान्दसदीर्घत्वज्ञापनेन तथा छान्दसह्रस्वत्वज्ञापनेन महर्षिणा शाकल्येन कथं मन्त्रार्थज्ञाने व्याख्याने च साहाय्यं विहितमिति सोदाहरणं सयुक्तिकञ्च प्रतिपादनप्रयासः अस्मिन् शोधप्रबन्धे मया विहितः।
- यद्यपि इदानीं संस्कृतकाव्येषु तथा वाक्येषु अवग्रहस्य व्यवहारः आधिक्येन न परिलक्ष्यते परन्तु अवग्रहस्य माहात्म्यं तु अनवद्यम्। संहितागतेस मन्त्रे कस्मिंश्चित् पदे समास अस्ति उत न इति केवलम् अवग्रहेणैव ज्ञातं शक्यते। प्रबन्धेऽस्मिन् मया महर्षिणा शाकल्येन अवग्रहप्रदानेन कथं प्रकृतमन्त्रार्थो विज्ञापित इति सोदाहरणं सयुक्तिकं प्रतिपादितम्।

- वर्तमाने अस्माभिः केवलं प्रगृह्यत्वज्ञापनाय पदात् अनन्तरम् इति-शब्दस्य प्रयोगः क्रियते। परन्तु महत्याः वैदिकसंहितायाः अर्थज्ञाने शाकल्येन कथम् इतिकरणेन (इति-शब्दस्य प्रयोगेन) कथं साहाय्यं विहितं तत् सोदाहरणं सयुक्तिकञ्च प्रतिपादितम्।
- वर्तमाने संस्कृतव्याकरणस्य शिरोभूतो ग्रन्थो हि पाणिनिविरचिता *अष्टाध्यायी* । अष्टाध्याय्यामेव संस्कृतभाषायाः सर्वेषां शब्दानां साधुत्वासाधुत्वविचारः प्रतिपादितः। परन्तु पाणिनेः पूर्ववर्तिनि काले महर्षिणा शाकल्येनापि स्वकीये पदपाठे संस्कृतव्याकरणस्य सुग्रथितं चित्रं प्रतिपादितम्। यद्यपि तेन सूत्राणि न विरचितानि परन्तु मन्त्राणां संहितापाठतः पदपाठप्रदर्शनकाले ते व्याकरणनियमाः सम्यक् प्रतिपादिताः।

अत्रेदमवधेयं यत् यद्यपि इदानीन्तने काले सर्वाणि स्कन्दस्वामिसायणाचार्यादीनां वेदभाष्याणि दृष्ट्वा मन्यते भाष्येणैव सर्वं वेदार्थं ज्ञातुं शक्यते उत पाणिनीयव्याकरणस्य सूत्राणि आदाय सन्दिग्धस्थलेषु यथार्थः पदविभागः कर्तुं शक्यते, उत *अष्टाध्यायी*ग्रन्थस्थानि वैदिकसूत्राणि आदाय व्यत्ययस्थलेषु प्रकृतः पदच्छेदः कर्तुं शक्यते, तन्न साधु। वेदाङ्गोत्तरकाले पाणिनेः प्रादुर्भावात् पूर्वमपि सुसंकलितव्याकरणनियमानां विद्यमानाभावे तदानीन्तनकाले केवलं वैदिकमन्त्राणां संहितापाठमादाय भाष्यकृद्भिरपि वेदार्थप्रकाशः असम्भवः आसीत्, मादृशानां मन्दधीनां का कथा! पाणिनेरपि पूर्ववर्तिनि काले वेदार्थप्रकाशयितॄणां सविधे पदपाठ आसीत् अद्वितीयः आश्रयः। अतोऽस्माभिः बहुत्रैव भाष्यकृद्भिः मन्त्रार्थकरणकाले केवलं पदपाठस्थान्येव पदानि आलोचितानि, संहितापाठतः पदपाठे पदानां स्वरूपपरिवर्तनेऽपि तद्विषये किमपि नोक्तानि। यद्यपि वेदद्रष्टृभिः ऋषिभिः संहितापाठगता मन्त्राः एव प्राप्ताः परन्तु प्रायेण परिलक्ष्यते यत् भाष्यकृद्भिः वेदस्य पदपाठमादाय एव मन्त्राः व्याख्याताः। किञ्च अर्वाचीनैः विद्वद्भिः यदि एवमपि उच्यते यत् पाणिनीयं स्वरविधिं दृष्ट्वा स्वरसन्दिग्धस्थलेषु प्रकृतमन्त्रार्थः ज्ञातुं शक्यते, तदपि न साधु।

इदमत्र ज्ञातव्यं यत् शाकल्यस्य पाणिनेः पूर्ववर्तित्वात् पाणिनीयसूत्राणि आदाय तदानीन्तने काले स्वरसंशयमपास्य मन्त्रार्थकरणम् असम्भवमासीत्। अपि त्वेवं वक्तुमुचितं यत् महर्षिणा शाकल्येन पदपाठे उदाहरणमुखेन यत् विज्ञापितं तत्तु पाणिनिमपि स्वरविधिविरचने साहाय्यं व्यदधत्। तथापि महर्षेः शाकल्यस्य नाम वेदस्य पदपाठकर्तृरूपेण सर्वत्र प्राप्यते परन्तु कुत्रापि वेदभाष्यकाररूपेण तस्य गणना नोपलभ्यते। अतः अनेन शोधप्रबन्धप्रयासेन शाकल्यस्य वेदव्याख्यातृत्वेन गणना कर्तव्या, यतो ह्यत्रास्माभिर्दृश्यते यत् प्रायेण सर्वत्र भाष्यरचनायां भाष्यकाराणां स एव प्रथमः शरणम्।

"सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुकारिभिः।

स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥[६०४]"

इति भाष्यलक्षणं यथार्थरूपेण महर्षिशाकल्यविरचिते पदपाठे न संगतेऽपि प्रायेण सर्वेषां मन्त्राणां पदविभागेन महर्षिणा शाकल्येन मन्त्राणां व्याख्यानं तु विहितमिति स्पष्टतयास्माभिः परिलक्ष्यते। यद्यपि पदपाठात् पूर्वमपि वैदिकसंहितायां वेदार्थज्ञानप्रशंसा परिलक्ष्यते, प्रसङ्गेन वेदार्थप्रकाशनञ्च दृश्यते, ब्राह्मणग्रन्थेषु च कुत्रचित् कुत्रचित् विविधप्रसङ्गेन मन्त्रगतपदानां निर्वचनमुखेन अर्थः प्रदर्शितः, कुत्रचिच्च विधेः प्रशंसार्थम् अर्थवादरूपेण मन्त्रव्याख्यानोपयोगीनि आख्यानानि च प्रतिपादितानि, तेषु कुत्रचित् पदविभागादिना पदशः, मन्त्रशो वा समग्रायाः ऋग्वेदसंहितायाः अर्थप्रदर्शनाभावात् महर्षिः शाकल्यः ऋग्वेदस्य आदिमो व्याख्याकार इत्यपि न अत्युक्तिर्भवतीति अयं प्रबन्धः विदुषां सविधे विचाराय मया आनीतः इति शिवम्।

---

[६०४] प. उप. १८/१५

# परिशिष्टम्

## शोधप्रबन्धधृतमन्त्राणां सूची


| | पृष्ठाङ्कः |
|---|---|
| अपे॑हि मनसस्पतेऽप॑ क्राम प॒रश्च॑र ।... (ऋ. सं. १०.१६४.१) | ११४ |
| अबो॑ध्य॒ग्निर्ज्म उदे॑ति॒ सूर्यो॑ ... (ऋ. सं १.१५७.१) | १२२ |
| अ॒रु॒णो मा॑स॒कृद्वृकः॑ प॒था यन्तं॑ द॒दर्श॑ हि...(ऋ. सं. १.१०५.१८) | ८२ |
| अव॑ सृजा वनस्पते देव॑ दे॒वेभ्यो॑ ह॒विः।... (ऋ. सं. १.१३.११) | १४४ |
| अ॒स्मा इदु॒ स्तोमं॒ सं हि॑नोमि॒ रथं॒ न तत्सि॑नाय ।...(ऋ. सं १.६१.४) | १८४ |
| आ जु॑होता स्वध्व॒रं शी॒रं पा॑व॒कशो॑चिषम् ।... (ऋ. सं ३.९.८) | १४१ |
| इन्द्रा॑वरुण वा॒महं हु॒वे चि॒त्राय॒ राध॑से ।... (ऋ. सं १.१७.७) | १५० |
| ईळे॑ च त्वा॒ यज॑मानो ह॒विर्भि॒रीळे॑... (ऋ. सं ३.१.१५) | १३८ |
| उ॒त त्वः॒ पश्य॒न्न द॑दर्श॒ वाच॑मु॒त त्वः॑ ... (ऋ. सं. १०.७१.४) | २९ |
| उप॑ त्वाग्ने दि॒वेदि॑वे॒ दोषा॑वस्तर्धि॒या व॒यम्।... (ऋ. सं १.१.७) | २१९ |
| उप नो देवा अवसा गमयन्त्वङ्गिरसां सामभिः... (ऋ. सं १.१०७.२) | १२३ |
| ऋ॒चो अ॒क्षरे॑ पर॒मे व्यो॑म॒न्यस्मि॑न् दे॒वा अधि॒... (ऋ. सं १.१६४.३९) | ३० |
| ऋ॒तस्य॑ वा के॒शिना॑ यो॒ग्याभि॑र्घृ॒तस्नु॑वा॒ रोहि॑ता... (ऋ. सं ३.६.६) | १३२ |
| ऋ॒तुर्जनि॑त्री तस्या॑ अ॒पस्परि॑ म॒क्षु जा॒त... (ऋ. सं २.१३.१) | १२७ |

च॒क्राथे॒ हि स॒ध्र्य॑१ङ्नाम॑ भ॒द्रं स॑ध्रीची॒ना ... (ऋ. सं १.१०८.३) १३५

च॒त्वारि॒ वाक्परि॑मिता प॒दानि॒ तानि ..(ऋ. सं १.१६४.४५) ३१

च॒न्द्रमा॑ अप्स्व॒॑१न्तरा सु॑प॒र्णो धा॑वते दि॒वि...(ऋ. सं १.१०५.१) १११

तमी॒मण्वी॑ः सम॒र्य आ गृ॒भ्यन्ति॒ योष॑णो॒ दश॑... (ऋ. सं ९.१.७) १७५

त्वम॑ग्ने प्रय॑तदक्षिणं॒ नरं॒ वर्मे॑व स्यू॒तं परि॑ पासि वि॒श्वतः॑.. (ऋ. सं.१.३१.१५) ९०

त्रि॒व॒न्धु॒रेण॑ त्रि॒वृता॒ रथे॑न त्रिच॒क्रेण॑ सु॒वृता ...(ऋ. सं. १.११८.२) १२८

त्री रो॑च॒ना दि॒व्या धा॑रयन्त हिर॒ण्ययाः॑ ...(ऋ. सं २.२७.९) १७३

देवं॑ बर्हि॒र्वर्ध॑मानं सु॒वीरं॑ स्ती॒र्णं रा॒ये... (ऋ. सं. २.३.४) १८८

देवाः॑ क॒पोत॑ इषि॒तो यदि॒च्छन्दू॒तो... (ऋ. सं. १०.१६५.१) ११४

द्यावा॑ चिदस्मै पृथि॒वी न॑मेते॒ ...(ऋ. सं २.१२.१३) १९६

न जा॒मये॒ तान्वो॑ रि॒क्थमा॑रैक्च॒कार॒...(ऋ. सं. ३.३१.२) ८३

न यं दिप्स॑न्ति दिप्स॑न्ति दि॒प्सवो॒...(ऋ. सं १.२५.१४) ३२

नव्यं॑ तदु॒क्थ्यं॑ हि॒तं देवा॑सः...(ऋ. सं. १.१०५.१२) १४५

नू नो॑ र॒यिमुप॑ मास्व नृ॒वन्तं॑...(ऋ. सं ९.९३.५) १८०

प्र सा क्षि॒तिर॑सुर॒ या महि॑...(ऋ. सं १.१५१.४) १५०

प्रा॒ता रथो॒ नवो॑ योजि॒...(ऋ. सं २.१८.१) २०६

बृ॒हत्स्वश्च॑न्द्र॒मम॑व॒द्यदु॒...(ऋ. सं १.५२.९) १७७

बृहन्त इद्भानवो भाऋजीक...(ऋ. सं ३.१.१४) १८३

मदच्युत्क्षेति सादने...(ऋ. सं ९.१२.३) १९१

मध्व: सोमस्याश्विना...(ऋ. सं १.११७.१) १२६

मयोभूर्वातो अभि वातूस्रा...(ऋ. सं १०.१६९.१) १७०

मही अत्र महिना वारमृण्व... (ऋ. सं १.१५१.५) १९३

मा नो वृकाय वृक्ये ...(ऋ. सं ६.५१.६) १०२

य इन्द्राग्नी चित्रतमो... (ऋ. सं. १.१०८.१) १३०

युवं दक्षं घृतव्रत... (ऋ. सं १.१५.६) १४७

युवं वस्त्राणि पीवसा...(ऋ. सं १.१५२.१) २०७

योनिष्ट इन्द्र निषदे ...(ऋ. सं १.१०४.१) १६७

वने न वा यो न्यधायि ...(ऋ. सं १०.२९.१) ८५

वव्राजा सीमनदतीरदब्धा... (ऋ. सं ३.१.६) १४०

वहन्ति सीमरुणासो रुशन्तो...(ऋ. सं ६.६४.३) १००

वातेवाजुर्या नद्येव रीति... (ऋ. सं २.३९.५) १२४

विद्मा हि त्वा धनंजयं... (ऋ. सं ३.४२.६) १४२

शुनश्चिच्छेपं निदितं... (ऋ. सं ५.२.७) १५३

स घा नो योग आ ...(ऋ. सं १.५.३) १०५

सध्रीमा यन्ति परि बिभ्रतीः ...(ऋ. सं २.१३.२) १०८

स यन्ता विप्र एषां स... (ऋ. सं ३.१३.३) १३४

स वां यज्ञेषु मानवी ...(ऋ. सं ९.९८.९) १९७

सास्मा अरं प्रथमं स ...(ऋ. सं २.१८.२) ९७

सुप्रवाचनं तव वीर...(ऋ. सं २.१३.११) ९४

सो अग्ने अह्नां हरिर्हर्यतो... (ऋ. सं ९.८६.४२) १५५

# निर्वाचितग्रन्थपञ्जिः

## संस्कृतग्रन्थाः

*अथर्ववेदः* (शौनकीयः) (१मो भागः). सम्पा. विश्वबन्धुः. होसिआरपुरम्: विश्वेश्वरानन्दवैदिकशोधसंस्थानम्,२०१७ वि.

*अथर्ववेदः* (शौनकीयः) (२यो भागः). सम्पा. विश्वबन्धुः. होसिआरपुरम्: विश्वेश्वरानन्दवैदिकशोधसंस्थानम्,२०१८ वि.

*अथर्ववेदप्रातिशाख्यम् अथवा अथर्ववेदीया चतुरध्यायिका*. सम्पा. डा. जमुनापाठकः. वाराणसी: चौखाम्बा विद्याभवन, २०१५.

*अथर्ववेदीया माण्डूकीशिक्षा*. सम्पा. भगवद्दत्तः. नइ दिल्ली: मेहरचन्द लछमनदास पब्लिकेशन्स, २००९ (पुनर्मुद्रणम्) (प्रथममुद्रणम् १९२१).

*ऋग्वेदः*(१मो भागः). सम्पा. विश्वबन्धुः. होसिआरपुरम्: विश्वेश्वरानन्द-वैदिकशोधसंस्थानम्, २०२१ वि.

*ऋग्वेदः*(२यो भागः). सम्पा. विश्वबन्धुः. होसिआरपुरम्: विश्वेश्वरानन्द-वैदिकशोधसंस्थानम्, २०२१ वि.

*कृष्णयजुर्वेदीयतैत्तिरीयसंहिता* (प्रथमो द्वितीयभागश्च). सम्पा. विनायक गणेश आपटे. पुणे: आनन्दाश्रममुद्रणालयः, १९४०.

चतुर्वेदी, रामनारायणः. *वेदवाङ्मयविमर्शः*. जयपुर-६: श्री राजेश्वरी प्रिन्टार्स, १९७०.

*तैत्तिरीयारण्यकम्*. (प्रथमो भागः) सम्पा. हरिनारायण आपटे. पुणे: आनन्दाश्रममुद्रणालयः, १८९८.

*तैत्तिरीयारण्यकम्*. (द्वितीयो भागः) सम्पा. विनायक गणेश आपटे. पुणे: आनन्दाश्रममुद्रणालयः, १९२७.

दीक्षितः, भट्टोजी. *वैयाकरणसिद्धान्तकौमुदी*. सम्पा. गोपालशास्त्री नेने. वाराणसी-१: चौखाम्बा संस्कृत सीरीज आफिस, १९७७.

दीक्षितः, भट्टोजी. *वैयाकरणसिद्धान्तकौमुदी.* (प्रथमो भागः) सम्पा. गिरिधर-शर्मा परमेश्वरानन्द-शर्मा च. दिल्ली: मोतिलाल बनारसीदास, २०१४ (द्वादशसंस्करणम्) (प्रथमसंस्करणम् १९६१).

दीक्षितः, भट्टोजी. *वैयाकरणसिद्धान्तकौमुदी.* (चतुर्थो भागः) सम्पा. गिरिधर-शर्मा परमेश्वरानन्द-शर्मा च. दिल्ली: मोतिलाल बनारसीदास, २०११ (षष्ठसंस्करणम्) (प्रथमसंस्करणम् १९७९).

निगमालङ्कारः, सत्यदेवः. *पाणिनीयवैदिकसूत्रमीमांसा.* (प्रथमो द्वितीयो भागश्च). दिल्ली: प्रतिभाप्रकाशनम्, २००९.

पतञ्जलिः. *व्याकरणमहाभाष्यम्.* सम्पा. हरिनारायणतिवारी. वाराणसी: चौखाम्बा विद्याभवन, २०१४.

*पराशरोपपुराणम्.* सम्पा. कपिलदेवत्रिपाठी. वाराणसी: सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, १९९०.

*पाणिनीयधातुपाठः.* सम्पा. नरेश झा. वाराणसी: चौखाम्वा सुरभारती प्रकाशन, २०१२.

*पाणिनीयशिक्षा.* सम्पा. बालकृष्णः शर्मा सन्तोषः पण्ड्या च. उज्जयिनी: कालिदास-अकादेमी, २०५० विक्रमाब्दः.

पालः, विजयः. *अष्टाध्यायीशुक्लयजुर्वेदप्रातिशाख्ययोः मतविमर्शः.* बहालगड़: पाणिनिमहाविद्यालयः, १९८३.

*महाभारत.* अनु. साहित्याचार्य पण्डित रामनारायण पाण्डेय. गोरक्षपुर: गीताप्रेस, २०७२ सं.

माधवाचार्यः, *जैमिनीयन्यायमाला.* सम्पा. रामनाथशास्त्री, पट्टाभिरामशास्त्री. बनारस सिटी (अधुना वाराणसी): चौखम्बा संस्कृत सीरिज आफिस, १९९४.

मेदिनीकरः, *मेदिनीकोशः.* सम्पा. जगन्नाथशास्त्री, वाराणसी: चौखम्बा संस्कृत सीरिज आफिस, १९६८.

*याज्ञवल्क्यशिक्षा.* शिक्षावल्लीविवृत्तिसहिता. सम्पा. अमरनाथशास्त्रिदीक्षितः. वनारस सिटि (अधुना वाराणसी): पद्मनाभशर्मादीक्षितः, १९९४ विक्रमाब्दः.

यास्कः, *निरुक्तम्.* मुम्बयी: क्षेमराज-श्रीकृष्णदासश्रेष्ठी, १८३४.

*रावणभाष्यम्*. सम्पा. सुधीरकुमारगुप्तः. जयपुर : राजस्थानविश्वविद्यालयः, १९६७.

वरदराजः, *लघुसिद्धान्तकौमुदी* (१मः – ६ष्ठो भागः). सम्पा. भीमसेन शास्त्री. दिल्ली: भैमी प्रकाशनम्, २०१५ (षष्ठप्रकाशः) (प्रथमप्रकाशः १९८०).

शबरस्वामी. *जैमिनीय-मीमांसा-भाष्यम्*. (प्रथमो भागः) सम्पा. युधिष्ठिरमीमांसकः स्वविरचितया आर्षमतविमर्शन्या हिन्दीव्याख्यया सहितम्. हरियाणा: रामलाल कपुर ट्रस्ट, २०२०.

शबरस्वामी. *जैमिनीय-मीमांसा-भाष्यम्*. (द्वितीयो भागः) सम्पा. युधिष्ठिरमीमांसकः स्वविरचितया आर्षमतविमर्शन्या हिन्दीव्याख्यया सहितम्. हरियाणा: रामलाल कपुर ट्रस्ट, १९९०.

शौनकः. *वृहद्देवता. सम्पा. राम-कुमार-रायः*. वाराणसी: चौखम्बा संस्कृत प्रतिष्ठानम्, २०४६ विक्रमाब्दः.

सरस्वती, दयानन्दः. *ऋग्वेदादिभाष्यभूमिका*. सम्पा. युधिष्ठिर-मीमांसकः. सोनीपतः रामलाल कपुर ट्रस्ट, २०१५.

English Books

Abhyankar, K. V. *A Dictionary of Sanskrit Grammar*. Baroda: Oriental Institute, 1961.

*Arthaśāstra of Kauṭilya.* Ed. Shri Vachaspati Gairola. Varanasi: Chowkhamba Vidyabhawan, 1984.

*Āpastamba-Paribhāṣā-Sūtra.* Ed. A. Mahadeva Sastri. Mysore (Now Mysuru): Government Branch Press, 1893.

*Āpastamba- Sāmānya- Sūtra or Yajñaparibhāṣā Sūtra.* Ed. Samiran Chandra Chakrabarti. Kolkata: The Asiatic Society, 2006.

Apte, Vaman Shivram. *Sanskrit English Dictionary*. Delhi: Motilal Banarsidass Publishers, 1970.

*Aitareya Āraṇyaka*. Ed. Rajendralal Mitra. Kolkata: The Asiatic Society of Bengal. 1833.

*Aitareya Brāḥmaṇa.*(Vol. I). Ed. R. Anantakrishna Śastri with Sukhapradā vṛitti of Ṣadguruśiṣya. Trivandrum (Now Thiruvananthapuram): The Bhaskara Press. 1942.

*Aitareya Brāḥmaṇa of the Rigveda*. Ed. Martin Haug. Allahabad: Sudhindra Nath Basu. 1922.

*Atharva Prātiśākhya*. Ed. Surya Kanta with intro. and Eng. Trans. Mehar Chand Lachhman Das Oriental and Foreign Booksellars and Publishers. Lahore.1939.

Bharata. *Nāṭyaśāstra.* Ed. Manomohan Ghosh. Calcutta (Now Kolkata): The Royal Asiatic Society of Bengal, 1950.

Bhattacharya, Bhabani Prasad. *Schools of Vedic Interpretation: Eastern and Western.* Kolkata: School of Vedic Studies Rabindra Bharati University. 2006.

Bloch, Bernard & Trager, George L. *Outline of Linguistic Analysis*. Baltimore: Linguistic Society of America. 1942.

Datta, Bhagabad. *A History of Vedic Literature* (Vol.-I, Part-II). Lahore: The Research Department, D. A.V. College. 1831.

Dīkṣita, Bhaṭṭoji. *Siddhānta Kaumudī.* (Vol. I) Ed. Śrīśa Chandra Vasu. Varanasi: Motilal Banarsidass, 1906.

Dīkṣita, Bhaṭṭoji. *Siddhānta Kaumudī.* (Vol. II, Part- I) Ed. Śrīśa Chandra Vasu with English translation. Allahabad: The Panini office, Bhuvaneshwari Ashram, 1906.

Gautama. *Nyāyasūtra. (*Vol-I*)* Ed. Ganganath Jha. Delhi: Motilal Banarsidass, 1984.

*Gopath Brāhmaṇa*. Ed. Rajendralal Mitra. Varanasi: Indological Book House, 1972.

Jha, Vashishtha Narayan. *A Linguistic Analysis of the Rgveda-Padapatha.* Delhi: Sri Satguru Publications, 1992.

*Kātyāyan-Sarvānukramaṇī.* Ed. A.A. Macdonell. Oxford: Clarendon Press, 1886.

Macdonell, Arthur Anthony, *A Vedic Grammar for Students.* Oxford: Oxford University Press, 1916.

Macdonell, Arthur Anthony and Keith, Arthur Berriedale. *Vedic Index of Names and Subjects* (Vol. I & II). London: John Murray, 1912.

Maxmullar, Fredrich. *Physical Religion.* London: Longmans Green and Co., 1891.

*Nirukta,* Ed. M. M. Pandit Mukund Jha Bakshi. Delhi: Chaukhamba Sanskrit Pratishthan, 2016.

*Nirukta,* Ed. Uma Shankar Sharma. Varanasi-I: Chowkhamba Vidya Bhawan, 1961.

Patañjali. *Vyākaraṇamahābhāṣya* (Vol. I & II) with commentary of Kaiyaṭa and Nāgeśa. Ed. M.M. Pandit Shivdatta Sharma. Delhi: Chaukhamba Sanskrit Pratisthan, 1872 (Saka Year).

*Pāṇinīya Śikṣā.* Ed. Manomohan Ghosh. Calcutta (Now Kolkata): University of Calcutta,1938.

*Phonetics in Ancient India,* W. S. Allen. London: Oxford University Press, 1953.

Ṛgveda- *Prātiśākhya.* Ed. Virendra Kumar Verma. Delhi: Choukhamba Sanskrit Pratishthan, 1970.

*Ṛgveda-Saṃhitā* (Vol.I). Poona: Vaidika Samshodhana Mandala, 1933.

*Ṛgveda-Saṃhitā* (Vol.II). Poona: Vaidika Samshodhana Mandala, 1936.

*Ṛgveda-Saṃhitā* (vol.III). Poona: Vaidika Samshodhana Mandala, 1941.

*Ṛgveda-Saṃhitā* (Vol.IV). Poona: Vaidika Samshodhana Mandala, 1946.

*Rig-Veda Saṃhitā* (First Astaka). Ed. Manmatha Nath Dutt. Calcutta (Now Kolkata): Society for the Resuscitation of Indian Literature, 1906.

*Shatpath-Brahmanam* (Part – I & II). With commentaries of Sayanacarya and Harisvamin. Delhi: Nag Publishers, 1990.

*Śrautasūtra of Āpastamba.* (Vol. I) Ed. Dr. Richard Garbe. Calcutta (Now Kolkata): The Asiatic Society, 1882.

Sweet, Henry. *The History of Language.* London. Oxford University Press, 1908 (Rpt.) (1st edition 1900).

*Taittiriya-Brāhmaṇa* (Vol.-I) with commentary of Sāyaṇācārya. Ed. Rajendralal Mitra. Calcutta (Now Kolkata): The Baptist Mission Press, 1862.

*Taittirīya- Prātiśakhya.* Ed. Mahopadhyaya Pandit V. Venkatarama Sharma Vidyabhusana with Padakramasadana Bhāsya by Mahisheya. Madras (Now Chennai): University of Madras, 1930.

*The Aṣṭādhyāyī* of Pāṇini with English translation. Ed. Srisa Chandra Vasu. Benaras (Now Varanasi): Sindhu Charan Bose, 1897.

*The Chāndogyoponiṣad.* with the commentary of Śaṅkarācārya. Ed. Ganganath Jha. Poona: Oriental Book Agency, 1942.

*The Nighaṇṭu And The Nirukta*. Ed. Lakshman Sarup. Delhi: Motilal Banarsidass, 1926.

*The Taittirīya Brāhmaṇa*. Ed. R Sharma Shastri. Mysore (Now Mysuru): The Governent Branch Press, 1921.

*The Taittirīya- Prātiśakhya.* Ed. William D. Whitney. Delhi: Motilal Banarasidass, 1863.

*The Vājasaneyi Samhitā.* Ed. Dr. Albrecht Weber. Varanasi-I: The Chowkhamba Sanskrit Series office, 1972.

Varma, Siddheshwar. *Critical Studies in the Phonetic Observation of Indian Grammarians*. Delhi: Munshi Ram Manohar Lal Oriental Publishers and Booksellers, 1961.

Viśvanāth Kavirāja. *Sāhityadarpaṇa*. Ed. Ācārya Kṛṣṇamohan Śāstrī. Varanasi: Chaukhamba Sanskrit Sansthan, 2014.

Williams, Monier. *Sanskṛit-English Dictionary*. New Delhi: Munshiram Manoharlal Publishers Pvt. Ltd, 2004.

## বাংলা গ্রন্থসমূহ

*ঐতরেয় ব্রাহ্মণ* (বঙ্গানুবাদ). অনু. শ্রীরামেন্দ্রসুন্দর ত্রিবেদী. কলিকাতা: বঙ্গীয় সাহিত্য পরিষদ্. ১৩১৮ (বঙ্গাব্দ).

*উপনিষদ্ গ্রন্থাবলী* (প্রথম ভাগ). সম্পা. স্বামী গম্ভীরানন্দ. কলকাতা: উদ্বোধন কার্যালয়, ২০১৭ (তৃতীয় সংস্করণ) (প্রথম সংস্করণ ১৩৪৮ বঙ্গাব্দ).

*উপনিষদ্ গ্রন্থাবলী* (দ্বিতীয় ভাগ). সম্পা. স্বামী গম্ভীরানন্দ. কলকাতা: উদ্বোধন কার্যালয়, ১৯৬৪ (পঞ্চম সংস্করণ) (প্রথম সংস্করণ ১৩৪৮ বঙ্গাব্দ).

*ঋগ্বেদ-প্রাতিশাখ্য.* সম্পা. অমরকুমার চট্টোপাধ্যায়. কলকাতা: সংস্কৃত পুস্তক ভাণ্ডার, ২০১৬ (দ্বিতীয় প্রকাশ) (প্রথম প্রকাশ ২০০৭).

*কঠোপনিষৎ.* অনু. স্বামী জুষ্টানন্দ. কলকাতা: উদ্বোধন কার্যালয়, ১৯৯৭.

*কূর্মপুরাণম্.* সম্পা. পণ্ডিত পঞ্চানন তর্করত্ন. কলিকাতা (অধুনা কলকাতা): নটবর চক্রবর্ত্তী রায়, ১৩৩২ বঙ্গাব্দ.

*কৌটিলীয়ম্ অর্থশাস্ত্রম্.* সম্পা. মানবেন্দু বন্দ্যোপাধ্যায়. কলকাতা: সংস্কৃত পুস্তক ভাণ্ডার, ২০১০ (পুনর্মুদ্রণ)

চট্টোপাধ্যায়, অমরকুমার. *বৈদিক ব্যাকরণ.* কলকাতা: সংস্কৃত পুস্তক ভাণ্ডার, ১৪২৮ (বঙ্গাব্দ).

*তৈত্তিরীয়োপনিষৎ.* অনু. স্বামী জুষ্টানন্দ. কলকাতা: উদ্বোধন কার্যালয়, ২০১৪.

ধর্মপাল, গৌরী. *বেদের ভাষা ও ছন্দ.* কলকাতা:  পশ্চিমবঙ্গ রাজ্য পুস্তক পর্ষৎ, ২০১৫ (দ্বিতীয় মুদ্রণ), (প্রথম মুদ্রণ ১৯৯৯).

*নিরুক্ত.* (প্রথম ভাগ) সম্পা. অমরেশ্বর ঠাকুর. কলকাতা: কলিকাতা বিশ্ববিদ্যালয়, ২০১৬ (পুনর্মুদ্রণ) (প্রথম মুদ্রণ ১৯৫৫).

ভট্টাচার্য্য, তপনশঙ্কর. *বৈদিকব্যাকরণ.* কলকাতা: সংস্কৃত বুক ডিপো, ২০১৬ (দ্বিতীয় সংস্করণ) (প্রথম সংস্করণ ২০০২).

*ভাগবতমহাপুরাণ.* গোরক্ষপুর: গীতাপ্রেস, ২০১৮.

*মনুসংহিতা.* সম্পা. সতীশচন্দ্র মুখোপাধ্যায়. কলকাতা: বসুমতী সাহিত্য মন্দির, ১৩৩৬ বঙ্গাব্দ (চতুর্থ সংস্করণ) (প্রথম সংস্করণ ১৩০৪ বঙ্গাব্দ).

মাধবাচার্য. *জৈমিনীয়ন্যায়মালাবিস্তরঃ.* সম্পা. শ্রীসুখময় ভট্টাচার্য. কলিকাতা: (অধুনা কলকাতা) বিশ্বভারতী গ্রন্থালয়, ১৩৫৮ বঙ্গাব্দ.

*মীমাংসা-দর্শনম্* (প্রথম খণ্ড). সম্পা. ভূতনাথ সপ্ততীর্থ. কলকাতা: সংস্কৃত বুক ডিপো, ১৪২৬ বঙ্গাব্দ. (পুনর্মুদ্রণ) (প্রথম প্রকাশ ১৩৫২ বঙ্গাব্দ).

*মীমাংসা-দর্শনম্* (দ্বিতীয় খণ্ড). সম্পা. ভূতনাথ সপ্ততীর্থ. কলকাতা: সংস্কৃত বুক ডিপো, ২০১৭.

*মুণ্ডকোপনিষৎ.* অনু. স্বামী জুষ্টানন্দ. কলকাতা: উদ্বোধন কার্যালয়, ১৯৯৯.

*বেদগ্রন্থমালা* (ষোড়শ খণ্ড) ঋগ্বেদ ঐতরেয় আরণ্যক. সম্পা. অধ্যাপক সমীরণচন্দ্র চক্রবর্তী. কলকাতা: রামকৃষ্ণ মিশন ইনস্টিটিউট অব কালচার, ২০১৬.

হালদার, গুরুপদ. *ব্যাকরণ দর্শনের ইতিহাস* (১ম খণ্ড). কলকাতা: শ্রীভারতীবিকাশ হালদার, ১৩৫০ (বঙ্গাব্দ).

*শ্রীমদ্ভগবদ্গীতা.* অনু. স্বামী বাসুদেবানন্দ. কলকাতা: উদ্বোধন কার্যালয়, ২০১৬ (পুনর্মুদ্রণ), (প্রথম মুদ্রণ ১৯৬৮).

## Web links

https://archive.org/details/in.ernet.dli.2015.487239/page/n3/mode/2up

https://archive.org/details/in.ernet.dli.2015.344920/page/n3/mode/2up

https://epustakalay.com/book/284961-rigveda-vol-1-by-shreematsayanaacharya/

https://vedicheritage.gov.in/brahmanas/aarsheya-brahmana/

https://www.wisdomlib.org/definition/padapatha